

वेदान्तसमुच्चयः ।

प्रातःस्मरणस्तोत्रम् ॥ १ ॥

ॐ परमात्मने नमः ॥ प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् । यत्स्वप्नजागरसुषुप्तमवैति नित्यं तद्ब्रह्म निष्कलमहं न च भूतसंघः ॥ १ ॥ प्रातर्भजामि मनसो वचसामगम्यं वाचो विभान्ति निखिला यदनुग्रहेण । यन्नेति नेति वचनैर्निगमा अवोचुस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥ प्रातर्नमामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् । यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् । प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥ ४ ॥ इति श्रीभगवत्पादाचार्यविरचितं प्रातःस्मरणस्तोत्रं संपूर्णम् ॥ १ ॥

मुमुक्षुपञ्चकम् ॥ २ ॥

ॐ परमात्मने नमः । विहायैनः कृत्वा क्रतुविधुरकर्मादिविहितं धियं संशोध्याऽऽत्वा चिदचिदवलोकादिनिकरम् । समाराध्याऽऽचार्यं नतिविमतिशुश्रूषणमुखैः प्रपन्नः सन् पृच्छेद् विविदिषितमात्मीयमखिलम् ॥ १ ॥ विचार्याऽऽत्मानं स्वं

श्रुतिगदितसच्चित्सुखमयं परंब्रह्मासीति श्रवणमननध्यानकरणैः । अहं ब्रह्मासीति दृढमवगतिं गम्य परमां विशाध्येदं दृश्यं सकलमलमज्ञानसहितम् ॥ २ ॥ विदित्वेत्थं तत्त्वं निखिलनिगमान्तैर्निगदितं निहत्वाऽनर्थं वै सकलमपि जीवातु सहितम् । परानन्दो भूत्वा भवति भुवि भव्यो भुपति भो विधेयं कर्त्तव्यं विविधमपि हेयं हृदिगतम् ॥ ३ ॥ मुदो जीवन्मुक्तेर्यदि हृदि मनीषा स्वविदुपस्तदा वृत्तिं वृत्तेरनिशमभिकुर्वन् बहुतिथम् । विनाश्यैव स्थौल्यं मलिनतरसत्त्वस्य मनसः सुसत्त्वाविर्भावात् परमसुखसिंधौ हि सुरमेत् ॥ ४ ॥ सुभूमिं प्राप्येमां परमसुखदां पञ्चममुखां मुखं भुक्त्वा प्राक्षं दृढतरनिजारब्धमपि च । विलाप्येदं विश्वं जगदगमयं हेतुसहितं चिदानन्दे शुद्धे भजति च विदेहामृतमयम् ॥ ५ ॥ इति मुमुक्षुपञ्चकं समाप्तम् ॥ २ ॥

वैराग्यपञ्चकम् ॥ ३ ॥

ॐ परमात्मने नमः ॥ शिलं किमनलं भवेदनलमौदरं बाधितुं पयः प्रसृतिपूरकं किमु न धारकं सारसम् । अयत्नमलमल्पकं पथि पटच्चरं कच्चरं भजन्ति विबुधा मुधा अहह कुक्षितः कुक्षितः ॥ १ ॥ दुरीश्वरद्वारबहिर्वितर्दिकादुरासिकायै रचितोऽयमञ्जलिः । यदञ्जनाभं निरपायमस्ति नो धनञ्जयस्यन्दनभूषणं धनम् ॥ २ ॥ काचाय नीचं कमनीयवाचा मोचाफलस्वादमुचा न याचे । दयाकुचेले धनदत्कुचेले स्थितेऽकुचेले श्रितमाकुचेले ॥ ३ ॥ क्षोणीकोणशतांशपालनकलदुर्वारगर्वानलक्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनां धन्यां न मन्यामहे । देवं

सेवितुमेव निश्चिनुमहे योऽसौ दयालुः पुरा धानामुष्टिमुचे कुचेलमुनये धत्ते स वित्तेशताम् ॥ ४ ॥ शरीरपतनावधि प्रभुनिषेवणापादनादविन्धनधनंजयप्रशमदं धनं दन्धनम् । धनंजयविवर्धनं धनमुदूढगोवर्धनं सुसाधनमबाधनं सुमनसां समाराधनम् ॥ ५ ॥ इति श्रीसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यकृतं वैराग्यपञ्चकं संपूर्णम् ॥ ३ ॥

साधनपञ्चकम् ॥ ४ ॥

ॐ परमात्मने नमः ॥ वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् । पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयतामात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥ सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम् । सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुके सेव्यतां ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २ ॥ वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसंधीयताम् । ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥ ३ ॥ क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन संतुष्यताम् । शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४ ॥ एकान्ते सुखमास्यतां परतरे चेतः समा-

धीयतां पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् । प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५ ॥ यः श्लोकपञ्चकमिदं पठते मनुष्यः संचिन्तयत्यनुदिनं स्थिरतामुपेत्य । तस्याशु संसृतिदवानलतीव्रघोरतापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितं साधनपञ्चकं संपूर्णम् ॥ ४ ॥

काशीपञ्चकम् ॥ ५ ॥

ॐ परमात्मने नमः ॥ मनोनिवृत्तिः परमोपशान्तिः सा तीर्थवर्या मणिकर्णिका च । ज्ञानप्रवाहा विमलादिगङ्गा सा काशिकाहं निजबोधरूपा ॥ १ ॥ यस्यामिदं कल्पितमिन्द्रजालं चराचरं भाति मनोविलासम् । सच्चित्सुखैका परमात्मरूपा सा का० ॥ २ ॥ कोशेषु पञ्चस्वधिराजमाना बुद्धिर्भवानी प्रतिदेहगेहम् । साक्षी शिवः सर्वगणोन्तरात्मा सा का० ॥३॥ काश्या हि काश्यते काशी काशी सर्वप्रकाशिका । सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ ४ ॥ काशीक्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगङ्गा भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः । विश्वेशोऽयं तुरीयः सकलजनमनःसाक्षिभूतोऽन्तरात्मा देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥ इति श्रीमच्छंकराचार्यविरचितं काशीपञ्चकं सपूर्णम् ॥ ५ ॥

मनीषापञ्चकम् ॥ ६ ॥

ॐ परमात्मने नमः ॥ सत्याचार्यस्य गमने कदाचिन्मुक्तिदायकम् । काशीक्षेत्रं प्रति सह गौर्या मार्गे तु शंकरम् ॥ १ ॥ अन्त्यवेषधरं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् । शंकरः सोऽपि चाण्डालस्तं पुनः प्राह शंकरम् ॥ २ ॥ अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात् । द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥ ३ ॥ किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चाण्डालवाटीपयःपूरे चान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे । प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान् कोयं विभेदभ्रमः ॥ ४ ॥ जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी । सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेच्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ ५ ॥ ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाशेषं मया कल्पितम् । इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले चाण्डलोऽस्तु०॥६॥ शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरोर्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना । भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पितं स्ववपुरित्येषा० ॥ ७ ॥ या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः । तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्योगी निर्वृतमानसो हि गुरुरित्येषा० ॥ ८ ॥ यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता यश्चित्ते नितरां प्रशान्तकलने ..

मुनिर्निर्वृतः । यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्म-
विद्यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ९ ॥
इति श्रीमच्छंकराचार्यविरचितं मनीषापञ्चकं संपूर्णम् ॥ ६ ॥

आत्मपञ्चकम् ॥ ७ ॥

ॐ परमात्मने नमः ॥ नाहं देहो नेन्द्रियाण्यन्तरङ्गं नाहं-
कारः प्राणवर्गो न बुद्धिः । दारापत्यक्षेत्रवित्तादिदूरः साक्षी
नित्यः प्रत्यगात्मा शिवोऽहम् ॥ १ ॥ रज्ज्वज्ञानाद्भाति रज्जु-
र्यथाहिः स्वात्माज्ञानादात्मनो जीवभावः । आप्तोक्त्या हि
भ्रान्तिनाशे स रज्जुर्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥२॥
आभातीदं विश्वमात्मन्यसत्यं सत्यज्ञानानन्दरूपे विमोहात् ।
निद्रामोहात्स्वप्नवत्तन्न सत्यं शुद्धः पूर्णो नित्य एकः शिवोऽहम्
॥ ३ ॥ मत्तो नान्यत्किंचिदत्रास्ति विश्वं सत्यं बाह्यं वस्तु
मायोपक्लृप्तम् । आदर्शान्तर्भासमानस्य तुल्यं मय्यद्वैते भाति
तस्माच्छिवोऽहम् ॥ ४ ॥ नाहं जातो न प्रवृद्धो न नष्टो देह-
स्योक्ताः प्राकृताः सर्वधर्माः । कर्तृत्वादिश्चिन्मयस्यास्ति नाहं-
कारस्यैव ह्यात्मनो मे शिवोऽहम् ॥ ५ ॥ नाहं जातो जन्म-
मृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे । नाहं चित्तं
शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो मे ॥ ६ ॥
इति श्रीमच्छंकराचार्यविरचितमात्मपञ्चकस्तोत्रं संपूर्णम् ॥७॥

आत्मषट्कम् ॥ ८ ॥

ॐ परमात्मने नमः ॥ मनोबुद्ध्यहंकारचित्तानि नाहं न
च श्रोत्रजिह्वे न च घ्राणनेत्रे । न च व्योम भूमिर्न तेजो न

वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥ न च प्राणसंज्ञो न वै पञ्चवायुर्न वा सप्तधातुर्न वा पञ्चकोशः । न वाक्पाणिपादं न चोपस्थपायुश्चिदानन्द० ॥ २ ॥ न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः । न धर्मो न चार्थो न कामो न मोक्षश्चिदानन्द० ॥ ३ ॥ न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः । अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्द० ॥ ४ ॥ न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता च जन्म । न बन्धुर्न मित्रं गुरुर्नैव शिष्यश्चिदानन्द० ॥ ५ ॥ अहं निर्विकल्पो निराकाररूपो विभुत्वाच सर्वत्र सर्वेन्द्रियाणाम् । न चासंगत नैव मुक्तिर्न मेयश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितमात्मषट्कस्तोत्रं संपूर्णम् ॥ ८ ॥

निर्वाणाष्टकम् ॥ ९ ॥

ॐ परमात्मने नमः ॥ भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे मायामोहौ क्षयमुपगतौ नष्टसन्देहवृत्तेः । शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ १ ॥ यद्वात्मानं सकलवपुषामेकमन्तर्बहिस्थं दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम् । नान्यत्कार्यं किमपि च ततः कारणाद्भिन्नरूपं निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ २ ॥ हेम्नः कार्यं हुतवहगतं हेममेवेति यद्वत्क्षीरे क्षीरं समरसतया तोयमेवाम्बुमध्ये । एवं सर्वं समरसतया संपदं तत्पदार्थे निस्त्रैगुण्ये पथि विचरतः

को विधिः को निषेधः ॥ ३ ॥ यस्मिन्विश्वं सकलभुवनं साम-
रस्यैकभूतमुर्वी ह्यापोऽनलमनिलखं जीवमेवं क्रमेण । यत्क्षारा-
ब्धौ समरसतया सैन्धवैकलभूतं निस्त्रैगुण्ये पथि विचरतः को
विधिः को निषेधः ॥ ४ ॥ यद्वन्नद्यो दधिमसरमो सागरत्वं
ह्यवाप्ता तद्वज्जीवालयपरिगता सामरस्यैकभूताः । भेदातीतं
परिलयगतं सच्चिदानन्दरूपं निस्त्रैगुण्ये पथि विचरतः को
विधिः को निषेधः ॥ ५ ॥ दृष्ट्वा वेद्यं परमपदं स्वात्मबोध-
स्वरूपं बुद्ध्वात्मानं सकलवपुषामेकमन्तर्बहिस्थम् । भूत्वा नित्यं
सदुदिततया स्वप्रकाशस्वरूपं निस्त्रैगुण्ये पथि विचरतः को
विधिः को निषेधः ॥ ६ ॥ कार्याकार्यं किमपि सततं नैव
कर्त्तव्यमस्ति जीवन्मुक्तस्थितिरवगतो दग्धवस्त्रावभासः । एवं
देहे प्रविलयगते तिष्ठमानो विमुक्तो निस्त्रैगुण्ये पथि विचरतः
को विधिः को निषेधः ॥ ७ ॥ कस्मात्कोऽहं किमपि च भवा-
न्कोऽयमत्र प्रपञ्चः स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।
आनन्दाख्ये समरसघने बाह्यमन्तर्विहीने निस्त्रैगुण्ये पथि विच
रतः को विधिः को निषेधः ॥ ८ ॥ सत्यं सत्यं परमममृतं
सर्वकल्याणरूपं मायारण्यं दहनममलं शान्तिनिर्वाणदीपम् ।
तेजोरूपं निगमसदनं त्यागपुत्राष्टकं यः प्रातःकाले पठति
मनसा याति निर्वाणमार्गं ॥ ९ ॥ इति श्रीमत्परमगुरुदेवमुनि-
विरचितं निर्वाणाष्टकं संपूर्णम् ॥ ९ ॥

निर्वाणदशकम् ॥ १० ॥

ॐ परमात्मने नमः ॥ न भूमिर्न तोयं न तेजो न वायुर्न
खं नेन्द्रियं वा न तेषां समूहः । अनैकान्तिकत्वात्सुषुप्त्येकसि

द्वस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥ न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणा ध्यानयोगादयोऽपि । अनात्माश्रयोऽहं ममाध्यासहीनात्तदेको० ॥ २ ॥ न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति । सुषुप्तौ निरस्तातिशून्यात्मकत्वात्तदेको० ॥ ३ ॥ न सांख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा । विशिष्टानुभूत्या विशुद्धात्मकत्वात्तदेको० ॥ ४ ॥ न शुक्लं न कृष्णं न रक्तं न पीतं न पीनं न कुब्जं न ह्रस्वं न दीर्घम् । अरूपं तथा ज्योतिराकारकत्वात्तदेको० ॥ ५ ॥ न जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न विश्वो न वा तैजसः प्राज्ञको वा । अविद्यात्मकत्वात्त्रयाणां तुरीयं तदेको० ॥ ६ ॥ न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः । स्वरूपावबोधाद्विकल्पासहिष्णुस्तदेको० ॥ ७ ॥ न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वा परा दिक् । वियद्व्यापकत्वादखण्डैकरूपस्तदेको० ॥ ८ ॥ अपि व्यापकत्वादितत्वात्प्रयोगात् स्वतःसिद्धभावादनन्याश्रयत्वात् । जगत्तुच्छमेतत्समस्तं तदन्यस्तदेको० ॥ ९ ॥ न चैकं तदन्यद्द्वितीयं कुतः स्यान्न चाकेवलत्वं न वा केवलत्वात् । न शून्यं न चाशून्यमद्वैतकत्वात्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥ इति श्रीमच्छंकराचार्यविरचितं निर्वाणदशकस्तोत्रं संपूर्णम् ॥ १० ॥

आचार्यकृतपट्पदी ॥ ११ ॥

ॐ परमात्मने नमः ॥ अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् । भूतदयां विस्तारय तारय संसार-

सागरतः ॥ १ ॥ दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे । श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥ २ ॥ सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् । सामुद्रो हि तरङ्गः कचन समुद्रो न तारङ्गः ॥ ३ ॥ उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे । दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥ मत्स्यादिभिरवतारैरवतारवताऽवता वसुधाम् । परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥ दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द । भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥ ६ ॥ नारायण करुणामय शरणं करवाणि तावकौ चरणौ । इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥ इति श्रीमच्छंकराचार्यविरचितं षट्पदीस्तोत्रं संपूर्णम् ॥ ११ ॥

धन्याष्टकम् ॥ १२ ॥

ॐ परमात्मने नमः ॥ तज्ज्ञानं प्रशमकरं यदिन्द्रियाणां तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् । ते धन्या भुवि परमार्थनिश्चितेहाः शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥ १ ॥ आदौ विजित्य विषयान्मदमोहरागद्वेषादिशत्रुगणमाहृतयोगराज्याः । ज्ञात्वाऽमतं समनुभूय परात्मविद्याकान्तासुखा वत गृहे विचरन्ति धन्याः ॥ २ ॥ त्यक्त्वा गृहे रतिमतो गतिहेतुभूतामात्मेच्छयोपनिषदर्थरसं पिबन्तः । वीतस्पृहा विषयभोगपदे विरक्ता धन्याश्चरन्ति विजनेषु विरक्तसङ्गाः ॥ ३ ॥ त्यक्त्वा ममाहमिति बन्धकरे पदे द्वे मानावमानसदृशाः समदर्शिनश्च । कर्तारमन्यमवगम्य तदर्पितानि कुर्वन्ति कर्मपरिपाकफलानि

धन्याः ॥ ४ ॥ त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा भैक्ष्यामृतेन परिकल्पितदेहयात्राः । ज्योतिः परात्परतरं परमात्मसंज्ञं धन्या द्विजा रहसि हृद्यवलोकयन्ति ॥ ५ ॥ नासन्न सन्न सदसन्न महन्न चाणु न स्त्री पुमान्न च नपुंसकमेकबीजम् । यैर्ब्रह्म तत्समनुपासितमेकचित्ता धन्या विरेजुरितरे भवपाशबद्धाः॥६॥ अज्ञानपङ्कपरिमग्नमपेतसारं दुःखालयं मरणजन्मजरावसक्तम् । संसारबन्धनमनित्यमवेक्ष्य धन्या ज्ञानासिना तदवशीर्य विनिश्चयन्ति ॥ ७ ॥ शान्तैरनन्यमतिभिर्मधुरस्वभावैरेकत्वनिश्चितमनोभिरपेतमोहैः । साकं वनेषु विजितात्मपदस्वरूपं शास्त्रेषु सम्यगनिशं विमृशन्ति धन्याः ॥ ८ ॥ अहिरिव जनयोगं सर्वदा वर्जयेद्यः कुणपमिव सुनारीं त्यक्तुकामो विरागी । विषमिव विषयान्यो मन्यमानो दुरन्तान् जयति परमहंसो मुक्तिभावं समेति ॥ ९ ॥ संपूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमा गाङ्गं वारि समस्तवारिनिवहः पुण्याः समस्ताः क्रियाः । वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी सर्वावस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मणि ॥ १० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं धन्याष्टकस्तोत्रं समाप्तम् ॥ १२ ॥

विज्ञाननौका ॥ १३ ॥

ॐ परमात्मने नमः ॥ तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या । परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मत्या विचार्य स्वरूपम् । यदाप्नोति

तत्त्वं निदिध्यास विद्वान्परं ब्रह्म० ॥ २ ॥ यदानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यम् । अहंब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म० ॥ ३ ॥ यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे । मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म० ॥ ४ ॥ निषेधे कृते नेति नेतीति वाक्यैः समाधिस्थितानां यदाभाति पूर्णम् । अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म० ॥ ५ ॥ यदानन्दलेशैः समानन्दि विश्वं यदाभाति सत्त्वे तदाभाति सर्वम् । यदालोचने रूपमन्यत्समस्तं परं ब्रह्म०॥६॥ अनन्तं विभुं सर्वयोनिं निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम् । निराकारमत्युज्ज्वलं मृत्युहीनं परं ब्रह्म० ॥ ७ ॥ यदानन्दसिन्धौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपञ्चः । यदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म० ॥ ८ ॥ स्वरूपानुसंधानरूपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः । शृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९ ॥ विज्ञाननावं परिगृह्य कश्चित्तरेद्यदज्ञानमयं भवाब्धिम् । ज्ञानासिना यो हि विच्छिद्य तृष्णां विष्णोः पदं याति स एव धन्यः ॥ १० ॥ इति श्रीमच्छंकराचार्यविरचिता विज्ञाननौका संपूर्णा ॥ १३ ॥

द्वादशपञ्जरिका (मोहमुद्गर) स्तोत्रम् ॥ १४ ॥

ॐ परमात्मने नमः ॥ मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् । यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥ अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् । पुत्रादपि धनभाजां भीतिः सर्वत्रैषा

विहिता नीतिः ॥ २ ॥ का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः । कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ॥ ३ ॥ मा कुरु जनधनयौवनगर्वं हरति निमेषात्कालः सर्वम् । मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ४ ॥ कामं क्रोधं मोहं लोभं त्यक्त्वात्मानं भावय कोऽहम् । आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ५ ॥ सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः । सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ६ ॥ शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं निग्रहसंधौ । भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ ७ ॥ त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः। सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम् ॥ ८ ॥ प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् । जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ९ ॥ नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम् । विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ १० ॥ का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता । यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥ ११ ॥ गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः । सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ १२ ॥ द्वादशपञ्जरिकामय एषः शिष्याणां कथितो ह्युपदेशः । येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम् ॥ १३ ॥ इति श्रीमच्छंकराचार्यविरचितं द्वादशपञ्जरिकास्तोत्रं संपूर्णम् ॥ १४ ॥

चर्पटपञ्जरिकास्तोत्रम् ॥ १५ ॥

ॐ परमात्मने नमः ॥ दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः । कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १ ॥ भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते । प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्करणे । (ध्रुवपदम्)। अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः । करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः । भज गो० ॥ २ ॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः । पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे । भज गो० ॥ ३ ॥ जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः । पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः । भज गो० ॥ ४ ॥ भगवद्गीता किंचिदधीता गङ्गाजललवकणिका पीता । सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् । भज गो० ॥ ५ ॥ अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् । वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् । भज गो० ॥ ६ ॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः । वृद्धस्तावच्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः । भज गो० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् । इह संसारे भवदुस्तारे कृपयाऽपारे पाहि मुरारे । भज गो० ॥ ८ ॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः । पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम् । भज गो० ॥ ९ ॥ वयसि गते कः कामविकारः शुष्के नीरे कः कासारः । नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः । भज गो०

॥ १० ॥ नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् । एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् । भज गो० ॥ ११ ॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः । इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् । भज गो० ॥ १२ ॥ गेयं गीता नामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् । नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् । भज गो० ॥ १३ ॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे । गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये । भज गो० ॥ १४ ॥ सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः । यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् । भज गो० ॥ १५ ॥ रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः । नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः । भज गो० ॥ १६ ॥ कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् । ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन । भज गो० ॥ १७ ॥ इति श्रीमच्छंकराचार्यविरचितं चर्पटपञ्जरिकास्तोत्रं संपूर्णम् ॥१५॥

सदाचारस्तोत्रम् ॥ १६ ॥

ॐ परमात्मने नमः ॥ सच्चिदानन्दरूपाय जगदङ्कुरहेतवे । सदोदिताय पूर्णाय नमोऽनन्ताय विष्णवे ॥ १ ॥ सर्ववेदान्तसिद्धान्तैर्ग्रथितं निर्मलं शिवम् । सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥ प्रातः स्मरामि देवस्य सवितुर्भर्ग आत्मनः । वरेण्यं तद्धियो यो नश्चिदानन्दः प्रचोदयात् ॥ ३ ॥ अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु । यदेकं केवलं ज्ञानं तदेवाहं

परं बृहत् ॥ ४ ॥ ज्ञानाज्ञानविलासोऽयं ज्ञानाज्ञानेन शाम्यति । ज्ञानाज्ञाने परित्यज्य ज्ञानमेवावशिष्यते ॥ ५ ॥ अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः । असङ्गोऽहमिति ज्ञात्वा शौचमेतत्प्रचक्षते ॥ ६ ॥ मन्मनो मीनवन्नित्यं क्रीडत्यानन्दवारिधौ । सुस्नातस्तेन पूतात्मा सम्यग्विज्ञानवारिणा ॥ ७ ॥ अथाघमर्षणं कुर्यात् प्राणापाननिरोधतः । मनः पूर्णे समाधाय मग्नकुम्भो यथार्णवे ॥ ८ ॥ लयविक्षेपयोः संधौ मनस्तत्र निरामिषम् । स संधिः साधितो येन स मुक्तो नात्र संशयः ॥ ९ ॥ सर्वत्र प्राणिनां देहे जपो भवति सर्वदा । हंसः सोहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १० ॥ तर्पणं स्वसुखेनैव स्वेन्द्रियाणां प्रतर्पणम् । मनसा मन आलोक्य स्वयमात्मा प्रकाशते ॥ ११ ॥ आत्मनि स्वप्रकाशेऽग्नौ चित्तमेकाहुतिं क्षिपेत् । अग्निहोत्री स विज्ञेय इतरे नामधारकाः ॥ १२ ॥ देहो देवालयः प्रोक्तो देही देवो निरञ्जनः । अर्चितः सर्वभावेन स्वानुभूत्या विराजते ॥ १३ ॥ मौनं स्वाध्यायश्च ध्यानं ध्येयब्रह्मानुचिंतनम् । ज्ञानेनेति तयोः सम्यग्निषेधान्तप्रदर्शनम् ॥ १४ ॥ अतीतानागतं किंचिन्न स्मरामि न चिन्तये । रागद्वेषं विना प्राप्तं भुञ्जाम्यत्र शुभाशुभम् ॥ १५ ॥ हठाभ्यासो हि संन्यासो नैव काषायवाससा । नाहं देहोऽहमात्मेति निश्चयो न्यासलक्षणम् ॥ १६ ॥ अभयं सर्वभूतानां दानमाहुर्मनीषिणः । निजानन्दे स्पृहा नान्यद्वैराग्यस्यावधिर्मतः ॥ १७ ॥ वेदान्तश्रवणं कुर्यात् मननं चोपपत्तिभिः । योगेनाभ्यसनं नित्यं ततो दर्शनमात्मनः ॥ १८ ॥ शब्दशक्तेरचिन्त्यत्वाच्छब्दादेवापरोक्षधीः । प्रसुप्तपुरुषो यद्वच्छब्दे नैवा-

नुबुध्यते ॥ १९ ॥ आत्मानात्मविवेकेन ज्ञानं भवति निर्मलम् । गुरुणा बोधितः शिष्यः शब्दब्रह्मातिवर्तते ॥ २० ॥ न त्वं देहो नेन्द्रियाणि न प्राणो न मनो न धीः । विकारित्वाद्विनाशित्वाद् दृश्यत्वाच्च घटो यथा ॥ २१ ॥ विशुद्धं केवलं ज्ञानं निर्विशेषं निरंजनम् । यदेकं परमानंदं तत्त्वमस्यद्वयं परम् ॥ २२ ॥ शब्दस्याद्यन्तयोः सिद्धे मनसोऽपि तथैव च । मध्ये साक्षितया नित्यं तदेव त्वं भ्रमं जहि ॥ २३ ॥ स्थूलवैराजयोरैक्यं सूक्ष्महैरण्यगर्भयोः । अज्ञानमाययोरैक्यं प्रत्यग्विज्ञानपूर्णयोः ॥ २४ ॥ चिन्मात्रैकरसे विष्णौ ब्रह्मात्मैक्यस्वरूपके । भ्रमेणैव जगज्जातं रज्ज्वां सर्पभ्रमो यथा ॥ २५ ॥ तार्किकाणां च जीवेशौ वाच्यावेतौ विदुर्बुधाः । लक्ष्यौ च सांख्ययोगाभ्यां वेदान्तैरैक्यता तयोः ॥ २६ ॥ कार्यकारणवाच्यांशौ जीवेशौ योजहच्च तौ । अजहच्च तयोर्लक्ष्यौ चिदंशावेकरूपिणौ ॥ २७ ॥ कर्मशास्त्रे कुतो ज्ञानं तर्के नैवास्ति निश्चयः । सांख्ययोगौ भिदापन्नौ शाब्दिकाः शब्दतत्पराः ॥ २८ ॥ अन्ये पाषण्डिनः सर्वे ज्ञानवार्तासु दुर्बलाः । एकं वेदान्तविज्ञानं स्वानुभूत्या विराजते ॥ २९ ॥ अहं ममेत्ययं बन्धो ममाहं नेति मुक्तता । बन्धमोक्षौ गुणैर्भाति गुणाः प्रकृतिसंभवाः ॥ ३० ॥ ज्ञानमेकं सदा भाति सर्वावस्थासु निर्मलम् । मन्दभाग्या न जानन्ति स्वरूपं केवलं बृहत् ॥३१॥ संकल्पसाक्षिणं ज्ञानं सर्वलोकैकजीवनम् । तदस्मीति च यो वेद स मुक्तो नात्र संशयः ॥ ३२ ॥ प्रमाता च प्रमाणं च प्रमेयप्रमितिस्तथा । यस्य भासावभासेत मानं ज्ञानाय तस्य किम् ॥ ३३ ॥ अर्थाकारा भवेद्वृत्तिः फलेनार्थः प्रकाशते ।

अर्थज्ञानं विजानाति स एवार्थः पर स्मृतः ॥ ३४ ॥ वृत्ति-व्याप्यत्वमेवास्तु फलव्याप्तिः कथं भवेत् । स्वप्रकाशस्वरूप-त्वात्सिद्धत्वाच्च चिदात्मनः ॥ ३५ ॥ अर्थादर्थे यदा वृत्तिर्गन्तुं चलति चान्तरे । निराधारा निर्विकारा या दशा सोन्मनी स्मृता ॥ ३६ ॥ चित्तं चिच्च विजानीयात् तकाररहितं यदा । तकारविषयाध्यासं जपारागो यथा मणौ ॥ ३७ ॥ ज्ञेयवस्तु-परित्यागाज्ज्ञानं तिष्ठति केवलम् । त्रिपुटी क्षीणतामेति ब्रह्म-निर्वाणमृच्छति ॥ ३८ ॥ मनोमात्रमिदं सर्वं तन्मनोऽज्ञानमा-त्रकम् । अज्ञानं भ्रम इत्याहुर्विज्ञानं परमं पदम् ॥ ३९ ॥ अज्ञानं चान्यथाज्ञानं मायामेतां वदंति ते । ईश्वरं मायिनं विद्यान्मायातीतं निरंजनम् ॥ ४० ॥ सदानन्दे चिदाकाशे माया मेघस्तडिन्मनः। अहंता गर्जनं तत्र धारासारो हि वृत्तयः ॥ ४१ ॥ महामोहान्धकारेऽस्मिन् देवो वर्षति लीलया । अस्या वृष्टेर्विरामाय प्रबोधैकसमीरणः ॥ ४२ ॥ ज्ञानं दृग्दृश्ययो-र्भावं विज्ञानं दृश्यशून्यता । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४३ ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं तज्ज्ञानं ज्ञानमुच्यते । विज्ञानं चोभयोरैक्यं क्षेत्रज्ञपरमात्मनोः ॥ ४४ ॥ परोक्षं शास्त्र-जं ज्ञानं विज्ञानं चात्मदर्शनम् । आत्मनो ब्रह्मणः सम्यगुपा-धिद्वयवर्जितम् ॥ ४५ ॥ समर्थविषयं ज्ञानं विज्ञानं तत्पदाश्र-यम् । पदयोरैक्यबोधस्तु ज्ञानविज्ञानसंज्ञकम् ॥ ४६ ॥ आत्मा-नात्मविवेकस्य ज्ञानमाहुर्मनीषिणः । अज्ञानं चान्यथा लोके विज्ञानं तन्मयं जगत् ॥ ४७ ॥ अन्वयव्यतिरेकाभ्यां सर्वत्रैकं प्रपश्यति । यत्तु वृत्तिजं ज्ञानं विज्ञानं ज्ञानमात्रकम् ॥४८॥ अज्ञानध्वंसकं ज्ञानं विज्ञानं चोभयात्मकम् । ज्ञानविज्ञाननिष्ठेयं

तत्सद्ब्रह्मणि चार्पितम् ॥ ४९ ॥ भोक्ता सत्त्वगुणः शुद्धो भोगानां साधनं रजः । भोग्यं तमोगुणं प्राहुरात्मा चैषां प्रकाशकः ॥ ५० ॥ ब्रह्माध्ययनसंयुक्तो ब्रह्मचर्यरतः सदा । सर्वं ब्रह्मेति यो वेद ब्रह्मचारी स उच्यते ॥ ५१ ॥ गृहस्थो गुणमध्यस्थः शरीरं गृहमुच्यते । गुणाः कुर्वंति कर्माणि नाहं कर्तेति बुद्धिमान् ॥ ५२ ॥ किमुग्रैश्च तपोभिश्च यस्य ज्ञानमयं तपः । हर्षामर्षविनिर्मुक्तो वानप्रस्थः स उच्यते ॥ ५३ ॥ सदाचारमिमं नित्यं ये च संदधते बुधाः । संसारसागराच्छीघ्रं मुच्यंते नात्र संशयः ॥ ५४ ॥ इति श्रीमच्छंकराचार्यविरचितं सदाचारस्तोत्रं संपूर्णम् ॥ १६ ॥

ब्रह्मज्ञानावली ॥ १७ ॥

ॐपरमात्मने नम। ॐतत्सद्ब्रह्मणे नमः॥ सकृच्छ्रवणमात्रेण ब्रह्मज्ञानं यतो भवेत्। ब्रह्मज्ञानावली माला सर्वेषां मोक्षसिद्धये ॥१॥ असंगोऽहमसंगोऽहमसंगोऽहं पुनः पुनः । सच्चिदानंदरूपोऽहमहमेवाहमव्ययः॥२॥ नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः। भूमानंदस्वरूपोऽहमहमेवाहमव्ययः॥ ३ ॥ नित्योऽहं निरवद्योऽहं निराकारोऽहमच्युतः। परमानंदरूपोऽहमहमेवाहमव्ययः ॥ ४ ॥ शुद्धचैतन्यरूपोऽहमात्मारामोऽहमेव च। अखंडानंदरूपोऽहमहमे० ॥ ५ ॥ प्रत्यक्चैतन्यरूपोऽहं शांतोऽहं प्रकृतेः परः । शाश्वतानंदरूपोऽहमहमे० ॥ ६ ॥ तत्त्वातीतः परात्माहं मध्यातीतः परः शिवः । मायातीतः परं ज्योतिरहमे० ॥ ७ ॥ नामरूपव्यतीतोऽहं चिदाकारोऽहमच्युतः । सुखरूपस्वरूपोऽहमहमे० ॥ ८ ॥ मायातत्कार्यदेहादि मम

नास्त्येव सर्वदा । स्वप्रकाशैकरूपोऽहमहमे० ॥ ९ ॥ गुणत्रयव्यतीतोऽहं ब्रह्मादीनां च साक्ष्यहम् । अनंतानंदरूपोऽहमहमे० ॥ १० ॥ अंतर्यामिस्वरूपोऽहं कूटस्थः सर्वगोऽस्म्यहम् । परमात्मस्वरूपोऽहमहमे० ॥ ११ ॥ निष्कलोऽहं निष्क्रियोऽहं सर्वात्माद्यः सनातनः । अपरोक्षस्वरूपोऽहमहमे० ॥ १२ ॥ द्वंद्वादिसाक्षिरूपोऽहमचलोऽहं सनातनः । सर्वसाक्षिस्वरूपोऽहमहमे० ॥ १३ ॥ प्रज्ञानघन एवाहं विज्ञानघन एव च । अकर्ताहमभोक्ताऽहमहमे० ॥ १४ ॥ निराधारस्वरूपोऽहं सर्वाधारोऽहमेव च । आप्तकामस्वरूपोऽहमहमे० ॥ १५ ॥ तापत्रयविनिर्मुक्तो देहत्रयविलक्षणः । अवस्थात्रयसाक्ष्यस्मि चाहमेवा० ॥ १६ ॥ दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ । दृग् ब्रह्म दृश्यं मायेति सर्ववेदांतडिंडिमः ॥ १७ ॥ अहं साक्षीति यो विद्याद्विविच्यैवं पुनः पुनः । स एव मुक्तः सो विद्वानिति वेदांतडिंडिमः ॥ १८ ॥ घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च । तद्वद्ब्रह्म जगत्सर्वमिति वेदांतडिंडिमः ॥१९॥ ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः । अनेन वेद्यं सच्छास्त्रमिति वेदांतडिंडिमः ॥ २० ॥ अंतर्ज्योतिर्बहिर्ज्योतिः प्रत्यग्ज्योतिः परात्परः । ज्योतिर्ज्योतिः स्वयंज्योतिरात्मज्योतिः शिवोऽस्म्यहम् ॥ २१ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता ब्रह्मज्ञानावली समाप्ता ॥ १७ ॥

प्रश्नोत्तरमालिका ॥ १८ ॥ १ ॥

ॐ परमात्मने नमः ॥ कः खलु नालंक्रियते दृष्टादृष्टार्थसा-

धनपटीयान् । अनया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया॥१॥ भगवन्किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् । को गुरुरधिगततत्त्वः सत्त्वहितायोद्यतः सततम् ॥ २ ॥ त्वरितं किं कर्तव्यं सुधिया संसारसंततिच्छेदः । किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् ॥ ३ ॥ कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् । कः पण्डितो विवेकी किं विषमवधीरणा गुरुषु ॥ ४ ॥ किं संसारे सारं बहुशो विचिन्त्यमानमिदमेव । मनुजेषु दृष्टतत्त्वं स्वपरहितायोद्यतं जन्म ॥ ५ ॥ मदिरेव जनमोहकः कः स्नेहः के च दस्यवो विषयाः । का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः ॥ ६ ॥ कस्माद्भयमिह मरणादन्धादपि को विशिष्यते रागी । कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥ ७ ॥ पातुं कर्णाञ्जलिभिः किममृतमिव युज्यते सदुपदेशः । किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥ ८ ॥ किं गहनं स्त्रीचरितं कश्चतुरो यो न खण्डितस्तेन । किं दारिद्र्यमतोषः किं लाघवं परधनादिपरियाञ्चा ॥ ९ ॥ किं जीवितमनवद्यं किं जाड्यं पाटवेऽप्यनभ्यासः । को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥ १० ॥ नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः । के शशधरकरनिकरानुकारिणः सज्जना एव ॥ ११ ॥ को नरकः परवशता किं सौख्यं सर्वसङ्गविरतिर्या । किं साध्यं भूतहितं किमु प्रियं प्राणिनामसवः ॥ १२ ॥ किं दानमनाकाङ्क्षं किं मित्रं यन्निवर्तयति पापात् ॥ १३ ॥ कोऽलंकारः शीलं किं वाचां मण्डनं सत्यम् । किमनर्थफलं मानः सुसंगतिः का सुखावहा मैत्री ॥ १४ ॥ सर्वव्यसनविनाशे को दक्षः सर्वथापरित्यागी ।

कोऽन्धो योऽकार्यरतः को बधिरो यः शृणोति न हितानि ॥ १५ ॥ को मूको यः काले प्रियाणि वक्तुं न जानाति । किं मरणं मूर्खत्वं किमनर्घ्यं दत्तमवसरे यच्च ॥ १६ ॥ आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् । कुत्र विधेयो यत्नो विद्याभ्यासे सदौषधे दाने ॥ १७ ॥ अवधीरणा क्व कार्या खलपरयोषित्परधनेषु । काऽहर्निशमनुचिन्त्या संसारासारता न तु प्रमदा ॥ १८ ॥ का प्रेयसी विधेया करुणा दीनेषु सज्जने मैत्री । कण्ठगतैरप्यसुभिः कस्यात्मा न वश्यमुपयाति ॥१९॥ मूर्खस्य विषादवतो गर्ववतोऽपि च कृतघ्नस्य । कः पूज्यः सद्वृत्तः कमधममाचक्षते चलितवृत्तम् ॥ २० ॥ केन जितं जगदेतत्सत्यतितिक्षावता पुंसा । कुत्र विधेयो वासः सज्जननिकटेऽथवा काश्याम् ॥२१॥ कस्मै नमस्क्रिया स्याद्देवानामपि दयाप्रधानस्य । कस्मादुद्वेजितव्यं संसारारण्यतः सुधिया ॥ २२ ॥ कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य । क्व स्थातव्यं न्याय्ये पथि दृष्टार्थलाभाय ॥ २३ ॥ विद्युद्विलसितचपलं किं दुर्जनसंगतिर्युवतयश्च । कुलशीलनिष्प्रकम्पाः के कलिकालेऽपि सत्पुरुषाः ॥ २४ ॥ किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्यमौदार्यम् । तनुतरविभवस्य प्रभविष्णोर्वा किंच यत्सहिष्णुत्वम् ॥ २५ ॥ चिन्तामणिरिव दुर्लभमिह किं कथयामि चतुर्भद्रम् । किं तद्वदेति भूयो विधुततमसो विशेषेण ॥ २६ ॥ दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् । वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥ २७ ॥ इति कण्ठगता विमला प्रश्नोत्तररत्नमालिका येषाम् । तेऽमुक्ताभरणा अपि

विभान्ति विद्वत्समाजेषु ॥ २८ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता प्रश्नोत्तरमालिका संपूर्णा १८

प्रश्नोत्तरमालिका ॥ १८ ॥ २ ॥

ॐपरमात्मने नमः ॥ किं साध्यं मनुजानां बुद्धेः शुद्धत्वमेव बहुयत्नैः । किं त्याज्यं खलसङ्गो देहाहंकारममते च ॥१॥ किं तीर्थं वेदशिरः किं देयं यत्र आत्मसंबोधः । किं भोग्यं सहजसुखं किं वाऽभोग्यं परेच्छया लब्धम् ॥ २ ॥ किं कष्टं यत्सत्यं किं वा सहजं परं ब्रह्म । कर्तव्यं किं सर्वैरात्माऽकर्तेति बुद्धिरेव सदा ॥ ३ ॥ आदातुं संत्यक्तुं किमशक्यं ब्रह्म निजरूपम् । किं वा दुःखमबोधः किं सुखमात्मावबोधतः शान्तिः ॥ ४ ॥ विषमं विषं तु किं वा यत्किंचित्कस्यचिच्च या चिन्ता । परमामृतं तु किं वा श्रीगुरुवाक्यं कृपानिबिडम् ॥ ५ ॥ को गुरुरधिगन्तव्यो देशिकशिष्यत्वबाधबोधयिता । अध्येतव्यं किं खलु यावद्वेदार्थदर्शकः प्रणवः ॥ ६ ॥ कोऽनध्यायोऽध्ययने यावत्सद्गुरुमलब्धवांस्तावत् । कः प्रणवार्थस्तूर्णीं किं ध्येयं ध्येयमात्रसंत्यागः ॥७॥ कः शूरो दृश्यात्रान्मायाभेत्ता स्वयंप्रकाशज्ञः । किं चिन्त्यं मनुजैरिह चिन्तावीजं विचित्रजगत इति ॥ ८ ॥ किं पेशलं हि लोके विद्वच्चरितं विरुद्धशास्त्रमपि । सद्भक्त्या किं कार्यं सज्जनपदरजसि भूयमः स्नानम् ॥ ९ ॥ आनाल्यात्किं कार्यं निरहंकारेण साधुपदसेवा । भाग्योदयस्तु को वा गुरुवचनादद्वितीयपदलाभः ॥ १० ॥ मुक्तैः किं कर्तव्यं प्रारब्धाधीनसदसताभोगः । पुंसां किं सर्वस्वं सच्चित्सुखनामिका गुरोर्मूर्तिः ॥ ११ ॥ का कामधेनुरजधा वेदे देवे

तथा गुरौ श्रद्धा । को वैद्यो रोगहरो ब्रह्मिष्ठः सदयहृदयगुरु-राजः ॥ १२ ॥ कः पुत्रः स्वोद्धर्ता ज्ञातस्वात्मैव चिन्मयः पुरुषः। कः सुखशायी लोके संसृतिमिथ्यात्वपकमतितृप्तः॥१३॥ किं त्याज्यं साधुकृते चरिते कुत्सितमतिस्तु साधुजनैः । कः शत्रुर्दुःखकरो गुरुवचने संशयो महाशत्रुः ॥ १४ ॥ कः शोभते नितान्तं निस्पृहताशालिनिजबोधः । किं याच्य सद्गुरुषु स्वोद्धारः सर्वदैन्यपरिहारः ॥ १५ ॥ को वा मान्यः सिद्धो वालोऽपि ब्रह्मभावमतिमान्यः । का वा दरिद्रसीमा मूढप्रियसिद्ध्यहंकृतिः प्रोक्ता ॥ १६ ॥ किं सोढव्यं विदुषा खलवचनं विषविनिर्मितं कठिनम् । स्थेयं कथं खलेषु स्वीयां निष्ठां दृढं समाच्छाद्य ॥ १७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दसरस्वतीविरचिता प्रश्नोत्तरमालिका संपूर्णा ॥ १८ ॥ २ ॥

मणिरत्नमाला ॥ १९ ॥

ॐपरमात्मने नमः ॥ अपारसंसारसमुद्रमध्ये निमज्जतो मे शरणं किमस्ति । गुरो कृपालो कृपया वदैतद्विश्वेशपादांबुजदीर्घनौका ॥ १ ॥ बद्धो हि को यो विषयानुरागी को वा विमुक्तो विषये विरक्तः ।कोऽस्ति घोरो नरकः स्वदेहस्तृष्णाक्षयः स्वर्गपदं किमस्ति॥२॥संसारहृत्कस्तु निजात्मबोधः को मोक्षहेतुः प्रथितः स एव । द्वारं किमेकं नरकस्य नारी का स्वर्गदा प्राणभृतामहिंसा ॥ ३ ॥ शेते सुखं कस्तु समाधिनिष्ठो जागर्ति को वा सदसद्विवेकी। के शत्रवः सन्ति निजेन्द्रियाणि तान्येव मित्राणि जितानि कानि ॥ ४ ॥ को वा दरिद्रो हि विशालतृष्णः श्रीमांश्च को यस्य समस्ति तोषः । जीवन्मृतो कस्तु निरुद्यमो

यः को वाऽमृता स्यात्सुखदा निराशा ॥ ५ ॥ पाशो हि को यो ममताभिधानः संमोहयत्येव सुरेव का स्त्री । को वा महांधो मदनातुरो यो मृत्युश्च को वापयशः स्वकीयम् ॥ ६ ॥ को वा गुरुर्यो हि हितोपदेष्टा शिष्यस्तु को यो गुरुभक्त एव । को दीर्घरोगो भव एव साधो किमौषधं तस्य विचार एव ॥७॥ किं भूषणाद्भूषणमस्ति शीलं तीर्थं परं किं स्वमनो विशुद्धम् । किमत्र हेयं कनकं च कान्ता श्राव्यं सदा किं गुरुवेदवाक्यम् ॥ ८ ॥ के हेतवो ब्रह्मगतेस्तु सन्ति सत्संगतिर्दानविचारतोषाः । के सन्ति सन्तोऽखिलवीतरागा अपास्तमोहाः शिवतत्वनिष्ठाः ॥ ९ ॥ को वा ज्वरः प्राणभृतां हि चिन्ता मूर्खोऽस्ति को यस्तु विवेकहीनः । कार्या मया का शिवविष्णुभक्तिः किं जीवनं दोषविवर्जितं यत् ॥ १० ॥ विद्या हि का ब्रह्मगतिप्रदा या बोधो हि को यस्तु विमुक्तिहेतुः । को लाभ आत्मावगमो हि यो वै जितं जगत् केन मनो हि येन ॥ ११ ॥ शूरान्महाशूरतमोऽस्ति को वा मनोजबाणैर्व्यथितो न यस्तु । प्राज्ञोऽतिधीरश्च समोऽस्ति को वा प्राप्तो न मोहं ललनाकटाक्षैः ॥१२॥ विषाद्विषं किं विषयाः समस्ता दुःखी सदा को विषयानुरागी । धन्योऽस्ति को यस्तु परोपकारी कः पूजनीयो ननु तत्वनिष्ठः ॥ १३ ॥ सर्वास्ववस्थास्वपि किं न कार्यं किं वा विधेयं विदुषां प्रयत्नात् । स्नेहश्च पापं पठनं च धर्मः संसारमूलं हि किमस्ति चिन्ता ॥ १४ ॥ विज्ञान्महाविज्ञतमोऽस्ति को वा नार्या पिशाच्या न च वंचितो यः । का शृंखला प्राणभृतां च नारी दिव्यं व्रतं किं च निरस्तदैन्यम् ॥ १५ ॥ ज्ञातुं न शक्यं हि किमस्ति सर्वैर्योषिन्मनो यच्चरितं तदीयम् । का दुस्त्यजा सर्वजनैर्दुराशा

विद्याविहीनः पशुरस्ति को वा ॥ १६ ॥ वासो न संगः सह कैर्विधेयो मूर्खैश्च पापैश्च खलैश्च नीचैः । मुमुक्षुणा किं चरितं विधेयं सत्संगतिर्निर्ममतेशभक्तिः ॥ १७ ॥ लघुत्वमूलं च किमर्थितैव गुरुत्वबीजं यदयाचनं किम् । जातोस्ति को यस्य पुनर्न जन्म को वा मृतो यस्य पुनर्नमृत्युः ॥ १८ ॥ मूकोस्ति को वा बधिरश्च को वा युक्तं न वक्तुं समये समर्थः । तथ्यं सुपथ्यं न शृणोति वाक्यं *विश्वासपात्रं न किमस्ति नारी ॥१९॥* तत्त्वं किमेकं शिवमद्वितीयं किमुत्तमं सच्चरितं यदस्ति । किं कर्म कृत्वा न च शोचनीयः कामारिकंसारिसमर्चनाख्यम् ॥ २० ॥ शत्रोर्महाशत्रुतरोऽस्ति को वा कामः स कोपानृतलोभतृष्णः । न पूर्यते को विषयैः स एव किं दुःखमूलं ममताभिधानम् ॥ २१ ॥ किं मण्डनं साक्षरता मुखस्य सत्यं च किं भूतहितं तदेव । त्यक्त्वा सुखं किं स्त्रियमेव सम्यक् देयं परं किं त्वभयं सदैव ॥ २२ ॥ कस्यास्ति नाशे मनसो हि मोक्षः क सर्वथा नास्ति भयं विमुक्तौ । शल्यं परं किं निजमूर्खतैव के के उपास्या गुरवश्च वृद्धाः ॥ २३ ॥ उपस्थिते प्राणहरे कृतान्ते किमाशु कार्यं सुधिया प्रयत्नात् । वाक्कायचित्तैः सुखदं यमघ्नमुरारिपादांबुजमेव चिन्त्यम् ॥ २४ ॥ के दस्यवः सन्ति कुवासनाख्याः कः शोभते यः सदसि प्रविद्यः । शान्त्येव का या सुखदा सुविद्या किमेधते दानवशात् *सुविद्या ॥ २५ ॥* कुतो हि भीतिः सततं विधेया लोकापवादाद्भवकाननाच्च । को वास्ति बंधुः पितरौ च कौ वा विपत्सहायः परिपालकौ यौ ॥२६॥ बुद्ध्वा न बुद्धं परिशिष्यते किं शिवं प्रशांतं सुखबोधरूपम् । ज्ञाते तु कस्मिन्विदितं जगत्स्यात् सर्वात्मके ब्रह्मणि पूर्णरूपे

॥ २७ ॥ किं दुर्लभं सद्गुरुरस्ति लोके सत्संगतिर्ब्रह्मविचारणा च । त्यागो हि सर्वस्य निजात्मबोधः किं दुर्जयं सर्वजनैर्मनोजः ॥ २८ ॥ पशोः पशुः को न करोति धर्मं प्राधीतशास्त्रोऽपि न चात्मबोधः । किं तद्विषं भाति सुधोपमं स्त्री के शत्रवो मित्रवदात्मजाद्याः ॥ २९ ॥ विद्युच्चलं किं धनयौवनायुर्दानं परं किं च सुपात्रदत्तम् । कण्ठं गतैरप्यसुभिर्न कार्यं किं वा विधेयं मलिनं शिवार्चा ॥ ३० ॥ किं कर्म यत्प्रीतिकरं मुरारेः क्वास्था न कार्या सततं भवाब्धौ । अहर्निशं किं परिचिन्तनीयं संसारमिथ्यात्वशिवात्मतत्त्वम् ॥ ३१ ॥ कण्ठं गता वा श्रवणं गता वा प्रश्नोत्तराख्या मणिरत्नमाला । तनोतु मोदं विदुषां प्रयत्नात् रमेश गौरीशपदौ सुसेव्यौ ॥३२॥ इति श्रीमणिरत्नमाला संपूर्णा ॥ १९ ॥

कौपीनपञ्चकस्तोत्रम् ॥ २० ॥

ॐपरमात्मने नमः॥ वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः । अशोकवन्तः करुणैकवन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥ मूलं तरोः केवलमाश्रयन्तः पाणिद्वये भोक्तुममत्रयन्तः । कन्थामपि स्त्रीमिव कुत्सयन्तः कौपीनवन्तः ख० ॥ २ ॥ देहाभिमानं परिहृत्य दूरादात्मानमात्मन्यवलोकयन्तः । अहर्निशं ब्रह्मणि ये रमन्तः कौपीनवन्तः ख० ॥ ३ ॥ स्वानन्दभावे परितुष्टिमन्तः स्वशान्तसर्वेन्द्रियवृत्तिमन्तः । नान्तं न मध्यं न बहिः स्मरन्तः कौपीनवन्तः ख० ॥ ४ ॥ पञ्चाक्षरं पावनमुच्चरन्तः पतिं पशूनां हृदि भावयन्तः। भिक्षाशना दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु भाग्य-

वन्तः ॥ ५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं कौपीनपञ्चकस्तोत्रं संपूर्णम् ॥ २० ॥

हस्तामलकस्तोत्रम् ॥ २१ ॥

ॐपरमात्मने नमः ॥ कस्त्वं शिशो कस्य कुतोऽसि गन्ता किं नाम ते त्वं कुत आगतोऽसि । एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्धनोऽसि ॥ १ ॥ हस्तामलक उवाच ॥ नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः । न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥ २ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाशकल्पः । रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि । प्रवर्तन्त आश्रित्य निष्कम्पमेकं स नित्यो० ॥ ४ ॥ मुखाभासको दर्पणे दृश्यमानो मुखत्वात्पृथक्त्वेन नैवास्ति वस्तु । चिदाभासको धीषु जीवोऽपि तद्वत्स नित्यो० ॥ ५ ॥ यथा दर्पणाभाव आभासहानौ मुखं विद्यते कल्पनाहीनमेकम् । तथा धीवियोगे निराभासको यः स नित्यो० ॥ ६ ॥ मनश्चक्षुरादेर्वियुक्तः स्वयं यो मनश्चक्षुरादेर्मनश्चक्षुरादिः । मनश्चक्षुरादेरगम्यस्वरूपः स नित्यो० ॥ ७ ॥ य एको विभाति स्वतः शुद्धचेताः प्रकाशस्वरूपोऽपि नानेव धीषु । शरावोदकस्थो यथा भानुरेकः स नित्यो० ॥ ८ ॥ यथाऽनेकचक्षुः प्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् । अनेका धियो यस्तथैकः प्रबोधः स नित्यो० ॥ ९ ॥ विवस्वत्प्रभातं यथारूपमक्षं प्रगृह्णाति नाभातमेवं विवस्वान् । यदाभात आभासयत्यक्षमेकः स

नित्यो० ॥ १० ॥ यथा सूर्य एकोऽप्स्वनेकश्चलासु स्थिरास्वप्य-
नन्यद्विभाव्यस्वरूपः । चलासु प्रभिन्नाः सुधीष्वेक एव स
नित्यो० ॥ ११ ॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं
मन्यते चातिमूढः । तथा बद्धवद्भाति यो मूढदृष्टेः स नित्यो०
॥ १२ ॥ समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न
स्पृशन्ति । वियद्वत्सदा शुद्धमच्छस्वरूपं स नित्यो० ॥ १३ ॥
उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेऽपि ।
यथा चन्द्रिकाणां जले चञ्चलत्वं तथा चञ्चलत्वं तवापीह
विष्णो ॥ १४ ॥ इति श्रीमच्छंकराचार्यविरचितं हस्तामलक-
संवादस्तोत्रं संपूर्णम् ॥ २१ ॥

वाक्यवृत्तिः ॥ २२ ॥

ॐपरमात्मने नमः॥ सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वे-
श्वरं विदितविश्वमनन्तमूर्तिम् । निर्मुक्तबन्धनमपारसुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥१॥ यस्य प्रसादादहमेव वि-
ष्णुर्मय्येव सर्वं परिकल्पितं च । इत्थं विजानामि सदात्मरूपस्त-
स्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥ २ ॥ तापत्रयार्कसंतप्तः
कश्चिदुद्विग्नमानसः । शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति
॥ ३ ॥ अनायासेन येनास्मान्मुच्येयं भवबन्धनात् । तन्मे
संक्षिप्य भगवन्कैवल्यं कृपया वद ॥ ४ ॥ साध्वी ते वचन-
व्यक्तिः प्रतिभाति वदामि ते । इदं तदिति विस्पष्टं सावधा-
नमनाः शृणु ॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्म-
नोः । तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥ ६ ॥ को

जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः । तत्त्वमस्यादि-
वाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥ अत्र ब्रूमः समाधानं
कोऽन्यो जीवस्त्वमेव हि । यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवासि
न संशयः ॥ ८ ॥ पदार्थमेव जानामि नाद्यापि भगवन् स्फुट-
म् । अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥ सत्य-
माह भवानत्र विज्ञानं नैव विद्यते । हेतुः पदार्थबोधो हि वा-
क्यार्थावगतेरिह ॥ १० ॥ अन्तःकरणतद्वृत्तिसाक्षी चैतन्यवि-
ग्रहः । आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे ॥ ११ ॥
सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहम् । चिन्तयात्मतया
नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥ रूपादिमान्यतः
पिण्डस्ततो नात्मा घटादिवत् । वियदादिमहाभूतविकारत्वाच्च
कुम्भवत् ॥ १३ ॥ अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः ।
करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४ ॥ घटद्रष्टा घटा-
द्भिन्नः सर्वथा न घटो यथा । देहद्रष्टा तथा देहो नाहमित्य-
वधारय ॥ १५ ॥ एवमिन्द्रियदृङ्नाहमिन्द्रियाणीति निश्चिनु ।
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥ संघातो हि
तथा नाहमिति दृश्यविलक्षणम् । द्रष्टारमनुमानेन निपुणं संप्र-
धारय ॥ १७ ॥ देहेन्द्रियादयो भावा हानादिव्यापृतिक्षमाः ।
यस्य सन्निधिमात्रेण सोऽहमित्यवधारय ॥ १८ ॥ अनापन्न-
विकारः सन्नयस्कान्तवदेव यः । बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽ-
हमित्यवधारय ॥ १९ ॥ अजडात्मवदाभान्ति यत्सान्निध्या-
ज्जडा अपि । देहेन्द्रियमनःप्राणाः सोऽहमित्यवधारय ॥ २० ॥
अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम् । एवं यो वेत्ति
धीवृत्तिं सोऽहमित्यवधारय ॥ २१ ॥ स्वप्नजागरिते सुप्तिं भावा-

भावौ धियां तथा । यो चेच्यविक्रियः साक्षात्सोऽहमित्यवधारय ॥ २२ ॥ घटावभासको दीपो घटादन्यो यथेष्यते । देहावभासको देही तथाहं बोधविग्रहः ॥ २३ ॥ पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः । द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय ॥ २४ ॥ परप्रेमास्पदतया मा न भूवमहं सदा । भूयासमिति यो द्रष्टा सोऽहमित्यवधारय ॥ २५ ॥ यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते । साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मनः ॥ २६ ॥ देहेन्द्रियमनःप्राणाहंकृतिभ्यो विलक्षणः । प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥ २७ ॥ त्वमर्थमेवं निश्चित्य तदर्थं चिन्तयेत्पुनः । अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८ ॥ निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः । अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९ ॥ निरस्तातिशयानन्दः सत्यप्रज्ञानविग्रहः । सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥ ३० ॥ सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता । वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥ यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम् । मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय ॥ ३२ ॥ यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ । तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥ विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः । समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥ जीवात्मना प्रवेशश्च नियन्तृत्वं च तान् प्रति । श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥ कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ । जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥ तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना । तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः ॥ ३७ ॥

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः । अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८ ॥ प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः । अद्वयानन्दरूपश्च प्रत्यग्बोधकलक्षणः ॥ ३९ ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् । अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु । पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥ तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने । लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥ हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने । यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥ आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः । अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥४४॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः । पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥ प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता । विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥ ४६ ॥ मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे । मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥४७॥ तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा । सोऽहमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ४८ ॥ अहंब्रह्मेतिवाक्यार्थबोधो यावद्दृढीभवेत् । शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥ ४९ ॥ श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् । निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ ५० ॥ विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः । विमुक्तकर्मनिगडः सद्य एव विमुच्यते ॥ ५१ ॥ प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् । किंचित्कालमनारब्धकर्मबन्धस्य संक्षये ॥ ५२ ॥ निरस्तातिशयानन्दं वैष्णवं परमं पदम् । पुनरावृत्तिरहितं कैवल्यं

प्रतिपद्यते ॥ ५३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता वाक्यवृत्तिः समाप्ता ॥ २२ ॥

परापूजा ॥ २३ ॥

ॐ परमात्मने नमः ॥ पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम्। स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥ १ ॥ निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च । निरालम्बस्योपवीतं पुष्पं निर्वासनस्य च ॥ २ ॥ निर्लेपस्य कुतो गन्धो रम्यस्याभरणं कुतः। नित्यतृप्तस्य नैवेद्यस्ताम्बूलं च कुतो विभोः ॥ ३ ॥ प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः। वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥ ४ ॥ स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः। अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ॥५॥ एवमेव परा पूजा सर्वावस्थासु सर्वदा । एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥ ६ ॥ इति परापूजा समाप्ता ॥ २३ ॥

हरिमीडेस्तोत्रम् ॥ २४ ॥

ॐ परमात्मने नमः॥ स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थम्। यस्मिन् दृष्टे नश्यति तत्संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे ॥ १ ॥ यस्यैकांशादित्थमशेषं जगदेतत्प्रादुर्भूतं येन पिनद्धं पुनरित्थम्। येन व्याप्तं येन विबुद्धं सुखदुःखैस्तं संसार० ॥ २ ॥ सर्वज्ञो यो यश्च हि सर्वः सकलो यो यश्चानन्दोऽनन्तगुणो यो गुणधामा। यश्चाव्यक्तो व्यस्तसमस्तः सदसद्यस्तं संसार० ॥ ३ ॥ यस्मा-

दन्यश्चास्त्यपि नैनं परमार्थं दृश्यादन्यो निर्विषयज्ञानमयत्वात् । ज्ञातृज्ञानज्ञेयविहीनोऽपि सदा ज्ञस्तं संसार० ॥ ४ ॥ आचार्येभ्यो लब्धसुसूक्ष्माच्युततत्त्वा वैराग्येणाभ्यासबलाच्चैव द्रढिम्ना । भक्त्यैकाग्र्यध्यानपरा यं विदुरीशं तं संसार० ॥ ५ ॥ प्राणानायम्योमिति चित्तं हृदि रुद्ध्वा नान्यन्स्मृत्वा तत्पुनरत्रैव विलाप्य । क्षीणे चित्ते भादृशिरस्मीति विदुर्यं तं संसार० ॥ ६ ॥ यं ब्रह्माख्यं देवमनन्यं परिपूर्णं हृत्स्थं भक्तैर्लभ्यमजं सूक्ष्ममतर्क्यम् । ध्यात्वाऽऽत्मस्थं ब्रह्मविदो यं विदुरीशं तं संसार०॥७॥ मात्रातीतं स्वात्मविकाशात्मविबोधं ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यम् । भावग्राह्यानन्दमनन्यं च विदुर्यं तं संसार० ॥ ८ ॥ यद्यद्वेद्यं वस्तु सतत्त्वं विषयाख्यं तत्तद्ब्रह्मैवेति विदित्वा तदहं च । ध्यायंत्येवं यं सनकाद्या मुनयोऽजं तं संसार० ॥ ९ ॥ यद्यद्वेद्यं तत्तदहं नेति विहाय स्वात्मज्योतिर्ज्ञानमयानन्दमवाप्य । तस्मिन्नस्मीत्यात्मविदो यं विदुरीशं तं संसार० ॥ १० ॥ हित्वा हित्वा दृश्यमशेषं सविकल्पं मत्वा शिष्टं भादृशिमात्रं गगनाभम् । त्यक्त्वा देहं यं प्रविशन्त्यच्युतभक्तास्तं संसार० ॥ ११ ॥ सर्वत्रास्ते सर्वशरीरी न च सर्वः सर्वं वेत्त्येवेह न यं वेत्ति च सर्वः । सर्वत्रान्तर्यामितयेत्थं यमनन्यस्तं संसार० ॥ १२ ॥ सर्वं दृष्ट्वा स्वात्मनि युक्त्वा जगदेतद्दृष्ट्वात्मानं चैवमजं सर्वजनेषु । सर्वात्मैकोऽस्मीति विदुर्यं जनहृत्स्थं तं संसार० ॥ १३ ॥ सर्वत्रैकः पश्यति जिघ्रत्यथ भुङ्क्ते प्रष्टा श्रोता बुद्ध्यति चेत्याहुरिमं यम् । साक्षी चास्ते कर्तृषु पश्यन्निति चान्ये तं संसार० ॥ १४ ॥ पश्यन् शृण्वन्नत्र विजानन्रसयन् सन् जिघ्रन्बिभ्रद्देहमिमं जीवतयेत्थम् । इत्यात्मानं यं विदुरीशं विषयज्ञं

तं संसार० ॥१५॥ जाग्रद्दृष्ट्वा स्थूलपदार्थानथ मायां दृष्ट्वा स्वप्नेऽथापि सुषुप्तौ सुखनिद्राम् । इत्यात्मानं वीक्ष्य मुदास्ते च तुरीये तं संसार० ॥ १६ ॥ पश्यन् शुद्धोऽप्यक्षर एको गुणभेदान्नानाकारान् स्फाटिकवद्भाति विचित्रः । भिन्नश्छिन्नश्चायमजः कर्मफलैर्यस्तं संसार० ॥ १७ ॥ ब्रह्मा विष्णू रुद्रहुताशौ रविचन्द्राविन्द्रो वायुर्यज्ञ इतीत्थं परिकल्प्य । एकं सन्तं यं बहुधा दुर्मतिभेदात्तं संसार० ॥ १८ ॥ सत्यं ज्ञानं शुद्धमनन्तं व्यतिरिक्तं शान्तं गूढं निष्कलमानन्दमनन्यम् । इत्याहादौ यं वरुणोऽसौ भृगवेऽजं तं संसार०॥ १९ ॥ कोशानेतान्पञ्चरसादीनतिहाय ब्रह्मासीति स्वात्मनि निश्चित्य दृशिस्थः । पित्रादिष्टो वेद भृगुर्यं यजुरन्ते तं संसार० ॥२०॥ येनाविष्टो यस्य च शक्त्या यदधीनः क्षेत्रज्ञोऽयं कारयिता जन्तुषु कर्तुः । कर्ता भोक्ताऽऽत्माऽत्र हि चिच्छक्त्यधिरूढस्तं संसार० ॥ २१ ॥ सृष्ट्वा सर्वं स्वात्मतयैवेत्थमतर्क्यं व्याप्याथान्तः कृत्स्नमिदं सृष्टमशेषम् । सच्च त्यच्चाभूत्परमात्मा स य एकस्तं संसार० ॥ २२ ॥ वेदान्तैश्चाध्यात्मिकशास्त्रैश्च पुराणैः शास्त्रैश्चान्यैः सात्वततन्त्रैश्च यमीशम् । दृष्ट्वाथान्तश्चेतसि बुद्ध्या विविशुर्यं तं संसार० ॥२३॥ श्रद्धाभक्तिध्यानशमाद्यैर्यतमानैर्ज्ञातुं शक्यो देव इहैवाशु य ईशः । दुर्विज्ञेयो जन्मशतैश्चापि विना तैस्तं संसार० ॥२४॥ यस्मातर्क्यं स्वात्मविभूतेः परमार्थं सर्वं खल्वित्यत्र निरुक्तं श्रुतिविद्भिः । तज्जातित्वादब्धितरङ्गाभमभिन्नं तं संसार० ॥ २५ ॥ दृष्ट्वा गीतास्वक्षरतत्त्वं विधिनाजं भक्त्या गुर्व्यालभ्य हृदिस्थं दृशिमात्रम् । ध्यात्वा तस्मिन्नस्म्यहमित्यत्र विदुर्यं तं संसार० ॥ २६ ॥ क्षेत्रज्ञत्वं प्राप्य

विभुः पञ्चमुखैर्यो भुङ्क्तेऽजस्रं भोग्यपदार्थान्प्रकृतिस्थः । क्षेत्रे क्षेत्रेऽम्बिन्दुवदेको बहुधाऽऽस्ते तं संसार० ॥ २७ ॥ युक्त्यालोच्य व्यासवचांस्यत्र हि लभ्यः क्षेत्रक्षेत्रज्ञान्तरविद्भिः पुरुषाख्यः । योऽहं सोऽसौ सोऽस्म्यहमेवेति विदुर्यं तं संसार० ॥ २८ ॥ एकीकृत्यानेकशरीरस्थमिमं ज्ञं यं विज्ञायेहैव स एवाशु भवन्ति । यस्मिँल्लीना नेह पुनर्जन्म लभन्ते तं संसार० ॥ २९ ॥ द्वन्द्वैकत्वं यच्च मधुब्राह्मणवाक्यैः कृत्वा शक्रोपासनमासाद्य विभूत्या । योऽसौ सोऽहं सोऽस्म्यहमेवेति विदुर्यं तं संसार० ॥३०॥ योऽयं देहे चेष्टयितान्तःकरणस्थः सूर्ये चासौ तापयिता सोऽस्म्यहमेव । इत्यात्मैक्योपासनया यं विदुरीशं तं संसार० ॥ ३१ ॥ विज्ञानांशो यस्य सतः शक्त्यधिरूढो बुद्धिर्बुद्ध्यत्यत्र बहिर्बोध्यपदार्थान् । नैवान्तस्थं बुद्ध्यति यं बोधयितारं तं संसार० ॥ ३२ ॥ कोऽयं देहे देव इतीत्थं सुविचार्य ज्ञाता श्रोताऽऽनन्दयिता चैष हि देवः । इत्यालोच्य ज्ञांशमिहासीति विदुर्यं तं संसार० ॥ ३३ ॥ को ह्येवान्यादात्मनि न स्यादयमेष ह्येवानन्दः प्राणिति चापानिति चेति । इत्यस्तित्वं वक्त्युपपत्त्या श्रुतिरेषा तं संसार० ॥ ३४ ॥ प्राणो वाहं वाक्श्रवणादीनि मनो वा बुद्धिर्वाहं व्यस्त उताहोपि समस्तः । इत्यालोच्य ज्ञप्तिरिहासीति विदुर्यं तं संसार० ॥ ३५ ॥ नाहं प्राणो नैव शरीरं न मनोऽहं नाहं बुद्धिर्नाहमहंकारधियौ च । योऽत्र ज्ञांशः सोऽस्म्यहमेवेति विदुर्यं तं संसार० ॥ ३६ ॥ सत्तामात्रं केवलविज्ञानमजं सत् सूक्ष्मं नित्यं तत्त्वमसीत्यात्मसुताय । नाम्नामन्ते प्राह पिता यं विभुमाद्यं तं संसार०॥३७॥ मूर्तामूर्ते पूर्वमपोह्याथ समाधौ दृश्यं सर्वं नेति च नेतीति

विहाय । चैतन्यांशे स्वात्मनि सन्तं च विदुर्यं तं संसार०॥३८॥ ओतं प्रोतं यत्र च सर्वं गगनान्तं यो स्थूलानण्वादिषु सिद्धोऽक्षरसंज्ञः । ज्ञाताऽतोऽन्यो नेत्युपलभ्यो न च वेद्यस्तं संसार० ॥ ३९ ॥ तावत्सर्वं सत्यमिवाभाति यदेतद्यावत्सोऽस्मीत्यात्मनि यो ज्ञो नहि दृष्टः। दृष्टे तस्मिन् सर्वमसत्यं भवतीदं तं संसार० ॥ ४० ॥ रागामुक्तं लोहयुतं हेम यथाऽग्नौ योगाष्टाङ्गैरुज्ज्वलितज्ञानमयाग्नौ । दग्ध्वात्मानं ज्ञं परिशिष्टं च विदुर्यं तं संसार० ॥ ४१ ॥ यं विज्ञानज्योतिषमाद्यं सुविभागं हृदयर्केन्द्वग्न्योकसमीड्यं तडिदाभम् । भक्त्याराध्येहैव विशन्त्यात्मनि सन्तं तं संसार० ॥ ४२ ॥ पायाद्भक्तं स्वात्मनि सन्तं पुरुषं यो भक्त्या स्तौतीत्याङ्गिरसं विष्णुरिमं माम् । इत्यात्मानं स्वात्मनि संहृत्य सदैकस्तं संसार० ॥ ४३ ॥ इत्थं स्तोत्रं भक्तजनेड्यं भवभीतिध्वान्तार्काभं भगवत्पादीयमिदं यः । विष्णोर्लोकं पठति शृणोति व्रजति ज्ञो ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः ॥ ४४ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं हरिमीडेस्तोत्रं समाप्तम् ॥ २४ ॥

तत्त्वबोधः ॥ २५ ॥

ॐ परमात्मने नमः ॥ वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ॥ मुमुक्षूणां हितार्थाय तत्त्वबोधोभिधीयते ॥ १ ॥ साधनचतुष्टयसंपन्नाऽधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः ॥ २ ॥ साधनचतुष्टयं किम् ॥ नित्यानित्यवस्तुविवेकः (१) इहामुत्रार्थफलभोगविरागः (२) शमादिषट्संपत्तिः (३) मुमुक्षुत्वं चेति (४) ॥ ३ ॥ नित्यानित्य-

वस्तुविवेकः कः । नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यं । अयमेव नित्यानित्यवस्तुविवेकः ॥ ४ ॥ विरागः कः । इह स्वर्गभोगेषु इच्छाराहित्यम् ॥ ५ ॥ शमादिसाधनसंपत्तिः का । शमो दम उपरमस्तितिक्षा श्रद्धा समाधानं चेति ॥ ६ ॥ शमः कः । मनोनिग्रहः । दमः कः । चक्षुरादिबाह्येन्द्रियनिग्रहः । उपरमः कः । स्वधर्मानुष्ठानमेव । तितिक्षा का । शीतोष्णसुखदुःखादिसहिष्णुत्वम् । श्रद्धा कीदृशी । गुरुवेदान्तवाक्यादिषु विश्वासः श्रद्धा । समाधानं किम् । चित्तैकाग्रता ॥ मुमुक्षुत्वं किम् । मोक्षो मे भूयादितीच्छा ॥ ७ ॥ एतत्साधनचतुष्टयं ॥ ततस्तत्त्वविवेकस्याधिकारिणो भवंति । तत्त्वविवेकः कः । आत्मा सत्यस्तदन्यत् सर्वं मिथ्येति ॥ ८ ॥ आत्मा कः स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पंचकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानंदस्वरूपः सन् यस्तिष्ठति स आत्मा ॥ ९ ॥ स्थूलशरीरं किम् । पंचीकृतपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं शरीरं अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्विकारवदेतत्स्थूलशरीरम् ॥ १० ॥ सूक्ष्मशरीरं किम् । अपंचीकृतपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगसाधनं पंचज्ञानेन्द्रियाणि पंच कर्मेन्द्रियाणि पंचप्राणादयः मनश्चैकं बुद्धिश्चैका एवं सप्तदशकलाभिः सह यत्तिष्ठति तत्सूक्ष्मशरीरम् ॥ ११ ॥ श्रोत्रं त्वक् चक्षुः रसना घ्राणं इति पंच ज्ञानेन्द्रियाणि । श्रोत्रस्य दिग्देवता । त्वचो वायुः । चक्षुषः सूर्यः । रसनाया वरुणः । घ्राणस्य अश्विनौ इति ज्ञानेन्द्रियदेवताः । श्रोत्रस्य विषयः शब्दग्रहणम् । त्वचो विषयः स्पर्शग्रहणम् । चक्षुषो विषयः रूपग्रहणम् । रसनाया

विषयः रसग्रहणम् । घ्राणस्य विषयो गंधग्रहणम् इति ॥ १२ ॥ वाक्पाणिपादपायूपस्थानीति पंचकर्मेंद्रियाणि ॥ वाचो देवता वह्निः । हस्तयोरिंद्रः । पादयोर्विष्णुः । पायोर्मृत्युः । उपस्थस्य प्रजापतिः इति कर्मेन्द्रियदेवताः ॥ वाचो विषयः भाषणम् । पाण्योर्विषयः वस्तुग्रहणम् । पादयोर्विषयः गमनम् । पायोर्विषयः मलत्यागः । उपस्थस्य विषयः आनंद इति ॥ कारणशरीरं किम् । अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं सत् स्वस्वरूपाज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरम् ॥ १३ ॥ अवस्थात्रयं किम् । जाग्रत्स्वप्नसुषुप्त्यवस्थाः ॥ १४ ॥ जाग्रदवस्था का । श्रोत्रादिज्ञानेंद्रियैः शब्दादिविषयैश्च ज्ञायते इति यत् सा जाग्रदवस्था । स्थूलशरीराभिमानी आत्मा विश्व इत्युच्यते ॥ १५ ॥ स्वप्नावस्था केति चेत् । जाग्रदवस्थायां यत् दृष्टं यच्छ्रुतं तज्जनितवासनया निद्रासमये यः प्रपंचः प्रतीयते सा स्वप्नावस्था । सूक्ष्मशरीराभिमानी आत्मा तैजस इत्युच्यते ॥ १६ ॥ अतः सुषुप्त्यवस्था का । अहं किमपि न जानामि सुखेन मया निद्रानुभूयत इति सुषुप्त्यवस्था । कारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते ॥ १७ ॥ पंच कोशाः के । अन्नमयः प्राणमयः मनोमयः विज्ञानमयः आनंदमयश्चेति ॥ १८ ॥ अन्नमयः कः । अन्नरसेनैव भूत्वा अन्नरसेनैव वृद्धिं प्राप्य अन्नरूपपृथिव्यां यद्विलीयते तदन्नमयः कोशः । स्थूलशरीरम् ॥ १९ ॥ प्राणमयः कः । प्राणादिपंचवायवः ॥ वागादींद्रियपंचकं प्राणमयः ॥ २० ॥ मनोमयः कोशः कः । मनश्च ज्ञानेंद्रियपंचकं मिलित्वा भवति स मनोमयः कोशः ॥ २१ ॥ विज्ञानमयः कः । बुद्धिज्ञानेन्द्रियपंचकं

मिलिता यो भवति स विज्ञानमयः कोशः ॥ २२ ॥ आनंदमयः कः । एवमेव कारणशरीरभूताविद्यास्थमलिनसत्त्वं प्रियादिवृत्तिसहितं सत् आनंदमयः कोशः । एतत्कोशपंचकम् । मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीयं ज्ञानमिति स्वेनैव ज्ञायते । तद्यथा मदीयत्वेन ज्ञातं कटककुंडलगृहादिकं स्वस्माद्भिन्नं तथा पंचकोशादिकं मदीयत्वेन ज्ञातमात्मा न भवति ॥ २३ ॥ आत्मा तर्हि कः । सच्चिदानंदस्वरूपः ॥ २४ ॥ सत्किं । कालत्रयेऽपि तिष्ठतीति सत् ॥ चित्किं । ज्ञानस्वरूपः ॥ आनंदः कः । सुखस्वरूपः ॥ एवं सच्चिदानंदस्वरूपं स्वात्मानं विजानीयात् ॥ २५ ॥ अथ चतुर्विंशतितत्त्वोत्पत्तिप्रकारं वक्ष्यामः ॥ २६ ॥ ब्रह्माश्रया सत्त्वरजस्तमोगुणात्मिका माया अस्ति । तत आकाशः संभूतः । आकाशाद्वायुः । वायोस्तेजः । तेजस आपः । अद्भ्यः पृथिवी ॥ २७ ॥ एतेषां पंचतत्त्वानां मध्ये आकाशस्य सात्त्विकांशात् श्रोत्रेंद्रियं संभूतम् । वायोः सात्त्विकांशात् त्वगिंद्रियं संभूतम् । अग्नेः सात्त्विकांशात् चक्षुरिंद्रियं संभूतम् । जलस्य सात्त्विकांशात् रसनेंद्रियं संभूतम् । पृथिव्याः सात्त्विकांशात् घ्राणेंद्रियं संभूतम् । एतेषां पंचतत्त्वानां समष्टिसात्त्विकांशात् मनोबुद्ध्यहंकारचित्तांतःकरणानि संभूतानि ॥ २८ ॥ संकल्पविकल्पात्मकं मनः । निश्चयात्मिका बुद्धिः । अहंकर्ता अहंकारः । चिंतनकर्तृ चित्तम् । मनसो देवता चंद्रमा । बुद्धेर्ब्रह्मा । अहंकारस्य रुद्रः । चित्तस्य वासुदेवः ॥ २९ ॥ एतेषां पंचतत्त्वानां मध्ये आकाशस्य राजसांशात् वागिंद्रियं संभूतम् । वायो राजसांशात् पाणींद्रियं संभूतम् । वह्नेः राजसांशात् पादेंद्रियं संभू-

तम् । जलस्य राजसांशात् उपस्थेंद्रियं संभूतम् । पृथिव्या राजसांशात् गुदेंद्रियं संभूतम् । एतेषां समष्टिराजसांशात् पंचप्राणाः संभूताः ॥ ३० ॥ एतेषां पंचतत्त्वानां तामसांशात् पंचीकृतपंचतत्त्वानि भवंति । पंचीकरणं कथं इति चेत् । एतेषां पंचमहाभूतानां तामसांशस्वरूपं एकं एकं भूतं द्विधा विभज्य एकं एकमर्धं पृथक् तूष्णीं व्यवस्थाप्य अपरं अपरं अर्धं चतुर्धा विभज्य स्वार्धमन्येषु अर्धेषु स्वभागचतुष्टयसंयोजनं कार्यं । तदा पंचीकरणं भवति । एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः स्थूलशरीरं भवति । एवं पिंडब्रह्मांडयोरैक्यं संभूतम् ॥ ३१ ॥ स्थूलशरीराभिमानी जीवनामकं ब्रह्मप्रतिबिंबं भवति । स एव जीवः प्रकृत्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति । अविद्योपाधिः सन् आत्मा जीव इत्युच्यते ॥ ३२ ॥ मायोपाधिः सन् ईश्वर इत्युच्यते । एवं उपाधिभेदाज्जीवेश्वरभेददृष्टिर्यावत्पर्यंतं तिष्ठति तावत्पर्यंतं जन्ममरणादिरूपसंसारो न निवर्तते तस्मात्कारणान्न जीवेश्वरयोर्भेदबुद्धिः स्वीकार्या ॥३३॥ ननु साहंकारस्य किंचिज्ज्ञस्य जीवस्य निरहंकारस्य सर्वज्ञस्येश्वरस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः स्यादुभयोः विरुद्धधर्माक्रान्तत्वात् ॥ ३४ ॥ इति चेन्न स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्यार्थः । उपाधिविनिर्मुक्तं समाधिदशासंपन्नं शुद्धं चैतन्यं त्वंपदलक्ष्यार्थः ॥ ३५ ॥ एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्पदवाच्यार्थः ॥ उपाधिशून्यं शुद्धचैतन्यं तत्पदलक्ष्यार्थः ॥ एवं च जीवेश्वरयोः चैतन्यरूपेणाऽभेदे बाधकाभावः ॥ ३६ ॥ एवं च वेदान्तवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ता इत्यर्थः ॥ ३७ ॥

ननु जीवन्मुक्तः कः ? यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति दृढनिश्चयस्तथा नाहं ब्राह्मणः न शूद्रः न पुरुषः किंतु असंगः सच्चिदानंदस्वरूपः प्रकाशरूपः सर्वांतर्यामी चिदाकाशरूपोऽस्मीति दृढनिश्चयरूपाऽपरोक्षज्ञानवान् जीवन्मुक्तः ॥ ३८ ॥ ब्रह्मैवाहमस्मीत्यपरोक्षज्ञानेन निखिलकर्मबंधविनिर्मुक्तः स्यात् ॥ कर्माणि कतिविधानि संतीति चेत् *आगामिसंचितप्रारब्धभेदेन त्रिविधानि संति ॥ ३९ ॥* ज्ञानोत्पत्त्यनंतरं ज्ञानिदेहकृतं पुण्यपापरूपं कर्म यदस्ति तदागामीत्यभिधीयते ॥ ४० ॥ संचितं कर्म किम् । अनंतकोटिजन्मनां बीजभूतं सत् यत्कर्मजातं पूर्वार्जितं तिष्ठति तत्संचितं ज्ञेयम् ॥ ४१ ॥ प्रारब्धकर्म किमिति चेत् । इदं शरीरमुत्पाद्य इह लोके एवं सुखदुःखादिप्रदं यत्कर्म तत्प्रारब्धं भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षय इति ॥ ४२ ॥ संचितं कर्म ब्रह्मैवाहमिति निश्चयात्मकज्ञानेन नश्यति । आगामि कर्म अपि ज्ञानेन नश्यति । किंच आगामिकर्मणां नलिनीदलगतजलवत् ज्ञानिनां संबंधो नास्ति ॥ ४३ ॥ किंच ये ज्ञानिनं स्तुवंति भजंति अर्चयंति तान्प्रति ज्ञानिकृतम् आगामि पुण्यं गच्छति। ये ज्ञानिनं निंदंति द्विषंति दुःखप्रदानं कुर्वंति तान्प्रति ज्ञानिकृतं सर्वं आगामि क्रियमाणं यदवाच्यं कर्म पापात्मकं तद्गच्छति ॥ ४४ ॥ तथा चात्मवित्संसारं तीर्त्वा ब्रह्मानंदं इहैव प्राप्नोति । तरति शोकमात्मविदिति श्रुतेः ॥ ४५ ॥ तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ॥ ज्ञानसंप्राप्तिसमये मुक्तोऽसौ विगताशयः ॥ इति स्मृतेश्च ॥ ४७ ॥ इति श्रीमच्छंकराचार्यविरचितस्तत्त्वबोधः समाप्तः ॥ २५ ॥

आत्मबोधः ॥ २६ ॥

ॐ परमात्मने नमः ॥ तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् । मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् । पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥ अविरोधितया कर्म नाविद्यां विनिवर्तयेत् । विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥ परिच्छिन्नमिवाज्ञानात्तन्नाशे सति केवलः । स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥ ४ ॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्वि निर्मलम् । कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥५॥ संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः । स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा । यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥ ७ ॥ सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः । व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ८ ॥ यथाकाशो हृषीकेशो नानोपाधिगतो विभुः । तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः ॥ ९ ॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः । आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ १० ॥ पञ्चीकृतमहाभूतसंभवं कर्मसंचितम् । शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥ पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १२ ॥ अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते । उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १३ ॥ पञ्चकोशादियोगेन तत्तन्मय इव स्थितः । शुद्धात्मा नीलवस्त्रादियोगेन स्फ-

टिको यथा ॥ १४ ॥ वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः । आत्मानमन्तरं शुद्धं विविच्यात्तन्दुलं यथा ॥ १५ ॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते । बुद्धावेवावभासेत स्वच्छेषु प्रतिबिम्बवत् ॥ १६ ॥ देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् । तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १७॥ व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनाम् । दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १८ ॥ आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः । स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ १९ ॥ देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि । अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २० ॥ अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि । कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाम्भसः ॥ २१ ॥ रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते । सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २२ ॥ प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता । स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः ॥ २३ ॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम् । संयोज्य चाविवेकेन जानामीति प्रवर्तते॥२४॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति । जीवः सर्वमलं ज्ञात्वा कर्ता द्रष्टेति मुह्यति ॥ २५ ॥ रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत् । नाहं जीवः परात्मेति ज्ञातं चेन्निर्भयो भवेत् ॥ २६ ॥ आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि । दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २७ ॥ स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः । न दीपस्यान्यदीपेच्छा यथा स्वात्मा प्रकाशते ॥ २८ ॥ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः । विद्यादैक्यं महावाक्यैर्जीवात्मपर-

मात्मनोः ॥ २९ ॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम् । एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम् ॥ ३० ॥ देहान्यत्वान्न मे जन्म जराकार्श्यलयादयः । शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च ॥ ३१ ॥ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः । अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशासनात् ॥ ३२ ॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः । निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ ३३ ॥ अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः । सदा सर्वसमः शुद्धो निःसङ्गो निर्मलोऽचलः ॥ ३४ ॥ नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् । सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥ ३५ ॥ एवं निरन्तराभ्यस्ता ब्रह्मैवास्मीति वासना । हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ॥ ३६ ॥ विविक्तदेश आसीनो विरागो विजितेन्द्रियः । भावयेदेकमात्मानं तमनन्तमनन्यधीः ॥ ३७ ॥ आत्मन्येवाखिलं दृश्यं प्रविलाप्य धियः सुधीः । भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥ रूपवर्णादिकं सर्वं विहाय परमार्थवित् । परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते ॥ ३९ ॥ ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते । चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४० ॥ एवमात्मारणौ ध्यानमन्थने सततं कृते । उदितावगतिर्ज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४१ ॥ अरुणेनेव बोधेन पूर्वसन्तमसे हृते तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२ ॥ आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया । तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा ॥ ४३ ॥ स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता । जीवस्य तात्त्विके रूपे तस्मिन् दृष्टे निवर्तते ॥ ४४ ॥ तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञान-

मञ्जसा । अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४५ ॥ सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितम् । एवं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥ ४६ ॥ आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न विद्यते । मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४७ ॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् । सच्चिदानन्दरूपत्वाद्भवेद्भ्रमरकीटवत् ॥ ४८ ॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् । योगी शान्तिसमायुक्तो ह्यात्मारामो विराजते ॥ ४९ ॥ उपाधिस्थोऽपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः । सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५० ॥ बाह्यां नित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः । घटस्थदीपवत् स्वच्छः स्वान्तरेव प्रकाशते ॥ ५१ ॥ उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः । जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा॥५२॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् । यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५३ ॥ यद्दृष्ट्वा न परं दृश्यं यद्भूत्वा न पुनर्भवः । यज्ज्ञात्वा न परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमव्ययम् । अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥ अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम् । अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥ अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः । ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥ ५७ ॥ तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः । तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले॥५८॥ अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् । अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ५९ ॥ यद्भासा भासतेऽर्कादि भास्यैर्यत्तु च भास्यते । येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥

स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत् । ब्रह्म प्रकाशते वह्नि-प्रतप्तायसपिण्डवत् ॥ ६१ ॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन । ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६२॥ दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् । तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥ ६३ ॥ सर्वगं सच्चिदात्मानं ज्ञानचक्षु-र्निरीक्षते । अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥ ६४ ॥ श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः । जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६५ ॥ हृदाकाशोदितो ह्यात्मा बोध-भानुस्तमोपहृत् । सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ॥ ६६ ॥ दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरञ्जनम् । यः स्वात्मतीर्थं भजते विनिष्क्रियः स सर्ववित्स-र्वगतोऽमृतो भवेत् ॥ ६७ ॥ इति श्रीमत्परमहंसपरिव्राजका-चार्यश्रीमच्छंकराचार्यकृत आत्मबोधः समाप्तः ॥ २६ ॥

वाक्यसुधा ॥ २७ ॥

ॐ परमात्मने नमः ॥ रूपं दृश्यं लोचनं दृक् तद्दृश्यं द्रष्टृ मानसं । दृश्या धीवृत्तयः साक्षी दृगेव न तु दृश्यते ॥ १ ॥ नीलपीतस्थूलसूक्ष्मह्रस्वदीर्घादिभेदतः । नानाविधानि रूपाणि पश्यल्लोचनमेकधा ॥ २ ॥ आन्ध्यमान्द्यपटुत्वेषु नेत्रधर्मेष्वने-कधा । संकल्पयन्मनः श्रोत्रत्वगादौ योज्यतामिति ॥ ३ ॥ कामः संकल्पसंदेहौ श्रद्धाश्रद्धे धृतीतरे । ह्रीर्धीर्भीरित्येवमादी-न्भासयत्येकधा चितिः ॥ ४ ॥ नोदेति नास्तमेत्येषा न वृद्धिं याति न क्षयं । स्वयं तथाविधान्यानि भासयेत्साधनं विना ॥ ५ ॥ चिच्छायावेशतो बुद्धौ भानं धीस्तु द्विधा स्थिता ।

एकाहंकृतिरन्या स्यादन्तःकरणरूपिणी ॥ ६ ॥ छायाहंकारयोरैक्यं तप्तायःपिंडवन्मतम् । तदहंकारतादात्म्याद्देहश्चेतनतामियात् ॥ ७ ॥ अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः । सहजं कर्मजं भ्रान्तिजन्यं च त्रिविधं क्रमात् ॥ ८ ॥ संबन्धिनोः सतोर्नास्ति निवृत्तिः सहजस्य तु । कर्मक्षयात्प्रबोधाच्च निवर्तेते क्रमादुभे ॥ ९ ॥ अहंकारलये सुप्तौ भवेद्देहोप्यचेतनः । अहंकृतिविकारोत्थः स्वप्नः सर्वस्तु जागरः ॥ १० ॥ अंतःकरणवृत्तिस्तु चितिच्छायैक्यमागता । वासनाः कल्पयत्येव बोधेऽक्षैर्विषयान्न हि ॥ ११ ॥ मनोहंकृत्युपादानं लिंगमेकं जडात्मकं । अवस्थात्रयमन्वेति जायते म्रियतेऽपि वा ॥ १२ ॥ शक्तिद्वयं हि मायाया विक्षेपावृत्तिरूपकम् । विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत् ॥ १३ ॥ अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः । या वृणोत्यपरा शक्तिः सा संसारस्य कारणं ॥ १४ ॥ सृष्टिर्नाम ब्रह्मरूपे सच्चिदानंदवस्तुनि । अम्बुफेनादिवत्सर्वं नामरूपप्रसारणम् ॥ १५ ॥ साक्षिणः पुरतो भाति लिङ्गदेहेन संयुतः । चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ १६ ॥ अस्य जीवत्वमारोपात्साक्षिण्यपि च भासते । आवृत्तौ तु विनष्टायां भेदजातं प्रयाति तत् ॥ १७ ॥ सर्गस्य ब्रह्मणस्तद्वद्भेदमावृत्य तिष्ठति । या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ १८ ॥ अत्राप्यावृत्तिनाशेन विभाति ब्रह्मसर्गयोः । भेदस्ततो विकारः स्यात्सर्गेन ब्रह्मणि क्वचित् ॥ १९ ॥ अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ २० ॥ खवाय्वग्निजलोर्वीषु देवतिर्यङ्नरादिषु । अभिन्नात्सच्चिदानंदाद्भिद्येते रूपनामनी ॥ २१ ॥

उपेक्ष्य नामरूपे द्वे सच्चिदानंदवस्तुनि । समाधिं सर्वदा कुर्याद्धृदये वाथवा बहिः ॥ २२ ॥ सविकल्पोऽविकल्पश्च समाधिर्द्विविधो हृदि । दृश्यशब्दानुवेधेन सविकल्पः पुनर्द्विधा ॥ २३ ॥ कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनाम् । ध्यायेद्दृश्यानुविद्धोयं समाधिः सविकल्पकः ॥ २४ ॥ असंगः सच्चिदानंदः स्वप्रभो द्वैतवर्जितः । अस्मीति शब्दविद्धोयं सविकल्पः समाहितः ॥ २५ ॥ स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्ष्यतु । निर्विकल्पः समाधिः स्यान्निवातस्थलदीपवत् ॥ २६ ॥ हृदि च बाह्यदेशेपि यस्मिन्कस्मिंश्च वस्तुनि । समाधिराद्यः सन्मात्रे नामरूपे पृथक्स्थितः ॥ २७ ॥ अखण्डैकरसं वस्तु सच्चिदानंदलक्षणम् । इत्यविच्छिन्नचित्तेऽयं समाधिर्मध्यमो भवेत् ॥ २८ ॥ स्तव्धभावो रसास्वादात्तृतीयः पूर्ववन्मतः । एतैः समाधिभिः षड्भिर्नयेत्कालं निरन्तरम् ॥ २९ ॥ देहाभिमाने गलिते विज्ञाते परमात्मनि । यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ ३० ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ३१ ॥ अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः । विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः ॥ ३२ ॥ अवच्छेदः कल्पितः स्यादवच्छेद्यं तु वास्तवम् । तस्मिञ्जीवत्वमारोपाद्ब्रह्मत्वं तु स्वभावतः ॥ ३३ ॥ अवच्छिन्नस्य जीवस्य तादात्म्यं ब्रह्मणा सह । तत्त्वमस्यादिवाक्यानि जगुर्नेतरजीवयोः ॥ ३४ ॥ ब्रह्मण्यवस्थिता माया विक्षेपावृतिरूपिका । आवृत्याखण्डतां तस्मिञ्जगज्जीवौ प्रकल्पयेत् ॥ ३५ ॥ जीवो धीस्थश्चिदाभासो जगत्स्याद्भूतभौतिकम् । अनादिकालमारभ्य मोक्षात्पूर्वमिदं द्वयम् ॥ ३६ ॥ चिदाभासे स्थिता निद्रा

विक्षेपावृतिरूपिणी । आवृत्य जीवजगती पूर्वं नूत्नेन कल्पयेत् ॥ ३७ ॥ प्रतीतिकाल एवैते स्थितत्वात्प्रातिभासिके । न हि स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः ॥ ३८ ॥ प्रातिभासिकजीवस्तु जगत्तत्प्रातिभासिकम् । वास्तवं मन्यते यस्तु मिथ्येति व्यावहारिकः ॥ ३९ ॥ व्यावहारिकजीवस्तु जगत्तद्व्यावहारिकम् । सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः ॥ ४० ॥ पारमार्थिकजीवस्तु ब्रह्मैकं पारमार्थिकम् । प्रत्येति वीक्षते नान्यद्वीक्षतेत्वनृतात्मना ॥ ४१ ॥ माधुर्यद्रवशैत्यादिजलधर्मास्तरंगके । अनुगम्याऽपि तन्निष्ठे फेनेप्यनुगता यथा ॥ ४२ ॥ प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके । तल्लये सच्चिदानंदाः पर्यवस्यन्ति साक्षिणि ॥ ४३ ॥ इति श्रीमच्छंकराचार्यविरचितवाक्यसुधा संपूर्णा ॥ २७ ॥

अथाऽपरोक्षानुभूतिप्रारम्भः ॥ २८ ॥

ॐपरमात्मने नमः ॥ श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् । व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥ अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये । सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥ स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् । साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥ ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु । यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ४ ॥ नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् । एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५ ॥ सदैव वासनात्यागः शमोऽयमिति शब्दितः । निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥ विषयेभ्यः परावृत्तिः परमो-

परतिर्हि सा । सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥ निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता । चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम् ॥ ८ ॥ संसारबन्धनिर्मुक्तिः कथं मे स्यात्कदा विधे । इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥ उक्तसाधनयुक्तेन विचारः पुरुषेण हि । कर्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥ नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः । यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥ ११ ॥ कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते । उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥१२॥ नाहं भूतगणो देहो नाहं चाक्षगणस्तथा । एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः ॥ १३ ॥ अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते । संकल्पो विविधः कर्ता विचारः सोऽयमीदृशः ॥ १४ ॥ एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् । यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥ १५ ॥ अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः । तदहं नात्र संदेहो विचारः सोऽयमीदृशः ॥ १६ ॥ आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः । तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १७॥ आत्मा नियामकश्चान्तर्देहो बाह्यो नियम्यकः । तयोरैक्यं० ॥ १८ ॥ आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः । तयोरैक्यं० ॥ १९ ॥ आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते । तयोरैक्यं० ॥ २० ॥ आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः । तयोरैक्यं० ॥ २१ ॥ आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् । नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥ देहोऽहमित्ययं मूढो धृत्वा

तिष्ठत्यहो जनः । ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥ ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः । नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥ निर्विकारो निराकारो निरवद्योऽहमव्ययः । नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥ निरामयो निराभासो निर्विकल्पोऽहमाततः । नाहं देहो० ॥ २६ ॥ निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः । नाहं देहो० ॥ २७ ॥ निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः । नाहं देहो० ॥ २८ ॥ स्वदेहे शोभनं सन्तं पुरुषाख्यं च संमतम् । किं मूर्ख शून्यमात्मानं देहातीतं करोषि भोः ॥ २९ ॥ स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् । देहातीतं सदाकारं सुदुर्दर्श भवादृशैः ॥३०॥ अहंशब्देन विख्यात एक एव स्थितः परः । स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥ अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः । ममायमिति निर्देशात्कथं० ॥ ३२ ॥ अहं विकारहीनस्तु देहो नित्यं विकारवान् । इति प्रतीयते साक्षात्कथं० ॥ ३३ ॥ यस्मात्परमिति श्रुत्या तया पुरुषलक्षणम् । विनिर्णीतं विमूढेन कथं० ॥३४॥ सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते । अप्युच्यते यतः श्रुत्या कथं० ॥ ३५ ॥ असङ्गः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च । अनन्तमलसंश्लिष्टः कथं० ॥३६॥ तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः । जडः परप्रकाश्योऽसौ कथं० ॥ ३७ ॥ प्रोक्तोऽपि कर्मकाण्डेन ह्यात्मा देहाद्विलक्षणः । नित्यश्च तत्फलं भुंक्ते देहपातादनन्तरम् ॥३८॥ लिङ्गं चानेकसंयुक्तं चलं दृश्यं विकारि च । अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम् ॥३९॥

एवं देहद्वयादन्य आत्मपुरुष ईश्वरः । सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥ इत्यात्मदेहभागेन प्रपञ्चस्यैव सत्यता । यथोक्ता तर्कशास्त्रेण ततः किं पुरुषार्थता ॥ ४१ ॥ इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् । इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥ चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् । जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥ रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी । भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥४४॥ उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते । तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत्॥४५॥ व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् । इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥ श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि । कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥ दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति । इह पश्यति नानात्वं मायया वञ्चितो नरः ॥ ४८ ॥ ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः । तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥ ब्रह्मैव सर्वनामानि रूपाणि विविधानि च । कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥ सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् । ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥ स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः । यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितम् ॥ ५२ ॥ यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति । आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥ यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः । न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥ ५४ ॥ अयमात्मा हि

ब्रह्मैव सर्वात्मकतया स्थितः । इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥ अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् । असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥ स्वप्नो जागरणेऽलीकः स्वप्नेऽपि जागरो न हि । द्वयमेव लये नास्ति लयोपि ह्युभयोर्न च ॥ ५७ ॥ त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितम् । अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥ यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम् । तद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति ॥ ५९ ॥ यथा मृदि घटो नाम कनके कुण्डलाभिधा । शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥६०॥ यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले । पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥ यथैव शून्ये वैतालो गन्धर्वाणां पुरं यथा । यथाकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥६२॥ यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् । पात्ररूपेण ताम्रं हि ब्रह्माण्डौघैस्तथात्मता ॥६३॥ घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः । जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥ सर्वोपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः । अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ॥ ६५ ॥ कार्यकारणता नित्यमास्ते घटमृदोर्यथा । तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह ॥ ६६ ॥ गृह्यमाणे घटे यद्वन्मृत्तिका याति वै बलात् । वीक्ष्यमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥ स हैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा । यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ॥ ६८ ॥ यथैव मृन्मयः कुंभस्तद्वद्देहोऽपि चिन्मयः । आत्मानात्मविभागोऽयं मुधैव क्रियतेऽबुधैः ॥ ६९ ॥ सर्पत्वेन यथा रज्जू रजत-

त्वेन शुक्तिका । विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥७०॥ घटत्वेन यथा पृथ्वी पटत्वेनैव तन्तवः । विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७१ ॥ कनकं कुण्डलत्वेन तरंगत्वेन वै जलम् । विनिर्णीतं० ॥ ७२ ॥ पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका । विनिर्णीता० ॥ ७३ ॥ गृहत्वेनैव काष्ठानि खड्गत्वेनैव लोहता । विनिर्णीता० ॥ ७४ ॥ यथा वृक्षविपर्यासो जलाद्भवति कस्य चित् । तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥ पोतेन गच्छतः पुंसः सर्वं भातीव चञ्चलम् । तद्वदा० ॥ ७६ ॥ पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्य चित् । तद्व० ॥ ७७ ॥ चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् । तद्व० ॥ ७८ ॥ अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् । तद्वदा० ॥ ७९ ॥ महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः । तद्वदा० ॥ ८० ॥ सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः । तद्वदा ॥ ८१ ॥ काचभूमौ जलत्वं वा जलभूमौ हि काचता । तद्वदा० ॥ ८२ ॥ यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुनः । तद्वदा० ॥ ८३ ॥ अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै । तद्वदा० ॥ ८४ ॥ यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् । तद्वदा० ॥ ८५ ॥ यथा शशी जले भाति चञ्चलत्वेन कस्यचित् । तद्वदा० ॥ ८६ ॥ एवमात्मन्यविद्यातो देहाध्यासो हि जायते । स एवात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥ सर्वमात्मतया ज्ञातं जगत्स्थावरजंगमम् । अभावात्सर्वभावानां देहस्य चात्मता कुतः ॥८८॥ आत्मानं सततं जानन्कालं नय महाद्युते । प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥ उत्पन्नेप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति । इति

यन्दृश्यते शास्त्रं तन्निराक्रियतेऽधुना ॥ ९० ॥ तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते । देहादीनामसत्त्वात्तु यथा स्वप्नो विबोधतः ॥ ९१ ॥ कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम् । तत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥ स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः । अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥ उपादानं प्रपञ्चस्य मृद्भाण्डस्येव कथ्यते । अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥ यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् । तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥ रज्जुरूपे परिज्ञाते सर्पखण्डं न तिष्ठति । अधिष्ठाने तथा ज्ञाते प्रपञ्चः शून्यतां गतः ॥ ९६ ॥ देहस्यापि प्रपञ्चत्वात्प्रारब्धावस्थितिः कुतः । अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ९७ ॥ क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे । बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥ ९८ ॥ उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः । वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ॥९९॥ त्रिपञ्चाङ्गान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये । तच्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥ नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः । तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ १०१ ॥ यमो हि नियमस्त्यागो मौनं देशश्च कालता । आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः ॥ १०२ ॥ प्राणसंयमनं चैव प्रत्याहारश्च धारणा । आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ १०३ ॥ सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः । यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः । नियमो

हि परानन्दो नियमात्क्रियते बुधैः ॥१०५॥ त्यागः प्रपञ्चरूपस्य चिदात्मत्वावलोकनात् । त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ १०६ ॥ यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह । यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १०७ ॥ वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते । प्रपञ्चो यदि वक्तव्यः सोपि शब्दविवर्जितः ॥१०८॥ इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् । गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥ आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते । येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११० ॥ कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः । कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः ॥ १११ ॥ सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् । आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥ ११२ ॥ सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् । यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ ११३ ॥ यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनं । मूलबन्धः सदा सेव्यो योग्योसौ राजयोगिनाम् ॥ ११४ ॥ अंगानां समतां विद्यात्समे ब्रह्मणि लीयते । नोचेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥ दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् । सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥ दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत् । दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥ चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् । निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥ निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः । ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥ ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ।

चापि प्रबुद्धानामज्ञानां प्राणपीडनम् ॥ १२० ॥ विषयेष्वा-
त्मतां दृष्ट्वा मनसश्चितिमज्जनम् । प्रत्याहारः स विज्ञेयोऽभ्य-
सनीयो मुमुक्षुभिः ॥ १२१ ॥ यत्र यत्र मनो याति ब्रह्मणस्तत्र
दर्शनात् । मनसो धारणं चैव धारणा सा परा मता ॥१२२॥
ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः । ध्यानशब्देन
विख्याता परमानन्ददायिनी ॥ १२३ ॥ निर्विकारतया वृत्त्या
ब्रह्माकारतया पुनः । वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसं-
ज्ञकः ॥ १२४ ॥ इमं च कृत्रिमानन्दं तावत्साधु समभ्यसेत् ।
वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सन्भवेत्स्वयम् ॥ १२५ ॥ ततः
साधननिर्मुक्तः सिद्धो भवति योगिराट् । तत्स्वरूपं न चैतस्य
विषयो मनसो गिराम् ॥ १२६ ॥ समाधौ क्रियमाणे तु
विघ्नान्यायान्ति वै बलात् । अनुसंधानराहित्यमालस्यं भोग-
लालसम् ॥ १२७ ॥ लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः ॥ १२८ ॥ भाव-
वृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता । ब्रह्मवृत्त्या हि
पूर्णत्वं तथा पूर्णत्वमभ्यसेत् ॥ १२९ ॥ ये हि वृत्तिं जहत्येनां
ब्रह्माख्यां पावनीं पराम् । ते तु वृथैव जीवन्ति पशुभिश्च
समा नराः ॥१३०॥ ये हि वृत्तिं विजानन्ति ज्ञात्वापि वर्द्धयन्ति
ये । ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये ॥ १३१ ॥ येषां
वृत्तिः समा वृद्धा परिपक्वा च सा पुनः । ते वै सद्ब्रह्मतां प्राप्ता
नेतरे शब्दवादिनः ॥ १३२ ॥ कुशला ब्रह्मवार्त्तायां वृत्ति-
हीनाः सुरागिणः । तेऽप्यज्ञानितया नूनं पुनरायान्ति यान्ति
च ॥ १३३ ॥ निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥१३४॥ कार्ये

कारणता याता कारणेन हि कार्यता । कारणत्वं ततो गच्छे-त्कार्याभावे विचारतः ॥ १३५ ॥ अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् । द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः॥१३६॥ अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् । उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥ १३७ ॥ कारणव्यतिरेकेण पुमानादौ विलोकयेत् । अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति ॥१३८॥ कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् । कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः ॥ १३९ ॥ भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना । पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥ १४० ॥ अदृश्यं भावरूपं च सर्वमेव चिदात्मकम् । साव-धानतया नित्यं स्वात्मानं भावयेद्बुधः ॥ १४१ ॥ दृश्यं ह्यदृ-श्यतां नीत्वा ब्रह्माकारेण चिंतयेत् । विद्वान्नित्यसुखे तिष्ठे-द्धिया चिद्रसपूर्णया ॥ १४२ ॥ एभिरंगैः समायुक्तो राजयोग उदाहृतः । किंचित्पक्वकषायाणां हठयोगेन संयुतः ॥१४३॥ परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः । गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥ इति श्रीपरमहंसपरिव्राजका-चार्यश्रीमच्छंकरभगवता विरचितापरोक्षानुभूतिः समाप्ता२८

स्वात्मनिरूपणम् ॥ २९ ॥

ॐ परमात्मने नमः ॥ श्रीगुरुचरणद्वन्द्वं वन्देहं, मथितदुः-सहद्वन्द्वम् । भ्रान्तिग्रहोपशान्तिं पांसुमयं यस्य भसितमातनुते ॥ १ ॥ दैशिकवरं दयालुं वन्देहं निहतसकलसन्देहम् । यच्च-रणद्वयमद्वयमनुभवमुपदिशति तत्परस्यार्थम् ॥ २ ॥ संसारदा-वपावकसंतप्तः सकलसाधनोपेतः । स्वात्मनिरूपणनिपुणैर्वाक्यैः

शिष्यः प्रनोच्यते गुरुणा ॥३॥ अस्ति स्वयमित्यस्मिन्नंशे कस्यास्ति संशयः पुंसः । तत्रापि संशयश्चेत्संशयिता यः स एव भवसि त्वम् ॥४॥ नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति । अहमस्मीति विजानन् ब्रह्मैवासौ स्वयं विजानाति ॥ ५ ॥ ब्रह्म त्वमेव तस्मान्नाहं ब्रह्मेति मोहमात्रमिदम् । मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ॥ ६ ॥ न क्लेशपञ्चकमिदं भजते कृतकोपपञ्चकविवेकः । अत एव पञ्चकोपान् कुशलधियः संततं विचिन्वन्ति ॥ ७ ॥ अन्नप्राणमनोमयविज्ञानानन्दपञ्चकोषाणाम् । एकैकान्तरभाजां भजति विवेकात्प्रकाशतामात्मा ॥ ८ ॥ वपुरिदमन्नमयाख्यः कोषो नात्मा जडो घटप्रायः । प्रागुत्पत्तेः पश्चात्तदलाभस्यापि दृश्यमानत्वात् ॥ ९ ॥ कोषः प्राणमयोऽयं वायुविशेषो वपुष्यवच्छिन्नः । अस्य कथमात्मता स्यात् क्षुत्तृष्णाभ्यामुपेयुषः पीडाम् ॥ १० ॥ कुरुते वपुष्यहन्तां गेहादौ यः करोति ममतां च । रागद्वेषविधेयो नासावात्मा मनोमयः कोषः ॥ ११ ॥ सुप्तौ स्वयं विलीना बोधे व्याप्ता कलेवरं सकलम् । विज्ञानशब्दवाच्या चित्प्रतिबिम्बा न बुद्धिरप्यात्मा ॥ १२ ॥ सुप्तिगतैः सुखलेशैरभिमनुते यः सुखी भवामीति । आनंदकोषनामा सोहङ्कारः कथं भवेदात्मा ॥ १३ ॥ यः स्फुरति बिम्बभूतः स भवेदानन्द एव सकलात्मा । प्रागूर्ध्वमपि च सत्वादविकारित्वादबाध्यमानत्वात् ॥ १४ ॥ अन्नमयादेरस्मादपरं यदि नानुभूयते किंचित् । अनुभवितान्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः॥१५॥ स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वम् । सकृदप्यभावशङ्का न भवेद्बोधस्वरूपसत्तायाः ॥१६॥ अनुभवति विश्वात्मा विश्वे-

॥

नासौ न चानुभूयते। न खलु प्रकाश्यतेऽसौ विश्वमशेषं प्रकाशयन् भानुः ॥ १७ ॥ तदिदं तादृशमीदृशमेतावत्तावदिति च यन्न भवेत्। ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत् परोक्षं च ॥ १८ ॥ इदमिदमिति प्रतीते वस्तुनि सर्वत्र बाध्यमानेऽपि। अनिदमबाध्यं तत्त्वं सत्वादेतस्य न च परोक्षत्वम् ॥ १९ ॥ नावेद्यमपि परोक्षं भवति ब्रह्म स्वयं प्रकाशत्वात्। सत्यं ज्ञानमनन्तं ब्रह्मेत्येतस्य लक्षणं प्रथते ॥ २० ॥ सति कोपशक्त्युपाधौ संभवतस्तस्य जीवतेश्वरते। नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपम् ॥ २१ ॥ सति सकलदृश्यबाधे न किमप्यस्तीति लोकसिद्धं चेत्। यन्न किमपीति सिद्धं ब्रह्म तदेवेति वेदतः सिद्धम् ॥ २२ ॥ एवमपि विरहितानां तत्त्वमसीत्यादिवाक्यचिन्तनया। प्रतिभात्येव परोक्षवदात्मा प्रत्यक् प्रकाशमानोऽपि ॥ २३ ॥ तस्मात्पदार्थशोधनपूर्वकवाक्यस्य चिन्तयन्नर्थम्। दैशिकदयाप्रभावादपरोक्षयति क्षणेन चात्मानम् ॥ २४ ॥ देहेन्द्रियादिधर्मानात्मन्यारोपयन्नभेदेन। कर्तृत्वाद्यभिमानी बोधः स्यात्त्वं पदस्य वाच्योऽर्थः ॥ २५ ॥ देहो हन्तेन्द्रियाणि साक्षी तेभ्यो विलक्षणत्वेन। प्रतिभाति योऽवबोधः प्रोक्तोऽसौ त्वंपदस्य लक्ष्योऽर्थः ॥ २६ ॥ वेदावसानवाचा संवेद्यं सकल जगदुपादानम्। सर्वज्ञताद्युपेतं चैतन्यं तत्पदस्य वाच्योर्थः ॥ २७ ॥ विविधोपाधिविमुक्तं विश्वातीतं विशुद्धमद्वैतम्। अक्षरमनुभववेद्यं चैतन्यं तत्पदस्य लक्ष्योऽर्थः ॥ २८ ॥ सामानाधिकरण्यं तदनुविशेषणविशेष्यता चेति। अथ लक्ष्यलक्षकत्वं भवति पदार्थात्मनी चेति ॥ २९ ॥ एकत्र वृत्तिरर्थे शब्दानां भिन्नवृत्तिहेतूनाम्। सामानाधिकरण्यं भवती-

त्येनं वदन्ति लाक्षणिकाः ॥ ३० ॥ प्रत्यक्परोक्षतं परिपूर्णत्वं मदद्वितीयत्वम् । इतरेतरं विरुद्धं तदिह भवितव्यमेव लक्षणया ॥ ३१ ॥ मानान्तरोपरोधे मुख्यार्थस्यापरिग्रहे जाते । मुख्या-विनाकृतेऽर्थे या वृत्तिः सैव लक्षणा प्रोक्ता ॥ ३२ ॥ निखिल मपि वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे । जहतीति लक्षणा स्याद्गङ्गायां घोष इतिवदत्र ॥३३॥ वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे । इयमजहतीति कथिता शोणो धावति-वदत्र न ग्राह्या ॥ ३४ ॥ जहदजहतीति सा स्याद्या वाच्यार्थ-कदेशमादाय । बोधयति चैकदेशं सोयं द्विज इतिवदाश्रयेद-नाम् ॥ ३५ ॥ सोऽयं द्विज इति वाक्यं त्यक्त्वा परोक्षापरोक्ष-देशादिम् । द्विजमात्रलक्षकत्वात् कथयत्यैक्यं पदार्थयोरुभयोः ॥३६॥ तद्वत्तत्त्वमसीति त्यक्त्वा परोक्षापरोक्षतादीनि । चिद्वस्तु लक्षयित्वा बोधयति स्पष्टमसिपदेनैक्यम् ॥ ३७ ॥ इत्थं बोधि-तमर्थं महता वाक्येन बोधितैक्येन । अहमित्यपरोक्षयतां वेदो वेदयति वीतशोकत्वम् ॥ ३८ ॥ प्रायः प्रवर्तकत्वं विधिवचसि लोकवेदयोर्दृष्टम् । सिद्धं बोधयतोऽर्थं कथमेतद्भवति तत्त्वम-स्यादेः॥३९॥विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधोऽ-पि । राजा भवति सुतोऽभूदिति बोधेन प्रवर्तते लोकः ॥४०॥ ऐक्यपरैः श्रुतिवाक्यैरात्मा शश्वत्प्रकाशमानोऽपि । देशिकदया-विहीनैरपरोक्षयितुं न शक्यते पुरुषैः ॥ ४१ ॥ विरहितकाम्य-निषिद्धो विहितानुष्ठानिर्मलस्वान्तः । भजति स्वयमेव बोधं गुरुणा किमिति त्वया न मन्तव्यम् ॥ ४२ ॥ कर्मभिरेव न बोधः प्रभवति गुरुणा विना दयानिधिना । आचार्यवान् पुरुषो वेदेत्यर्थस्य वेदसिद्धत्वात् ॥ ४३ ॥ वेदोऽनादितया वा

यद्वा परमेश्वर प्रणीततया । भवति परमं प्रमाणं बोधो नास्ति स्वतश्च परतो वा ॥ ४४॥ नापेक्षते यदन्यद्यदपेक्षन्तेऽखिलानि मानानि । वाक्यं तन्निगमानां मानं ब्रह्माद्यतीन्द्रियावगतौ ॥ ॥ ४५ ॥ मानं प्रबोधयन्तं बोधं मानेन ये बुभुत्सन्ते । एधोभिरेव दहनं दग्धुं वाञ्छन्ति ते महात्मानः ॥ ४६ ॥ वेदोऽनादिरमुष्य व्यञ्जक ईशः स्वयं प्रकाशात्मा । तदभिव्यक्तिमुदीक्ष्य प्रोक्तोऽसौ सूरिभिः प्रमाणमिति ॥ ४७ ॥ रूपाणामवलोके चक्षुरिवान्यन्न कारणं दृष्टम् । तद्वददृष्टावगतौ वेदवदन्यो न वेद को हेतुः ॥ ४८ ॥ निगमेषु निश्चितार्थं तन्त्रेषु कश्चिदपि प्रकाशयति । तदिदमनुवादमात्रं प्रामाण्यं तस्य सिद्ध्यति न किंचित् ॥ ४९ ॥ अंशद्वयवति निगमे साधयति वै तमेक एवांशः । अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ॥ ५० ॥ अद्वैतमेव सत्यं तस्मिन् द्वैतं ह्यसत्यमध्यस्तम् । रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् ॥ ५१ ॥ आरोपितं यदि स्याद्द्वैतं वस्त्ववस्तुनि द्वैते । युक्तं नैव तदा स्यात्सत्येऽध्यासो भवत्यसत्यानाम् ॥ ५२ ॥ यद्यारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिद्भावः । आरोपणं न शून्ये तस्माद्द्वैतसत्यता ग्राह्या ॥ ५३ ॥ प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् । द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्धत्वात् ॥ ५४ ॥ अद्वैतं सुखरूपं दुःसहदुःखं सदा भवेद्द्वैतम् । यत्र प्रयोजनं स्यात्प्रतिपादयति श्रुतिस्तदेवासौ ॥ ५५ ॥ निगमगिरा प्रतिपाद्यं वस्तु यदानन्दरूपमद्वैतम् । स्वाभाविकं स्वरूपं जीवत्वं तस्य केचन ब्रुवते ॥ ५६ ॥ स्वाभाविकं यदि स्याज्जीवत्वं तस्य विशदविज्ञप्तेः । सकृदपि न तद्विनाशं गच्छे-

दिदं ब्रह्म । तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ॥ ८४ ॥ अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि । प्रथमा प्रतीचि चरमा निवसति वपुरिन्द्रियादिबाह्यार्थे ॥ ८५ ॥ वपुरिन्द्रियादिविषयाऽहंबुद्धिश्चेन्महत्यसौ भ्रान्तिः । अतस्मिंस्तद्बुद्धिरित्यध्यासेन शास्यमानत्वात् ॥८६॥ तस्मादशेषसाक्षी परमात्मैवाहमर्थ इत्युचितम् । अजडवदवे जडोयं सत्संबन्धाद्भवत्यहंकारः ॥ ८७ ॥ तस्मात् सर्वशरीरेष्वहमहमित्येव भासते स्पष्टः । यः प्रत्ययो विशुद्धस्तस्य ब्रह्मैव भवति मुख्यार्थः ॥ ८८ ॥ गोशब्दादिव गोत्वं तदपि व्यक्तिः प्रतीयतेऽर्थतया । अहमर्थः परमात्मा तद्भ्रान्त्या भवत्यलंकारः ॥ ८९ ॥ दग्धत्वादिकमयसः पावकसंगेन भासते यद्वत् । तद्वच्चेतनसंगादहमिति प्रतिभाति कर्तृतादीनि ॥ ९० ॥ देहेन्द्रियादिदृश्यव्यतिरिक्तं निर्मलमतुलमद्वैतम् । अहमर्थमिति विदित्वा तद्व्यतिरिक्तं न कल्पयेदन्यत् ॥ ९१ ॥ यद्वत्सुखदुःखानामनुभवभेदाद्विचित्रता देहे । तद्वदिह सत्यभेदेप्यनुभववैचित्र्यमात्मनामेषाम् ॥९२॥ किमिदं किमस्य रूपं कथमेतदभूदमुष्य को हेतुः । इति न कदापि विचिन्त्यं चिन्त्यं मायेति धीमता विश्वम् ॥९३ ॥ दन्तिनि दारुविकारे दारु तिरोभवति सोऽपि तत्रैव । जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोधत्ते ॥ ९४ ॥ आत्ममये महति पटे विविधजगच्चित्रमात्मना लिखितम् । स्वयमेव केवलमसौ पश्यन्प्रमुदं प्रयाति परमात्मा ॥ ९५ ॥ चिन्मात्रममलमक्षयमद्वयमानंदमनुभवारूढम् । ब्रह्मैवास्ति तदन्यन्न किंचिदस्तीति निश्चयो विदुषाम् ॥ ९६ ॥ व्यवहारस्य दशेयं विद्याविद्येति वेदपरिभाषा । नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव

नान्यदस्त्यस्मात् ॥ ९७ ॥ अस्त्यन्यदिति मतं चेत्तदपि ब्रह्मैव चास्तितारूपम् । व्यतिरिक्तमस्तिताया नास्तितया शून्यमेव तत्सिद्धम् ॥ ९८ ॥ तत्त्वावबोधशक्त्या स्थिरताया बाधितापि सा माया । आदेहपातमेषामाभात्यात्माप्ययं निजो विदुषाम् ॥ ९९ ॥ एष विशेषो विदुषां पश्यन्तोऽपि प्रपञ्चसंसारम् । पृथगात्मनो न किंचित्पश्येयुः सकलनिगमनिर्णीतात् ॥१००॥ किं चिन्त्यं किमचिन्त्यं किं कथनीयं किमप्यकथनीयम् । किं कृत्यं किमकृत्यं निखिलं तदिति जानतां विदुषाम् ॥ १०१ ॥ निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां विदुषाम् । बन्धो नापि न मुक्तिर्न च परमात्मत्वमपि न जीवत्वम् ॥ १०२ ॥ असकृदनुचिन्तितानामव्याहततरनिजोपदेशानाम् । प्रामाण्यं परसीमां निगमनमिदमेव निखिलनिगमानाम् ॥ १०३ ॥ इत्थं निबोध्य गुरुणा शिष्यो हृष्यन्प्रणम्य तं पदयोः । स्वानुभवसिद्धमर्थं स्वयमेवान्तर्विचारयामास ॥ १०४ ॥ अजरोहमक्षरोहं प्राज्ञोहं प्रत्यगात्मबोधोहम् । परमानन्दमयोहं परमशिवोहं भवामि परिपूर्णः ॥ १०५ ॥ आढ्योहमात्मभाजामात्मानन्दानुभूतिरसिकोहम् । आबालगोपमखिलैरयमित्यनुभूयमानविभवोऽहम् ॥ १०६ ॥ इन्द्रियसुखविमुखोहं निजसुखबोधानुभूतिरहितोहम् । इति मतिदूरतरोहं भावेतरसुखितचित्तोहम् ॥ १०७॥ ईशोहमीश्वराणामीर्ष्याद्वेषानुषङ्गरहितोहम् । ईक्षणविषयमतीनामीप्सितपुरुषार्थसाधनपरोहम् ॥ १०८ ॥ उदयोहमेव जगतामुपनिषदुद्यानकृतविहारोहम् । उद्वेलशोकसागरवाडवहुतवाहनार्चिरहम् ॥ १०९ ॥ ऊर्जस्वलनिजविभवैरूर्ध्वमधस्तिर्यगश्नुवानोहम् । ऊहापोहविचारैरुररीकृततत्त्वप्रतीय-

मानोहम् ॥११०॥ ऋषिरहमृषिगणोहं स्रष्टिरहं सृज्यमानमेवाहम्। ऋद्धिरहं वृद्धिरहं तृप्तिरहं तृप्तिदीपदीप्तिरहम्॥१११॥ एकोहमेतदीदृशमेवमिति स्फुरितभेदरहितोहम्। यष्टव्योहमनीहैरन्तःसुकृतानुभूतिरहितोहम् ॥११२॥ ऐक्यावभासकोऽहं वाक्यपरिज्ञानपावनमतीनाम्। ऐशमहमेव तत्वं नैशतमःप्रायमोहमिहिरोहम्॥११३॥ ओजोहमौषधीनामोतप्रोतायमानविभवोहम्। ओङ्कारसारसोल्लसदात्मसुखामोदमत्तभृंगोहम् ॥ ११४ ॥ औषधमहमशुभानामौपाधिकधर्मजालरहितोहम् । औदार्यातिशयोहं चित्तविविधचतुर्वर्गतरणपरोहम् ॥ ११५ ॥ अङ्कुशमहमखिलानां महत्तया मत्तवारणेन्द्राणाम्। अम्बरमिव विमलोऽहं शम्बररिपुजातविकृतिरहितोहम् ॥ ११६ ॥ आत्मविकल्पमतीनामस्खलदुपदेशगम्यमानोऽहम् । अस्थिरसुखविमुखोऽहं सुस्थिरसुखबोधसंपदुचितोहम् ॥ ११७ ॥ करुणारसभरितोहं कवलितकमलासनादिलोकोहम्। कलुषाहङ्कारविलक्षणोहं कल्मषसुकृतोपलेशरहितोहम् ॥ ११८ ॥ खानामगोचरोहं खातीतोहं खपुष्पभवगोहम् । खलजनदुरासदोहं खण्डज्ञानापनोदनपरोहम् ॥ ११९ ॥ गलितद्वैतकथोहं देही भवदखिलमूलहृदयोहम्। गन्तव्योहमनीहैर्गत्या गतिरहितपूर्णबोधोहम्॥१२०॥ घनतरमोहतिमिरप्रकरप्रध्वंसभानुनिकरोहम् । घटिकायामररजनीसंवत्सरयुगकल्पकालभेदोहम् ॥ १२१ ॥ चरदचरात्मकोहं चतुरमतिश्लाघ्यचरितोहम्। चपलजनदुर्गमोहं चलभवजलधिपारदेशोहम् ॥ १२२ ॥ छन्दःसिन्धुनिगूढज्ञानसुखाह्लादमोदमानोहम्। छलपदविहतमतीनां छन्नोहं शान्तिमार्गगम्योहम् ॥ १२३ ॥ जलजासनादिगोचरपञ्चमहाभूतमूलभूतोहम्।

जगदानंदकरोहं जन्मजरारोगमरणरहितोहम् ॥१२४॥ उंकृतिहुंकृतिसिंजितबृंहितमुखविविधनादभेदोहम् । झटिति घटितात्मवेदनदीपपरिस्फुरितहृदयभवनोहम् ॥ १२५ ॥ ज्ञानमहं ज्ञेयमहं ज्ञाताहं ज्ञानसाधनगणोहम् । ज्ञातृज्ञानविनाकृतमस्तित्वमेवाहम् ॥ १२६ ॥ तत्त्वातीतपदोहं तदन्तरोऽस्मीति भावरहितोहम् । तामसदुरधिगमोहं तत्त्वंपदबोध्यहृदयोहम् ॥ १२७ ॥ दैवतदैत्यनिशाचरमानवतिर्यञ्चहीधरादिरहम् । देहेन्द्रियरहितोहं दक्षिणपूर्वादिदिग्विभागोहम् ॥ १२८॥ धर्माधर्ममयोहं धर्माधर्मादिबन्धरहितोहम् । धार्मिकजनसुलभोऽहं धन्योहं धातुरादिभूतोहम् ॥ १२९ ॥ वामादिविरहितोहं नरकस्वर्गापवर्गरहितोहम् । नादान्तरविदितोहं नानाविश्वनिखिलागमसारोहम् ॥ १३० ॥ परजीवभेदबाधकपरमार्थज्ञानशुद्धचित्तोहम् । प्रकृतिरहं विकृतिरहं परिणतिरहमस्मि भागधेयानाम् ॥ १३१ ॥ फणधरभूधरवारणविग्रहविधृतप्रपञ्चसारोहम् । भालतलोहितलोचनपावकपरिभूतपञ्चबाणोहम् ॥ १३२ ॥ बद्धो भवामि नाहं बन्धान्मुक्तस्तथापि नैवाहम् । बोध्यो भवामि नाहं बोधोहं नैव बोधको नाहम् ॥१३३॥ भक्तिरहं भजनमहं मुक्तिरहं मुक्तियुक्तिरहमेव । भूतानुशासनोहं भूतभवद्भाविमूलभूतोहम् ॥ १३४ ॥ मान्योहमस्मि महतां मन्दमतीनाममाननीयोहम् । मदरागमानमोहितमानसदुर्वासनादुरापोहम् ॥१३५॥ यजनयजमानयाजकयागमयोहं यमादिरहितोहम् । इन्द्रयमवरुणयक्षराक्षसमरुदीशवह्निरूपोहम् ॥ १३६ ॥ रक्षाविधानशिक्षावीक्षितलीलावलोकमहिमाहम् । रजनीदिवसविरामस्फुरदनुभूतिप्रमाणसिद्धोहम् ॥ १३७ ॥ लक्षणलक्ष्यमयोहं लाक्ष-

णिकोहं लयादिरहितोहम् । लाभालाभमयोहं लब्धव्यानामल-भ्यमानोहम् ॥ १३८ ॥ वर्णाश्रमरहितोहं वर्णमयोहं वरेण्यगण्योहम् । वाचामगोचरोहं वचसामर्थे पदे निविष्टोहम् ॥ १३९ ॥ शमदमविरहितमनसां शास्त्रशतैरप्यगम्यमानोहम् । शरणमहमेव विदुषां शकलीकृतविविधसंशयगणोहम् ॥ १४० ॥ षड्भावविरहितोहं षड्गुणरहितोहमहितरहितोहम् । षट्कोशविरहितोहं षट्त्रिंशत्तत्त्वजालरहितोहम् ॥ १४१ ॥ संवित्सुरात्मकोहं समाधिसंकल्पकल्पवृक्षोहम् । संसारविरहितोहं साक्षात्कारोहमात्मविद्यायाः ॥ १४२ ॥ हव्यमहं कव्यमहं हेयोपादेयभावशून्योहम् । हरिरहमस्मि हरोऽहं विधिरहमेवास्मि कारणं तेषाम् ॥१४३॥ क्षालितकलुषमयोहं क्षपितभवक्लेशजालहृदयोहम् । क्षान्ताद्यक्षरसहितो विविधव्यवहारमूलमेवाहम् ॥१४४॥ बहुभिः किमेभिरुक्तैरहमेवेदं चराचरं विश्वम् । सीकरफेनतरङ्गाः सिन्धोरपराणि न खलु वस्तूनि ॥ १४५ ॥ शरणं नहि मम जननी न पिता न सुता न सोदरा नान्ये । परमं शरणमिदमेव चरणं मम मूर्ध्नि दैशिकन्यस्तम् ॥ १४६ ॥ आस्ते दैशिकचरणं निरवधिरास्ते तदीक्षणे करुणा । आस्ते किमपि यदुक्तं किमतः परमस्ति जन्मसाफल्यम् ॥ १४७ ॥ हिमकरकरसारसान्द्राः काङ्क्षितवरदानकल्पविशेषाः । श्रीगुरुचरणकटाक्षाः शिशिराः शमयन्ति चित्तसन्तापम् ॥ १४८ ॥ कवलितचञ्चलचेतोगुरुतरमण्डूकजातपरितोष्मा । शेते हृदयगुहायां चिरतरमेकैव चिन्मयी भुजङ्गी ॥ १४९ ॥ मयि सुखबोधपयोधौ महति ब्रह्माण्डबुद्बुदसहस्रम् । मायाविशेषशालिनि भूत्वा भूत्वा पुनस्तिरोधत्ते ॥ १५० ॥ गुरुकृपयैव सुनावा

प्राक्तनभाग्यप्रवृद्धमारुतया । दुःसहदुःखतरङ्गस्तुङ्गः संसार-
सागरस्तीर्णः ॥ १५१ ॥ सति तमसि मोहरूपे विश्वमपश्यं
तदेतदित्यखिलम् । उदितवति बोधभानौ किमपि न पश्यामि
किं त्विदं चित्रम् ॥ १५२ ॥ नाहं नमामि देवान्देवानतीत्य न
सेवते देवम् । न तदनुकरोति विधानं तस्मै यतते नमो नमो
मह्यम् ॥ १५३ ॥ इत्यात्मबोधलाभं मुहुर्मुहुरनुचिन्त्य मोद-
मानेन । प्रारब्धकर्मणोन्ते परं पदं प्राप्यतेस्स कैवल्यम् ॥१५४॥
मोहान्धकारहरणं संसारोद्वेलसागरोत्तरणम् । स्वात्मनिरूपण-
मेतत्प्रकरणमकृत दक्षिणामूर्तिः ॥ १५५ ॥ अज्ञानान्ध्यवि-
हन्ता विरचितविज्ञानपङ्कजोल्लासः । मानसगगनतलं मे भास-
यति श्रीनिवासगुरुभानुः ॥ १५६ ॥ इति श्रीमत्परमहंसपरि-
व्राजकाचार्यश्रीमच्छंकराचार्यविरचितं स्वात्मनिरूपणं संपू-
र्णम् ॥ २९ ॥

शतश्लोकी ॥ ३० ॥

ॐ परमात्मने नमः॥ दृष्टांतो नैव दृष्टस्त्रिभुवनजठरे सद्गुरो-
र्ज्ञानदातुः स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णताम-
श्मसारम् । न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीय-
शिष्ये स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वा लौकि-
कोपि ॥ १ ॥ यद्वच्छ्रीखंडवृक्षप्रसृतपरिमलेनाभितोऽन्येपि
वृक्षाः शश्वत्सौगंध्यभाजोप्यतनुतनुभृतां तापमुन्मूलयंति ।
आचार्याल्लब्धबोधा अपि विधिवशतः सन्निधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयंति ॥ २ ॥
आत्मानात्मप्रतीतिः प्रथममभिहिता सत्यमिथ्यात्वयोगात् द्वेधा

ब्रह्मप्रतीतिर्निगमनिगदिता स्वानुभूत्योपपत्त्या । आद्या देहानुबंधाद्भवति तदपरा सा च सर्वात्मकत्वादादौ ब्रह्माहमसीत्यनुभव उदिते खल्विदं ब्रह्म पश्चात् ॥ ३ ॥ आत्मा चिद्वित्सुखात्मानुभवपरिचितः सर्वदेहादियंता सत्येवं मूढबुद्धिर्भजति ननु जनोऽनित्यदेहात्मबुद्धिम् । बाह्येस्थिस्नायुमज्जापलरुधिरवसाचर्ममेदोयुगंतर्विण्मूत्रश्लेष्मपूर्णं स्वपरवपुरहो संविदित्वापि भूयः ॥ ४ ॥ देहस्त्रीपुत्रमित्रानुचरहयवृषास्तोषहेतुर्ममेत्थं सर्वे स्वायुर्नयन्ति प्रथितमलममी मांसमीमांसयेह । एते जीवंति येन व्यवहृतिपटवो येन सौभाग्यभाजस्तं प्राणाधीशमंतर्गतममृतममुं नैव मीमांसयंति ॥ ५ ॥ कश्चित्कीटः कथंचित्पटुमतिरभितः कंटकानां कुटीरं कुर्वंस्तेनैव साकं व्यवहृतिविधये चेष्टते यावदायुः । तद्वज्जीवोपि नानाचरितसमुदितैः कर्मभिः स्थूलदेहं निर्मायात्रैव तिष्ठन्ननुदिनममुना साकमभ्येति भूमौ ॥ ६ ॥ स्वीकुर्वन् व्याघ्रवेषं स्वजठरभृतये भीषयन्यश्च मुग्धान् मत्वा व्याघ्रोहमित्थं स नरपशुमुखान् बाधते किंनु सत्त्वान् । मत्वा स्त्रीवेषधारी ह्यहमिति कुरुते किं नटो भर्तुरिच्छां तद्वच्छारीर आत्मा पृथगनुभवतो देहतो यः स साक्षी ॥ ७ ॥ स्वं बालं रोदमानं चिरतरसमयं शांतिमानेतुमग्रे द्राक्षं खार्जूरमाम्रं सुकदलमथवा योजयत्यंबिकास्य । तद्वच्चेतोतिमूढं बहुजननभवान्मौढ्यसंस्कारयोगाद्बोधोपायैरनेकैरवशमुपनिषद्बोधयामास सम्यक् ॥ ८ ॥ यत्प्रीत्या प्रीतिपात्रं तनुयुवतितनूजार्थमुख्यं स तस्मात्प्रेयानात्माथ शोकास्पदमितरदतः प्रेय एतत्कथं स्यात् । भार्याद्यं जीवितार्थी वितरति च वपुः स्वात्मनः श्रेय इच्छंस्तस्मादात्मानमेव प्रियमधि-

कमुपासीत विद्वान्न चान्यत् ॥ ९ ॥ यस्माद्यावत्प्रियं स्यादिह हि विषयतस्तावदस्मिन्प्रियत्वं यावद्दुःखं च यस्माद्भवति खलु ततस्तावदेवाप्रियत्वम् । नैकस्मिन्सर्वकालेऽस्त्युभयमपि कदाप्यप्रियोऽपि प्रियः स्यात्प्रेयानप्यप्रियो वा सततमपि यतः प्रेय आत्माख्यवस्तु ॥१०॥ श्रेयः प्रेयश्च लोके द्विविधमभिहितं काम्यमात्यंतिकं च काम्यं दुःखैकबीजं क्षणलवविरसं तच्चिकीर्षति मंदाः । ब्रह्मैवात्यंतिकं यन्निरतिशयसुखस्यास्पदं संश्रयंते तत्त्वज्ञास्तच्च काठोपनिपदभिहितं षड्विधायां च वल्याम् ॥ ११ ॥ आत्मांभोधेस्तरंगोऽस्म्यहमिति गमने भावयन्नासनस्थः संवित्सूत्रानुविद्धो मणिरहमिति वा चेंद्रियार्थप्रतीतौ । दृष्टोऽस्म्यात्मावलोकादिति शयनविधौ मग्न आनंदसिंधावंतर्निष्ठो मुमुक्षुः स खलु तनुभृतां यो नयत्येवमायुः ॥ १२ ॥ वैराजव्यष्टिरूपं जगदखिलमिदं नामरूपात्मकं स्यादंतःस्थप्राणमुख्यात्प्रचलति च पुनर्वेत्ति सर्वान्पदार्थान् । नायं कर्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः साक्षादित्थं विजानन्व्यवहरति परात्मानुसंधानपूर्वम् ॥ १३ ॥ नैर्वेद्यं ज्ञानगर्भं द्विविधमभिहितं तत्र वैराग्यमाद्यं । प्रायो दुःखावलोकाद्भवति गृहसुहृत्पुत्रवित्तैषणादेः । अन्यज्ज्ञानोपदेशाद्यदुदितविषये वांतवद्धेयता स्यात्प्रव्रज्यापि द्विधा स्यान्नियमितमनसां देहतो गेहतश्च॥१४॥ यः कश्चित्सौख्यहेतोस्त्रिजगति यतते नैव दुःखस्य हेतोर्देहेऽहंता तदुत्था स्वविषयममता चेति दुःखास्पदे द्वे । जानन्रोगाभिघाताद्यनुभवति यतो नित्यदेहात्मबुद्धिर्भार्यापुत्रार्थनाशे विपदमथ परामेति नारातिनाशे ॥ १५ ॥ तिष्ठन्गेहे गृहेशोऽप्यतिथिरिव निजं धाम गंतुं चिकीर्षुर्गेहस्थं दुःखसौख्यं न भजति

सहसा निर्ममताभिमानः । आयात्रायास्यतीदं जलदपटलवद्यात् यास्यत्यवश्यं देहाद्यं सर्वमेव प्रविदितविषयो यच्च तिष्ठत्ययत्नः ॥ १६ ॥ शक्त्या निर्मोकतः स्याद्बहिरहिरिव यः प्रव्रजन्स्वीयगेहाच्छायां मार्गद्रुमोत्थां पथिक इव मनाक्संश्रयेद्देहसंस्थाम् । क्षुत्पर्याप्तं तरुभ्यः पतितफलमयं प्रार्थयेद्भैक्ष्यमन्नं स्वात्मारामं प्रवेष्टुं स खलु सुखमयं प्रव्रजेद्देहतोपि ॥ १७ ॥ कामो बुद्धावुदेति प्रथममिह मनस्युद्दिशत्यर्थजातं तद्गृह्णातींद्रियास्यैस्तदनधिगमतः क्रोध आविर्भवेच्च । प्राप्तावर्थस्य संरक्षणमतिरुदितो लोभ एतत्त्रयं स्यात्सर्वेषां पातहेतुस्तदिह मतिमता त्याज्यमध्यात्मयोगात् ॥ १८ ॥ दानं ब्रह्मार्पणं यत्क्रियत इह नृभिः स्यात्क्षमाक्रोधसंज्ञा श्रद्धास्तिक्यं च सत्यं सदिति परमतः सेतुसंज्ञं चतुष्कम् । तत्स्याद्बंधाय जंतोरिति चतुर इमान्दानपूर्वैश्चतुर्भिस्तीर्त्वा श्रेयोमृतं च श्रयत इह नरः स्वर्गति ज्योतिराप्तिम् ॥ १९ ॥ अन्नं देवातिथिभ्योर्पितममृतमिदं चान्यथा मोघमन्नं यथात्मार्थं विधत्ते तदिह निगदितं मृत्युरूपं हि तस्य । लोकेसौ केवलाघो भवति तनुभृतां केवलादी च यः स्यात्त्यक्त्वा प्राणाग्निहोत्रं विधिवदनुदिनं योऽश्नुते सोपि मर्त्यः ॥२०॥ लोके भोजः स एवार्पयति गृहगतायार्थिनेन्नं कृशाय यस्तस्मै पूर्णमन्नं भवति मखविधौ जायतेऽजातशत्रुः । सख्यै नान्नार्थिने योर्पयति न स सखा सेवमानाय नित्यं संसक्तायान्नमस्माद्विमुख इव पराधृत्तिमिच्छेत्कदर्यात् ॥ २१ ॥ स्याज्ज्ञानज्ञानहेतू जगदुदयलयौ सर्वसाधारणौ स्तो जीवेप्वास्यर्णगर्भं श्रुतय इति जगुर्हूयते स्वप्रबोधे । विश्वं ब्रह्मण्यबोधे जगति पुनरिदं हूयते ब्रह्म तद्वच्छुक्तौ रौप्यं च रौप्ये-

धिकरणमथवा ह्यर्येतन्योन्यमोहात् ॥ २२ ॥ तुच्छत्वान्नासदासीद्गगनकुसुमवद्भेदकं नो सदासीत् किंत्वाभ्यामन्यदासीद्व्यवहृतिगतिसन्नास लोकस्तदानीम् ॥ किंत्वर्वागेव शुक्तौ रजतवदपरो नो विराड्व्योमपूर्वः शर्मण्यात्मन्यथैतत्कुहकसलिलवत्किं भवेदावरीवः ॥ २३ ॥ बंधो जन्मात्ययात्मा यदि न पुनरभूत्तर्हि मोक्षोपि नासीद्यद्वद्रात्रिर्दिनं वा न भवति तरणौ किंतु दृग्दोष एषः । अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं तस्मादन्यच्च नासीत्परिवृतमजया जीवभूतं तदेव ॥ २४ ॥ प्रागासीद्भावरूपं तम इति तमसा गूढमस्मादतर्क्यः क्षीरांतर्यद्वदंभोजनिरिह जगतो नामरूपात्मकस्य । कामाद्धातुः सिसृक्षोरनुगतजगतः कर्मभिः संप्रवृत्ताद्रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः ॥ २५ ॥ चत्वारोस्याः कपर्दा युवतिरथ भवेन्नूतना नित्यमेषा माया वा पेशला स्यादघटनघटनापाटवं याति यस्मात् । स्यादारंभे घृतास्या श्रुतिभववयुनान्येवमाच्छादयन्ती तस्यामेतौ सुपर्णाविव परपुरुषौ तिष्ठतोर्थप्रतीत्या ॥ २६ ॥ एकस्तत्रास्त्यसंगस्तदनु तदपरोज्ञानसिंधुं प्रविष्टो विस्मृत्यात्मस्वरूपं स विविधजगदाकारमाभासमैक्षत् । बुद्ध्यांतर्यावदैक्षद्विसृजति तमजा सोपि तामेवमेकस्तावद्विप्रास्तमेकं कथमपि बहुधा कल्पयंति स्ववाग्भिः॥२७॥ नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यंतकाले यत्सोखंडोस्ति लैंगं मन इह विशति व्रजत्यूर्ध्वमर्वाक् । तत्कार्श्यं वा स्थूलतां न भजति वपुषः किंतु संस्कारजातैस्तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति तैस्तैः सहैव ॥ २८ ॥ आसीत्पूर्वं सुबंधुर्भूसमवनिसुरो यः पुरोधाः सनातेर्ब्राह्मण्यात्कूटाभिचारात्स खलु-

मृतिमितस्तन्मनोगात्कृतांतम् । तद्धाता श्रौतमंत्रैः पुनरनयदिति प्राह मृक्तेन वेदस्तस्मादात्माभियुक्तं व्रजति ननु मनः कर्हिचिन्नांतरात्मा ॥२९॥ एको निष्कंप आत्मा प्रचलति मनसा धावमानेन तस्मिंस्तिष्ठन्नग्रेय पश्चान्न हि तमनुगतं जानते चक्षुराद्याः । यद्वत्पाथस्तरंगैः प्रचलति परितो धावमानैस्तदंतः प्राक्पश्चादस्ति तेषां पवनसमुदितैस्तैः प्रशांतैर्यथावत् ॥ ३० ॥ एकाक्यासीत्स पूर्वं मृगयति विषयानानुपूर्व्यांतरात्मा जाया मे स्यात्प्रजा वा धनमुपकरणं कर्म कुर्वंस्तदर्थम् । क्लेशैः प्राणाचशेषैर्महदपि मनुते नान्यदस्माद्वरीयस्त्वेकालाभेप्यकृत्स्नो मृत इव विरमत्येकहान्याकृतार्थः ॥ ३१ ॥ नासीत्पूर्वं न पश्चादतनुदिनकराच्छादको वारिवाहो दृश्यः किंत्वंतरासौ स्थगयति स दृशं पश्यतो नार्कबिम्बम् । नोचेदेवं विनार्कं जलधरपटलं भासते तर्हि कस्मात्तद्वद्विश्वं पिधत्ते दृशमथ न परं भासकं चालकं स्वम् ॥ ३२ ॥ भुंजानः स्वमराज्यं स सकलविभवो जागरं प्राप्य भूयो राज्यभ्रष्टोहमित्थं न भजति विषमं तन्मृषा मन्यमानः । स्वप्ने कुर्वन्नगम्यागमनमुखमघं तेन न प्रत्यवायी तद्वज्जाग्रद्दशायां व्यवहृतिमखिलां स्वप्नवद्विस्मरेच्चेत् ॥ ३३ ॥ स्वप्नावस्थानुभूतं शुभमथ विषमं तन्मृषा जागरे स्याज्जाग्रत्यां स्थूलदेहव्यवहृतिविषयं तन्मृषा स्वप्नकाले । इत्थं मिथ्यात्वसिद्धावनिशमुभयथा सज्जते तत्र मूढः सत्येतद्भासकेस्मिन्निह हि कुत इदं तन्न विद्मो वयं हि ॥ ३४ ॥ जीवंतं जाग्रतीह स्वजनमथ मृतं स्वप्नकाले निरीक्ष्य निर्वेदं यात्यकस्मान्मृतममृतममुं वीक्ष्य हर्षं प्रयाति । स्मृत्वाप्येतस्य जंतोर्निधनमसयुतिं भाषते तेन साकं सत्येवं भाति भूयोल्पक-

समयवशात्सत्यता वा मृषात्वम् ॥ ३५ ॥ स्वामस्त्रीसंगसौख्यादपि भृशमसतो या च रेतश्च्युतिः स्यात्साप्यद्दश्याच्चद्वदेतत्स्फुरति जगदसत्कारणं सत्यकल्पम् । स्वप्ने सत्यः पुमान्स्याद्युवतिरिह मृषैवानयोः संयुतिश्च प्रातः शुक्रेण वस्त्रोपहतिरिति यतः कल्पनामूलमेतत् ॥ ३६ ॥ पश्यंत्यारामममस्य प्रतिदिवसममी जंतवः स्वापकाले पश्यत्येनं न कश्चित्करणगणमृते मायया क्रीडमानम् । जाग्रत्यर्थव्रजानामथ च तनुभृतां भासकं चालकं वा नो जानीते सुषुप्तौ परमसुखमयं कश्चिदाश्चर्यमेतत् ॥३५॥ स्वप्ने मंत्रोपदेशः श्रवणपरिचितः सत्य एव प्रबोधे स्वामादेव प्रसादादभिलषितफलं सत्यतां प्रातरेति । सत्यप्राप्तिस्त्वसत्यादपि भवति तथा किं च तत्स्वप्रकाशं येनेदं भाति सर्वं चरमचरमथोच्चावचं दृश्यजातम् ॥ ३८ ॥ मध्यप्राणं सुषुप्तौ स्वजनिमनुविशंत्यग्निसूर्यादयोमी वागाद्याः प्राणवायुं तदिह निगदिता ग्लानिरेषां न वायोः । तेभ्यो दृश्यावभासो भ्रम इति विदितः शुक्तिकारौप्यकल्पः प्राणायामव्रतं तच्छ्रुतिशिरसि मतं स्वात्मलब्धौ न चान्यत् ॥ ३९ ॥ नोकस्मादार्द्रमेधः स्पृशति च दहनः किंतु शुष्कं निदाघादार्द्रं चेतोनुबंधैः कृतसुकृतमपि स्वोक्तकर्मप्रजार्थैः । तद्वज्ज्ञानाग्निरेतत्स्पृशति न सहसा किंतु वैराग्यशुष्कं तस्माच्छुद्धो विरागः प्रथममभिहितस्तेन विज्ञानसिद्धिः ॥ ४० ॥ यत्किंचिन्नामरूपात्मकमिदमसदेवोदितं भाति भूमौ येनानेकप्रकारैर्व्यवहरति जगद्येन तेनेश्वरेण ॥ तद्वत्प्रच्छादनीयं निभृतरशनया यद्वदेव द्विजिह्वस्तेन त्यक्तेन भोज्यं सुखमनतिशयं मा गृधोन्यद्धनाद्यम् ॥ ४१ ॥ जीवन्मुक्तिर्मुमुक्षोः प्रथममथ ततो मुक्तिरात्यंतिकी च तेऽभ्यासज्ञानयो-

गाद्गुरुचरणकृपापांगसंगेन लब्धात् । अभ्यासोपि द्विधा स्यादधिकरणवशादैहिको मानसश्च शारीरस्त्वासनाद्यो ह्युपरतिरपरो ज्ञानयोगः परोक्तः ॥ ४२ ॥ सर्वानुन्मूल्य कामान् हृदिकृतनिलयान्निक्षिप्तशंकुनिवोच्चैर्दीर्यद्देहाभिमानस्त्यजति चपलतामात्मदत्तावधानः । यात्यूर्ध्वस्थानमुच्चैः कृतसुकृतभरो नाडिकाभिर्विचित्रं नीलश्वेतारुणाभिः स्रवदमृतभरं गृह्यमाणात्मसौख्यः ॥ ४३ ॥ प्रापश्यद्विश्वमात्मेत्ययमिह पुरुषः शोकमोहाद्यतीतः शुक्रं ब्रह्माध्यगच्छत्स खलु सकलवित्सर्वसिद्ध्यास्पदं हि । विस्मृत्य स्थूलसूक्ष्मप्रभृतिवपुरसौ सर्वसंकल्पशून्यो जीवन्मुक्तस्तुरीयं पदमधिगतवान्पुण्यपापैर्विहीनः ॥ ४४ ॥ यः सत्त्वाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोपि तद्धर्मैर्बाल्यवार्ध्यादिभिरनुपहतः प्राण आविर्बभूव । श्रेयान्साध्यस्तमेतं सुनिपुणमतयः सत्यसंकल्पभाजोप्यभ्यासाद्देचयंतः परिणतमनसा साकमूर्ध्वं नयन्ति ॥४५॥ प्राप्तो कामोस्तकामो निरतिशयसुखायात्मकामस्तदासौ तत्प्राप्तावाप्तकामः स्थितचरमदशस्तस्य देहावसाने । प्राणा नैवोत्क्रमंति क्रमविरतिमिताः स्वस्वहेतौ तदानीं कायं जीवो विलीनो लवणमिव जलेऽखंड आत्मैव पश्चात् ॥ ४६ ॥ पिण्डीभूतं यदंतर्जलनिधिसलिलं याति तत्सैंधवाख्यं भूयः प्रक्षिप्तमस्मिन्विलयमुपगतं नामरूपं जहाति । प्राज्ञस्तद्वत्परात्मन्यथ भजति लयं तस्य चेतो हिमांशौ वागग्नौ चक्षुरर्के पयसि पुनरसृग्रेतसी दिक्षु कर्णौ ॥ ४७ ॥ क्षीरान्तर्यद्वदाज्यं मधुरिमविदितं तत्पृथग्भूतमस्माद्भूतेषु ब्रह्म तद्वद्व्यवहृतिविदितं श्रांतविश्रांतिबीजम् । यं लब्ध्वा लाभमन्यत्तृणमिव मनुते यत्र नोदेति भीतिः

सान्द्रानन्दं यदन्तः स्फुरति तदमृतं विद्ध्यतो ह्यन्यदार्तम्
॥ ४८ ॥ ओतः प्रोतश्च तंतुष्विह विततपटश्चित्रवर्णेषु चित्रस्त-
स्मिञ्जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः । तद्वद्विश्वं
विचित्रं नगनगरनरग्रामपश्वादिरूपं प्रोतं वैराजरूपे स वियति
तदपि ब्रह्मणि प्रोतमोतम् ॥ ४९ ॥ रूपं रूपं प्रतीदं प्रतिफल-
नवशात्प्रातिरूप्यं प्रपेदे । ह्येको द्रष्टा द्वितीयो भवति च सलिले
सर्वतोनंतरूपः इन्द्रो मायाभिरास्ते श्रुतिरिति वदति व्या-
पकं ब्रह्म तस्माज्जीवत्वं यात्यकस्मादतिविमलतरे बिम्बितं बुद्ध्यु-
पाधौ ॥ ५० ॥ तज्ज्ञाः पश्यन्ति बुद्ध्या परमब्रलवतो माय-
याक्तं पतङ्गं बुद्धावंतःसमुद्रे प्रतिफलितमरीच्यास्पदं वेधस-
स्तम् । यादृग्यावानुपाधिः प्रतिफलति तथा ब्रह्म तस्मिन्यथा-
स्यं प्रासादर्शानुरूपं प्रतिफलति यथावस्थितं तत्सदैवम् ॥५१॥
एको भानुस्तदर्थप्रतिफलनवशाद्यस्त्वनेकोदकांतर्नानात्वं यात्यु-
पाधिस्थितिगतिसमतां चापि तद्वत्परात्मा । भूतेषूच्चावचेषु
प्रतिफलित इवाभाति तावत्स्वभावावच्छिन्नो यः परंतु स्फुटम-
नुपहतो भाति तावत्स्वभावैः ॥ ५२ ॥ यद्वत्पीयूषरश्मौ दिन-
करकिरणैर्बिंबितैरेति सान्द्रं नाशं नैशं तमिस्रं गृहगतमथवा
मूर्छितैः कांस्यपात्रे । तद्वद्बुद्धौ परात्मद्युतिभिरनुपदं बिंबि-
ताभिः समंताद्भासन्ते हींद्रियास्यप्रसृतिभिरनिशं रूपमुख्याः
पदार्थाः ॥ ५३ ॥ पूर्णात्मानात्मभेदात्त्रिविधमिह परं बुद्ध्य-
वच्छिन्नमन्यत्तत्रैवाभासमात्रं गगनमिव जले त्रिप्रकारं विभाति ।
अम्भोवच्छिन्नमस्मिन्प्रतिफलितमतः पाथसोंतर्बहिश्च पूर्णाव-
च्छिन्नयोगे व्रजति लयमविद्या स्वकार्यैः सहैव ॥ ५४ ॥
दृश्यन्ते दारुनार्यो युगपदगणिताः स्तंभसूत्रप्रयुक्ताः संगीतं

दर्शयंस्त्यो व्यवहृतिमपरां लोकसिद्धां च सर्वाम् । सर्वत्रानुप्रविष्टाद्भिनवविभवाधावदर्थानुबंधात्तद्वत्सूत्रात्मसंज्ञाद्व्यवहरति जगद्भूर्भुवःस्वर्महान्तम् ॥ ५५ ॥ तत्सत्यं यत्रिकालेष्वनुपहतमदः प्राणदिग्व्योममुख्यं यस्मिन्विश्रान्तमास्ते तदिह निगदितं ब्रह्म सत्यस्य सत्यम् । नास्त्यन्यत्किंच यद्वत्परमधिकमतो नाम सत्यस्य सत्यं सच त्यचेति मूर्तोद्युपहितमवरं सत्यमस्यापि सत्यम् ॥ ५६ ॥ यत्किंचिद्भात्यसत्यं व्यवहृतिविषये रौप्यसर्पांबुमुख्यं तद्वै सत्याश्रयेणेत्ययमिह नियमः सावधिर्लोकसिद्धः । तद्वत्सत्यस्य सत्ये जगदखिलमिदं ब्रह्मणि प्राविरासीन्मिथ्याभूतं प्रतीतं भवति खलु यतस्तच्च सत्यं वदन्ति ॥ ५७ ॥ यत्राकाशावकाशः कलयति च कलामात्रतां यत्र कालो यत्रैवाशावसानं वृहदिह हि विराट्पूर्वमर्वागिवास्ते । सूत्रं यत्राविरासीन्महदपि महतस्ताद्धि पूर्णाच्च पूर्णं संपूर्णादर्णवादेरपि भवति यथा पूर्णमेकार्णवांभः ॥ ५८ ॥ अन्तः सर्वौषधीनां पृथगमितरसैर्गंधवीर्यैर्विपाकैरेकं पाथोदपाथः परिणमति यथा तद्वदेवान्तरात्मा । नानाभूतस्वभावैर्वहति वसुमती येन विश्वं पयोदो वर्षत्युच्चैर्हुताशः पचति दहति वा येन सर्वांतरोसौ ॥ ५९ ॥ भूतेष्वात्मानमात्मन्यनुगतमखिलं भूतजातं प्रपश्येत्प्रायः पाथस्तरंगान्वयवदथ चिरं सर्वमात्मैव पश्येत् । एकं ब्रह्माद्वितीयं श्रुतिशिरसि मतं नेह नानास्ति किंचिन्मृत्योराप्नोति मृत्युं स इह जगदिदं यस्तु नानेव पश्येत् ॥ ६० ॥ प्राक्पश्चादस्ति कुंभाद्गगनमिदमिति प्रत्यये सत्यपीदं कुम्भोत्पत्तावुदेति प्रलयमुपगते नश्यतीत्यन्यदेशम् । नीते कुंभेन साकं व्रजति भजति वा तत्प्रमाणानुकारमित्थं मिथ्या प्रती-

तिः स्फुरति तनुभृतां विश्वतस्तद्वदात्मा ॥ ६१ ॥ यावान्पिण्डो गुडस्य स्फुरति मधुरिमैवास्ति सर्वोऽपि तावान्यावान्कर्पूरपिण्डः परिणमति सदामोद एवात्र तावान् । विश्वं यावद्विभाति द्रुमनगनगरारामचैत्याभिरामं तावच्चैतन्यमेकं प्रविकसति यतस्तत्तदात्मावशेषम् ॥ ६२ ॥ वाद्यान्नादानुभूतिर्यदपि तदपि सा नूनमाघातगम्या वाद्याघातध्वनीनां पृथगनुभवतः किंतु तत्साहचर्यात् । मायोपादानमेतत्सहचरितमिव ब्रह्मणा भाति तद्वत्तस्मिन्प्रत्यक्प्रतीते न किमपि विपर्यीभावमाप्नोति यस्मात् ॥ ६३ ॥ दृष्टः साक्षादिदानीमिह खलु जगतामीश्वरः संविदात्मा विज्ञानस्थाणुरेको गगनवदभितः सर्वभूतान्तरात्मा । दृष्टं ब्रह्मातिरिक्तं सकलमिदमसद्रूपमाभासमात्रं शुद्धं ब्रह्माहमस्मीत्यविरतमधुनात्रैव तिष्ठेदनीहः ॥ ६४ ॥ इन्द्रेन्द्राण्योः प्रकामं सुरतसुखजुषोः स्याद्रतान्तः सुषुप्तिस्तस्यामानन्दसान्द्रं पदमतिगहनं यत्स आनंदकोशः । तस्मिन्नो वेद किंचिन्निरतिशयसुखाभ्यन्तरे लीयमानो दुःखी स्याद्बोधितः सन्निति कुशलमतिर्बोधयेनैव सुप्तम् ॥ ६५ ॥ सर्वे नन्दन्ति जीवा अधिगतयशसा गृह्णता चक्षुरादीनन्तःसर्वोपकर्त्रा बहिरपि च सुषुप्तौ यथा तुल्यसंस्थाः । एतेषां किल्बिषस्पृक् जठरभृतिकृते यो बहिर्वृत्तिरास्ते त्वक्चक्षुःश्रोत्रनासारसनवशमितो याति शोकं च मोहम् ॥ ६६ ॥ जाग्रत्यामन्तरात्मा विषयसुखकृतेऽनेकयत्नान्विधास्यन् श्राम्यत्सर्वेन्द्रियौघोऽधिगतमपि सुखं विस्मरन्याति निद्राम् । विश्रामाय स्वरूपे त्वतितरसुलभं तेन चातींद्रियं हि सौख्यं सर्वोत्तमं स्यात्परिणतिविरसादिंद्रियोत्थात्सुखाच्च॥६७॥ पक्षावभ्यस्य पक्षी जनयति मरुतं तेन यात्युच्चदेशं लब्ध्वा वायुं

महान्तं श्रममपनयति स्वीयपक्षौ प्रसार्य । दुःसंकल्पैर्विकल्पैर्विषयमनुकदर्थीकृतं चित्तमेतत्खिन्नं विश्रामहेतोः स्वपिति चिरमहो हस्तपादान्प्रसार्य ॥ ६८ ॥ आश्लिष्यात्मानमात्मा न किमपि सहसैवांतरं वेद बाह्यं यद्वत्कामी विदेशात्सदनमुपगतो गाढमाश्लिष्य कान्ताम् । यात्यस्तं तत्र लोकव्यवहृतिरखिला पुण्यपापानुबन्धः शोको मोहो भयं वा समविषममिदं न स्मरत्येव किंचित् ॥ ६९ ॥ अल्पानल्पप्रपंचप्रलय उपरतिश्चेंद्रियाणां सुखाप्तिर्जीवन्मुक्तौ सुषुप्तौ त्रितयमपि समं किंतु तत्रास्ति भेदः । प्राक्संस्कारात्प्रसुप्तः पुनरपि च परावृत्तिमेति प्रबुद्धो नश्यत्संस्कारजातो न स किल पुनरावर्तते यश्च मुक्तः ॥७०॥ आनन्दान्यश्च सर्वाननुभवति नृपः सर्वसंपत्समृद्धस्तस्यानन्दः स एकः स खलु शतगुणः संप्रतिष्ठः पितॄणाम् । आदेवब्रह्मलोकं शतशतगुणितास्ते यदन्तर्गताः स्युर्ब्रह्मानन्दः स एकोऽस्त्यथ विषयसुखान्यस्य मात्रा भवन्ति ॥ ७१ ॥ यत्रानन्दाश्च मोदाः प्रमद इति मुदश्चासते सर्व एते यत्राप्ताः सर्वकामाः स्युरखिलविरमात्केवलीभाव आस्ते । मां तत्रानंदसांद्रे कृधि चिरममृतं सोमपीयूषपूर्णां धारामिंद्राय देहीत्यपि निगमगिरो भ्रूयुगांतर्गताय ॥ ७२ ॥ आत्माकंपः सुखात्मा स्फुरति तदपरा त्वन्यथैव स्फुरंती स्थैर्यं वा चंचलत्वं मनसि परिणतिं याति तत्रत्यमस्मिन् । चांचल्यं दुःखहेतुर्मनस इदमहो यावदिष्टार्थलब्धिस्तस्यां यावत्स्थिरत्वं मनसि विषयजं स्यात्सुखं तावदेव ॥ ७३ ॥ यद्वत्सौख्यं रतान्ते निमिषमिह मनस्येकताने रसे स्यात्स्थैर्यं यावत्सुषुप्तौ सुखमनतिशयं तावदेवाथ मुक्तौ । नित्यानंदः प्रशांते हृदि तदिह सुखस्थैर्ययोः साहचर्यं नित्या-

नंदस्य मात्रा विषयसुखमिदं युज्यते तेन वक्तुम् ॥ ७४ ॥
श्रांतं स्वांतं सबाह्यव्यवहृतिभिरिदं ताः समाकृष्य सर्वास्तत्त-
त्संस्कारयुक्तं ह्युपरमति पराष्टत्तमिच्छभिदानम् । स्वाप्नान्सं-
स्कारजातप्रजनितविषयान् स्वाप्नदेहेनुभूतान् प्रोत्स्यांतः प्रत्य-
गात्मप्रवणमिदमगाद्भूरिविश्राममस्मिन् ॥ ७५ ॥ स्वप्ने भोगः
सुखादेर्भवति ननु कुतः साधने मूर्छमाने स्वाप्नं देहांतरं तद्व्य-
वहृतिकुशलं नव्यमुत्पद्यते चेत् । तत्सामग्र्या अभावात्कुत इद-
मुदितं तद्धि सांकल्पितं चेत्तत्किं स्वाप्ने रतांते वपुषि नियतिते
दृश्यते शुक्रमोक्षः ॥ ७६ ॥ भीत्या रोदित्यनेन प्रवदति हसति
श्लाघते नूनमस्मात्स्वप्नेप्यंगेनुबंधं त्यजति न सहसा मूर्छितेप्यं-
तरात्मा । पूर्वं ये येनुभूतास्तनुयुवतिहयव्याघ्रदेशादयोर्थास्तत्सं-
स्कारस्वरूपान्स्रजति पुनरमून् श्रित्य संस्कारदेहम् ॥ ७७ ॥
सन्धौ जाग्रत्सुषुप्त्योरनुभवविदिता स्वाप्न्यवस्था द्वितीया तत्रा-
त्मज्योतिरास्ते पुरुष इह समाकृष्य सर्वेंद्रियाणि । संवेश्य
स्थूलदेहं समुचितशयने स्वीयभासांतरात्मा पश्यन्संस्काररूपा-
नभिमतविषयान्याति कुत्रापि तद्वत् ॥ ७८ ॥ रक्षन् प्राणैः
कुलायं निजशयनगतं श्वासमात्रावशेषैर्माभूत्तत्प्रेतकल्पाकृतक-
मिति पुनः सारमेयादिभक्ष्यम् । स्वप्ने स्वीयप्रभावात्स्रजति
हयरथान्निम्नगाः पल्वलानि क्रीडास्थानान्यनेकान्यपि सुहृदव-
रापुत्रमित्रानुकारान् ॥ ७९ ॥ मातंगव्याघ्रदस्युद्विपदुरगकपी-
न्कुत्रचित्प्रेयसीभिः क्रीडन्नास्ते हसन्वा विहरति कुहचिन्मृष्टम-
श्नाति चान्नम् । म्लेच्छत्वं प्राप्तवानस्म्यहमिति कुहचिच्छंकितः
स्वीयलोकादास्ते व्याघ्रादिभीत्या प्रचलति कुहचिद्रोदिति ग्रस्य-
मानः ॥८०॥ यो यो दृग्गोचरोर्थो भवति स स तदा तद्गतात्म-

स्वरूपाविज्ञानोत्पद्यमानः स्फुरति ननु यथा शुक्तिकाज्ञानहेतुः । रौप्याभासो मृषैव स्फुरति च किरणाज्ञानतोंभो भुजंगो रज्ज्वज्ञानान्निमेषं सुखभयकृदतो दृष्टसृष्टं किलेदम् ॥ ८१ ॥ मायाध्यासाश्रयेण प्रविततमखिलं यन्मया तेन मत्स्थान्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्ये । शुक्त्यंशस्तेन भूतान्यपि मयि निवसंतीति विष्वग्निनेता प्राहासादृश्यजातं सकलमपि मृषैवेंद्रजालोपमेयम् ॥ ८२ ॥ हेतुः कर्मैव लोके सुखतदितरयोरेवमज्ञोऽविदित्वा मित्रं वा शत्रुरित्थं व्यवहरति मृषा याज्ञवल्क्यार्तभागौ । यत्कर्मैवोचतुः प्राक् जनकनृपगृहे चक्रतुस्तत्प्रशंसां वंशोत्तंसो यदूनामिति वदति न कोप्यत्र तिष्ठत्यकर्मा ॥ ८३ ॥ वृक्षच्छेदे कुठारः प्रभवति यदपि प्राणिनोद्यस्तथापि प्रायोन्नं तृप्तिहेतुस्तदपि निगदितं कारणं भोक्तृयत्नः । प्राचीनं कर्म तद्वद्विषमसमफलप्राप्तिहेतुस्तथापि स्वातंत्र्यं नश्वरेस्मिन्न हि खलु घटते प्रेरकोस्यांतरात्मा ॥ ८४ ॥ स्मृत्वा लोकेषु वर्णाश्रमविहितमदो नित्यकाम्यादिकर्म सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरन्तेतिरम्यम् । यन्नासानेत्रजिह्वाकरचरणशिरःश्रोत्रसंतर्पणेन तुष्येदंगीव साक्षात्तरुरिव सकलो मूलसंतर्पणेन ॥ ८५ ॥ यः प्रैत्यात्मानभिज्ञः श्रुतिविदपि तथा कर्मकृत्कर्मणोस्य नाशः स्यादल्पभोगात्पुनरवतरणे दुःखभोगो महीयान् । आत्माभिज्ञस्य लिप्सोरपि भवति महान्शाश्वतः सिद्धिभोगो ह्यात्मा तस्मादुपास्यः खलु तदधिगमे सर्वसौख्यान्यलिप्सोः ॥ ८६ ॥ सूर्याद्यैरर्थभानं न हि भवति पुनः केवलैर्नात्र चित्रं सूर्यात्सूर्यप्रतीतिर्न भवति सहसा नापि चंद्रस्य चंद्रात् । अग्नेरग्नेश्च किंतु स्फुरति रविमुखं चक्षु-

यश्चिद्भ्रयुक्तादात्मज्योतिस्ततोयं पुरुष इह महो देवतानां च चित्रम् ॥ ८७ ॥ प्राणेनांभांसि भूयः पिबति पुनरसावन्नमश्नाति तत्र तत्पाकं जाठरोग्निस्तदुपहितबलो द्राक् शनैर्वा करोति । व्यानः सर्वांगनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं निःसारं पूतिगंधं त्यजति बहिरयं देहतोपानसंज्ञः ॥ ८८ ॥ व्यापारं देहसंस्थः प्रतिवपुरखिलं पंचवृत्त्यात्मकोसौ प्राणः सर्वेंद्रियाणामधिपतिरनिशं सत्त्वया निर्विवादम् । यस्येत्थं चिद्धनस्य स्फुटमिह कुरुते सोसि सर्वस्य साक्षी प्राणस्य प्राण एषोप्यखिलतनुभृतां चक्षुषश्चक्षुरेषः ॥ ८९ ॥ यं भांतं चिद्धनैकं क्षितिजलपवनादित्यचन्द्रादयो ये भासा तस्यैव चानु प्रविरलगतयो भांति तस्मिन्वसंति । विद्युत्पुंजोग्निसंघोप्युडुगणविततिर्भासयेत्किं परेशं ज्योतिः शांतं ह्यनंतं कविमजममरं शाश्वतं जन्मशून्यम् ॥ ९० ॥ तद्ब्रह्मैवाहमस्मीत्यनुभव उदितो यस्य कस्यापि चेद्वै पुंसः श्रीसद्गुरूणामतुलितकरुणापूर्णपीयूषदृष्ट्या । जीवन्मुक्तः स एव भ्रमविधुरमना निर्गतेनाद्युपाधौ नित्यानंदैकधाम प्रविशति परमं नष्टसंदेहवृत्तिः ॥ ९१ ॥ नो देहो नेंद्रियाणि क्षरमतिचपलं नो मनो नैव बुद्धिः प्राणो नैवाहमस्मीत्यखिलजडमिदं वस्तुजातं कथं स्याम् । नाहंकारो न दारागृहसुतसुजनक्षेत्रवित्तादि दूरं साक्षी चित्प्रत्यगात्मा निखिलजगदधिष्ठानभूतः शिवोहम् ॥ ९२ ॥ दृश्यं यद्रूपमेतद्भवति च विशदं नीलपीताद्यनेकं सर्वस्यैतस्य दृग्वै स्फुरदनुभवता लोचनं चैकरूपम् । तद्दृश्यं मानसं दृक् परिणतविषयाकारधीवृत्तयोपि दृश्या दृग्रूप एव प्रभुरिह स तथा दृश्यते नैव साक्षी ॥ ९३ ॥ रज्ज्वज्ञानाद्भुजंगस्तदुपरि सहसा भाति मंदा-

न्धकारे स्वात्माज्ञानाच्चथासौ भृशमसुखमभूदात्मनो जीवभावः । आप्तोक्त्याहिभ्रमांते स च खलु विदिता रज्जुरेका तथाहं कूटस्थो नैव जीवो निजगुरुवचसा साक्षिभूतः शिवोहम् ॥९४॥ किं ज्योतिस्ते वदस्वाहनि रविरिह मे चंद्रदीपादि रात्रौ स्यादेवं भानुदीपादिकपरिकलने किं तव ज्योतिरस्ति । चक्षुस्तन्मीलने किं भवति च सुतरां धीर्धियः किं प्रकाशे तत्रैवाहं ततस्त्वं तदसि परमकं ज्योतिरस्मि प्रभोहम् ॥ ९५ ॥ कंचित्कालं स्थितः कौ पुनरिह भजते नैव देहादिसंघं यावत्प्रारब्धभोगं कथमपि स सुखं चेष्टते संगबुद्ध्या । निर्द्वंद्वो नित्यशुद्धो विगलितममताहंकृतिर्नित्यतृप्तो ब्रह्मानंदस्वरूपः स्थिरमतिरचलो निर्गताशेषमोहः ॥ ९६ ॥ जीवात्मब्रह्मभेदं दलयति सहसा यत् प्रकाशैकरूपं विज्ञानं तच्च बुद्धौ समुदितमतुलं यस्य पुंसः पवित्रम् । माया तेनैव तस्य क्षयमुपगमिता संस्तेः कारणं या नष्टा सा कार्यकर्त्री पुनरपि भविता नैव विज्ञानमात्रात् ॥ ९७ ॥ विश्वं नेति प्रमाणाद्विगलितजगदाकारभानस्त्यजेद्वै पीत्वा यद्वत्फलांभस्त्यजति च सुतरां तत्फलं सौरभाढ्यम् । सम्यक् सच्चिद्घनैकामृतसुखकवलास्वादपूर्णो हृदासौ ज्ञात्वा निःसारमेवं जगदखिलमिदं स्वप्रभः शांतचित्तः ॥ ९८ ॥ क्षीयंते चास्य कर्माण्यपि खलु हृदयग्रंथिरुद्भिद्यते वै छिद्यंते संशया ये जनिमृतिफलदा दृष्टमात्रे परेशे । तस्मिंश्चिन्मात्ररूपे *गुणमलरहिते तत्त्वमस्यादिलक्ष्ये कूटस्थे प्रत्यगात्मन्यखिलविधिमनोगोचरे* ब्रह्मणीशे ॥ ९९ ॥ आदौ मध्ये तथांते जनिमृतिफलदं कर्ममूलं विशालं ज्ञात्वा संसारवृक्षं भ्रममदमुदिताशोकतानेकपत्रम् । कामक्रोधादिशाखं सततगवनिताकन्यका-

पक्षिसंघं छित्त्वासंगासिनैनं पटुमतिरभितश्चिंतयेद्वासुदेवम् ॥ ॥ १०० ॥ जातं मय्येव सर्वं पुनरपि मयि तत्संस्थितं चैव विश्वं सर्वं मय्येव याति प्रविलयमिति तद्ब्रह्म चैवाहमस्मि । यस्य स्मृत्या च यज्ञाद्यखिलशुभविधौ सुप्रयातीह कार्यं न्यूनं संपूर्णतां वै तमहमतिमुदैवाच्युतं सन्नतोस्मि ॥ १०१ ॥ इति श्रीमच्छंकराचार्यकृतशतश्लोकी संपूर्णा ॥ ३० ॥

विवेकचूडामणिः ॥ ३१ ॥

ॐ परमात्मने नमः ॥ सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् । गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥ जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् । आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना-संस्थितिर्मुक्तिर्नो शतकोटिजन्मसुकृतैः पुण्यैर्विना लभ्यते ॥ २ ॥ दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् । मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥ ३ ॥ लब्ध्वा कथंचिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् । यस्त्वात्ममुक्त्यै न यतेत मूढधीः स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥ ४ ॥ इतः कोन्योऽस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति । दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ॥५॥ वदन्तु शास्त्राणि यजन्तु देवान् कुर्वन्तु कर्माणि भजन्तु देवताः । आत्मैक्यबोधेन विनापि मुक्तिर्न सिद्ध्यति ब्रह्मशतान्तरेऽपि ॥ ६ ॥ अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः । ब्रवीति कर्मणो मुक्तेरहेतुत्वं स्फुटं यतः ॥ ७ ॥ अतो विमुक्त्यै प्रयतेत विद्वान् संन्यस्तबाह्यार्थसुखस्पृहः सन् । सन्तं महान्तं समुपेत्य

देशिकं तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥ उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ । योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥ ९ ॥ संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये । यत्यतां पण्डितैर्धीरैरात्माभ्यास उपस्थितः ॥ १० ॥ चित्तस्य शुद्धये कर्म नतु वस्तूपलब्धये । वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥ ११ ॥ सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा । भ्रान्त्योदितमहासर्पभयदुःखविनाशिनी ॥ १२ ॥ अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः । न स्नानेन न दानेन प्राणायामशतेन वा ॥ १३ ॥ अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः । उपाया देशकालाद्याः सन्त्यस्मिन्सहकारिणः ॥१४॥ अतो विचारः कर्तव्यो मुमुक्षोरात्मवस्तुनः । समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम् ॥ १५ ॥ मेधावी पुरुषो विद्वानूहापोहविचक्षणः । अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः ॥१६॥ विवेकिनो विरक्तस्य शमादिगुणशालिनः । मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥ १७ ॥ साधनान्यत्र चत्वारि कथितानि मनीषिभिः । येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति ॥ १८ ॥ आदौ नित्याऽनित्यवस्तुविवेकः परिगण्यते । इहामुत्रफलभोगविरागस्तदनन्तरम् ॥ १९ ॥ शमादिषट्कसंपत्तिर्मुमुक्षुत्वमिति स्फुटम् । ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः ॥ २० ॥ सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः । तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः ॥ २१ ॥ देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि । विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ॥ २२ ॥ स्वलक्ष्ये नियतावस्था मनसः शम उच्यते । विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके

॥ २३ ॥ उभयेषामिन्द्रियाणां स दमः परिकीर्तितः । बाह्या-
नालम्बनं वृत्तेरेषोपरतिरुत्तमा ॥ २४ ॥ सहनं सर्वदुःखाना-
मप्रतीकारपूर्वकम् । चिन्ताविलापरहितं सा तितिक्षा निगद्यते
॥ २५ ॥ शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् । सा श्रद्धा
कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २६ ॥ सर्वदा स्थापनं
बुद्धेः शुद्धे ब्रह्मणि सर्वदा । तत्समाधानमित्युक्तं नतु चित्त-
स्य लालनम् ॥ २७ ॥ अहंकारादिदेहान्तान्बन्धानज्ञानकल्पि-
तान् । स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥ २८ ॥
मन्दमध्यमरूपापि वैराग्येण शमादिना । प्रसादेन गुरोः सेयं
प्रवृद्धा सूयते फलम् ॥ २९ ॥ वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य
तु विद्यते । तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः
॥ ३० ॥ एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः । मरौ सलि-
लवत्तत्र शमादेर्भानमात्रता ॥ ३१ ॥ मोक्षकारणसामग्र्यां
भक्तिरेव गरीयसी । स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते
॥ ३२ ॥ स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः । उक्त-
साधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः ॥ ३३ ॥ उपसीदेद्गुरुं प्राज्ञं
यस्माद्बन्धविमोक्षणम् । श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्म-
वित्तमः ॥ ३४ ॥ ब्रह्मण्युपरतः शान्तो निरिन्धन इवानिलः ।
अहेतुकदयासिन्धुर्बन्धुरानमतां सताम् ॥ ३५ ॥ तमाराध्य
गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः । प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञात-
व्यमात्मनः ॥ ३६ ॥ स्वामिन्नमस्ते नतलोकबन्धो कारुण्यसि-
न्धो पतितं भवाब्धौ । मामुद्धरात्मीयकटाक्षदृष्ट्या ऋज्व्याऽ-
तिकारुण्यसुधाभिवृष्ट्या ॥ ३७ ॥ दुर्वारसंसारदवाग्नितप्तं
दोधूयमानं दुरदृष्टवातैः । भीतं प्रपन्नं परिपाहि मृत्योः शर-

ण्यमन्यद्दहं न जाने ॥ ३८ ॥ शान्ता महान्तो निवसन्ति
सन्तो वसन्तवल्लोकहितं चरन्तः । तीर्णाः स्वयं भीमभवार्णवं
जना न हेतुनान्यानपि तारयन्तः ॥ ३९ ॥ अयं स्वभावः
स्वत एव यत्परश्रमापनोदप्रवणं महात्मनाम् । सुधांशुरेष
स्वयमर्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥ ४० ॥
ब्रह्मानन्दरसानुभूतिकलितैः पूतैः सुशीतैर्युतैर्युष्मद्वाक्कलशोज्झि-
तैः श्रुतिसुखैर्वाक्यामृतैः सेचय । संतप्तं भवतापदावदहनज्वा-
लाभिरेनं प्रभो धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः
स्वीकृताः ॥ ४१ ॥ कथं तरेयं भवसिन्धुमेतं का वा गतिर्मे
कतमोऽस्त्युपायः । जाने न किंचित्कृपयाऽव मां प्रभो संसार-
दुःखक्षतिमातनुष्व ॥ ४२ ॥ तथा वदन्तं शरणागतं स्वं
संसारदावानलतापतप्तम् । निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या दद्या-
दभीतिं सहसा महात्मा ॥ ४३ ॥ विद्वान्स तस्मा उपस-
त्तिमीयुषे मुमुक्षवे साधु यथोक्तकारिणे । प्रशान्तचित्ताय
शमान्विताय तत्त्वोपदेशं कृपयैव कुर्यात् ॥ ४४ ॥ मा
भैष्ट विद्वंस्तव नास्त्यपायः संसारसिन्धोस्तरणेऽस्त्युपायः ।
येनैव याता यतयोऽस्य पारं तमेव मार्गं तव निर्दि-
शामि ॥ ४५ ॥ अस्त्युपायो महान्कश्चित्संसारभयनाशनः ।
तेन तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यसि ॥ ४६ ॥ वेदा-
न्तार्थविचारेण जायते ज्ञानमुत्तमम् । तेनात्यन्तिकसंसार-
दुःखनाशो भवत्यनु ॥ ४७ ॥ श्रद्धाभक्तिध्यानयोगान्मुमुक्षो-
र्मुक्तेर्हेतून्वक्ति साक्षाच्छ्रुतेर्गीः । यो वा एतेष्वेव तिष्ठत्यमुष्य
मोक्षोऽविद्याकल्पिताद्देहबन्धात् ॥ ४८ ॥ अज्ञानयोगात्परमा-
त्मनस्तव ह्यनात्मबन्धस्तत एव संसृतिः । तयोर्विवेकोदितबो-

धवह्निरज्ञानकार्यं प्रदहेत्समूलम् ॥ ४९ ॥ कृपया श्रूयतां स्वामिन्प्रश्नोऽयं क्रियते मया । यदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥ ५० ॥ को नाम बन्धः कुत एष आगतः कथं प्रतिष्ठाऽस्य कथं विमोक्षः । कोऽसावनात्मा परमः स्व आत्मा तयोर्विवेकः कथमेतदुच्यताम् ॥ ५१ ॥ धन्योऽसि कृतकृत्योऽसि पावितं ते कुलं त्वया । यदविद्याबन्धमुक्त्या ब्रह्मीभवितुमिच्छसि ॥ ५२॥ ऋणमोचनकर्तारः पितुः सन्ति सुतादयः। बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन ॥ ५३ ॥ मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते । क्षुधादिकृतदुःखं तु विना स्वेन न केनचित् ॥ ५४ ॥ पथ्यमौषधसेवा च क्रियते येन रोगिणा । आरोग्यसिद्धिर्दृष्टाऽस्य नान्यानुष्ठितकर्मणा ॥ ५५॥ वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं ननु पण्डितेन । चन्द्रस्वरूपं निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किम् ॥ ५६ ॥ अविद्याकामकर्मादि पाशबन्धं विमोचितुम् । कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५७ ॥ न योगेन न सांख्येन कर्मणा नो न विद्यया । ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा ॥ ५८ ॥ वीणाया रूपसौन्दर्यं तन्त्रीवादनसौष्ठवम् । प्रजारञ्जनमात्रं तन्न साम्राज्याय कल्पते ॥ ५९ ॥ वाग्वैखरीशब्दझरी शास्त्रव्याख्यानकौशलम् । वैदुष्यं विदुषां मध्ये भुक्तये न तु मुक्तये ॥ ६० ॥ अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला । विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥ ६१ ॥ शब्दजालं महारण्यं चित्तभ्रमणकारणम् । अतः प्रयत्नाज्ज्ञातव्यं तत्त्वज्ञात्तत्त्वमात्मनः ॥ ६२ ॥ अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना । किमु वेदैश्च शास्त्रैश्च किमु मन्त्रैः किमौ-

पधैः ॥ ६३ ॥ न गच्छति विना पानं व्याधिरौषधशब्दतः । विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥ ६४ ॥ अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः । बाह्यशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम् ॥ ६५ ॥ अकृत्वा शत्रुसंहारमगत्वाऽखिलभूश्रियम् । राजाहमिति शब्दान्नो राजा भवितुमर्हति ॥ ६६ ॥ आप्तोक्तिं खननं तथोपरि शिलाद्युत्कर्षणं स्वीकृतिं निक्षेपः समपेक्षते न हि बहिः शब्दैस्तु निर्गच्छति । तद्वद्ब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते मायाकार्यतिरोहितं स्वममलं तत्त्वं न दुर्युक्तिभिः ॥ ६७ ॥ तस्मात्सर्वप्रयत्नेन भवबन्धविमुक्तये । स्वैरेव यत्नः कर्तव्यो रोगादाविव पण्डितैः ॥ ६८ ॥ यस्त्वयाद्य कृतः प्रश्नो वरीयाञ्छास्त्रविन्मतः । सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६९ ॥ शृणुष्वावहितो विद्वन् यन्मया समुदीर्यते । तदेतच्छ्रवणात्सद्यो भवबन्धाद्विमोक्ष्यसे ॥ ७० ॥ मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यन्तमनित्यवस्तुषु । ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥ ७१ ॥ ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं नित्यनिरन्तरं मुनेः । ततो विकल्पं परमेत्य विद्वानिहैव निर्वाणसुखं समृच्छति ॥ ७२ ॥ यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम् । तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय ॥ ७३ ॥ मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम् । पादोरुवक्षोभुजपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत् ॥ ७४ ॥ अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः । नभोनभस्वद्दहनाम्बुभूमयः सूक्ष्माणि भूतानि भवन्ति तानि ॥ ७५ ॥ परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः । मात्रास्त-

दीया विषया भवन्ति शब्दादयः पञ्च सुखाय भोक्तुः ॥ ७६॥ य एषु मूढा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन । आयान्ति निर्यान्त्यध ऊर्ध्वमुच्चैः स्वकर्मदूतेन जवेन नीताः ॥ ७७ ॥ शब्दादिभिः पञ्चभिरेव पञ्च पञ्चत्वमापुः स्वगुणेन बद्धाः । कुरङ्गमातङ्गपतङ्गमीनभृङ्गा नरः पञ्चभिरञ्चितः किम् ॥ ७८॥ दोषेण तीव्रो विषयः कृष्णसर्पविषादपि । विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ॥ ७९ ॥ विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात् । स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥ ८० ॥ आपातवैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान् । आशाग्रहो मज्जयतेऽन्तराले निगृह्य कण्ठे विनिवर्त्य वेगात् ॥ ८१ ॥ विषयाख्यग्रहो येन सुविरक्त्यसिना हतः । स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः ॥ ८२ ॥ विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः प्रतिपदमभियातो मृत्युरप्येष विद्धि । हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या प्रभवति फलसिद्धिः सत्यमित्येव विद्धि ॥ ८३ ॥ मोक्षस्य काङ्क्षा यदि वै तवास्ति त्यजातिदूराद्विषयान्विषं यथा । पीयूषवत्तोषदयाक्षमार्जवप्रशान्तिदान्तीर्भज नित्यमादरात् ॥ ८४ ॥ अनुक्षणं यत्परिहृत्य कृत्यमनाद्यविद्याकृतबन्धमोक्षणम् । देहः परार्थोऽयममुष्य पोषणे यः सज्जते स स्वमनेन हन्ति ॥ ८५ ॥ शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति । ग्राहं दारुधिया धृत्वा नदीं तर्तुं स गच्छति ॥ ८६ ॥ मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु । मोहो विनिर्जितो येन स मुक्तिपदमर्हति ॥ ८७ ॥ मोहं जहि महामृत्युं देहदारसुतादिषु । यं जित्वा मुनयो यान्ति तद्विष्णोः परमं पदम् ॥ ८८ ॥ त्वङ्मांसरुधिर-

स्नायुमेदोमज्जास्थिसंकुलम् । पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥ ८९ ॥ पञ्चीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा । समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः । अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ॥ ९० ॥ बाह्येन्द्रियैः स्थूलपदार्थसेवां स्रक्चन्दनस्त्र्यादिविचित्ररूपाम् । करोति जीवः स्वयमेतदात्मना तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥ ९१ ॥ सर्वोऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः । विद्धि देहमिदं स्थूलं गृहवद्गृहमेधिनः ॥ ९२ ॥ स्थूलस्य संभवजरामरणानि धर्माः स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः । वर्णाश्रमादिनियमा बहुधामयाः स्युः पूजावमानबहुमानमुखा विशेषाः ॥ ९३ ॥ बुद्धीन्द्रियाणि श्रवणं त्वगक्षि घ्राणं च जिह्वा विषयावबोधनात् । वाक्पाणिपादा गुदमप्युपस्थः कर्मेन्द्रियाणि प्रवणेन कर्मसु ॥ ९४ ॥ निगद्यतेऽन्तःकरणं मनोधीरहंकृतिश्चित्तमिति स्ववृत्तिभिः । मनस्तु संकल्पविकल्पनादिभिर्बुद्धिः पदार्थाध्यवसायधर्मतः ॥ ९५ ॥ अत्राभिमानादहमित्यहंकृतिः । स्वार्थानुसन्धानगुणेन चित्तम् ॥ ९६ ॥ प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः । स्वयमेव वृत्तिभेदाद्विकृतेर्भेदात्सुवर्णसलिलवत् ॥ ९७ ॥ वागादिपञ्च श्रवणादिपञ्च प्राणादिपञ्चाभ्रमुखानि पञ्च । बुद्ध्याद्यविद्यापि च कामकर्मणी पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९८ ॥ इदं शरीरं शृणु सूक्ष्मसंज्ञितं लिङ्गं त्वपञ्चीकृतभूतसंभवम् । सवासनं कर्म फलानुभावकं स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९९ ॥ स्वप्नो भवत्यस्य विभक्त्यवस्था स्वमात्रशेषेण विभाति यत्र । स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्कालीननानाविधवास-

नाभिः ॥१००॥ कर्त्रादिभावं प्रतिपद्य राजते यत्र स्वयं भाति ह्ययं परात्मा । धीमात्रकोपाधिरशेषसाक्षी न लिप्यते तत्कृतकर्मलेशैः ॥ यस्मादसङ्गस्तत एव कर्मभिर्न लिप्यते किंचिदुपाधिना कृतैः ॥ १०१ ॥ सर्वं व्यापृतिकरणं लिङ्गमिदं स्याच्चिदात्मनः पुंसः । वास्यादिकमिव तक्ष्णस्तेनैवात्मा भवत्यसङ्गोऽयम् ॥ १०२ ॥ अन्धत्वमन्दत्वपटुत्वधर्माः सौगुण्यवैगुण्यवशाद्धि विद्धि । बाधिर्यमूकत्वमुखास्तथैव श्रोत्रादिधर्मा नतु वेत्तुरात्मनः ॥ १०३ ॥ उच्छ्वासनिःश्वासविजृम्भणक्षुत्प्रस्पन्दनाद्युत्क्रमणादिकाः क्रियाः । प्राणादिकर्माणि वदन्ति तज्ज्ञाः प्राणस्य धर्मावशनापिपासे ॥ १०४ ॥ अन्तःकरणमेतेषु चक्षुरादिषु वर्ष्मणि । अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥ १०५ ॥ अहंकारः स विज्ञेयः कर्ता भोक्ताभिमान्ययम् । सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते ॥ १०६ ॥ विषयाणामानुकूल्ये सुखी दुःखी विपर्यये । सुखं दुःखं च तद्धर्मः सदानन्दस्य नात्मनः ॥ १०७ ॥ आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः । स्वत एव हि सर्वेषामात्मा प्रियतमो यतः ॥ १०८ ॥ तत आत्मा सदानन्दो नास्य दुःखं कदाचन । यत्सुषुप्तौ निर्विषय आत्मानन्दोऽनुभूयते ॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ १०९ ॥ अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा । कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥ ११० ॥ सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो । साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा ॥ १११ ॥ शुद्धाद्वयब्रह्मविबोधनाश्या सर्पभ्रमो रज्जुविवेकतो यथा । रज-

स्तमः सत्वमिति प्रसिद्धा गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥ ॥ ११२ ॥ विक्षेपशक्ती रजसः क्रियात्मिका यतः प्रवृत्तिः प्रसृता पुराणी । रागादयोऽस्याः प्रभवन्ति नित्यं दुःखादयो मे मनसो विकाराः ॥ ११३ ॥ कामक्रोधो लोभदम्भाद्यसूया अहंकारेर्ष्यामत्सराद्यास्तु घोराः । धर्मा एते राजसाः पुंप्रवृत्ति- र्यस्मादेषा तद्रजो बन्धहेतुः ॥ ११४ ॥ एषा वृत्तिर्नाम तमो- गुणस्य शक्तिर्यया वस्त्ववभासतेऽन्यथा । सैषा निदानं पुरुषस्य संसृतेर्विक्षेपशक्तेः प्रवणस्य हेतुः ॥ ११५ ॥ प्रज्ञावानपि प- ण्डितोऽपि चतुरोऽप्यत्यन्तसूक्ष्मात्मदृक् । व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोऽपि भृशम् । भ्रान्त्यारोपितमेव साधु कलयत्यालम्बते तद्गुणान् हन्तासौ प्रबला दुरन्ततमसः शक्ति- र्महत्यावृतिः ॥ ११६ ॥ अभावना वा विपरीतभावना संभा- वना विप्रतिपत्तिरस्याः । संसर्गयुक्तं न विमुञ्चति ध्रुवं विक्षेप- शक्तिः क्षपयत्यजस्रम् ॥ ११७ ॥ अज्ञानमालस्यजडत्वनिद्रा- प्रमादमूढत्वमुखास्तमोगुणाः । एतैः प्रयुक्तो नहि वेत्ति किंचित् निद्रालुवत्स्तम्भवदेव तिष्ठति ॥ ११८ ॥ सत्त्वं विशुद्धं जलव- त्तथापि ताभ्यां मिलित्वा शरणाय कल्पते । यत्रात्मबिम्बः प्रतिबिम्बितः सन् प्रकाशयत्यर्क इवाखिलं जगत् ॥ ११९ ॥ मिश्रस्य सत्त्वस्य भवन्ति धर्माः स्त्वमानिताद्या नियमा यमा- द्याः । श्रद्धा च भक्तिश्च मुमुक्षुता च दैवी च संपत्तिरसन्नि- वृत्तिः ॥ १२० ॥ विशुद्धसत्त्वस्य गुणाः प्रसादः स्वात्मानुभूतिः परमा प्रशान्तिः । तृप्तिः प्रहर्षः परमात्मनिष्ठा यया सदानन्द- रसं समृच्छति ॥ १२१ ॥ अव्यक्तमेतत्त्रिगुणैर्निरुक्तं तत्कारणं नाम शरीरमात्मनः । सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीनसर्व-

न्द्रियबुद्धिर्वृत्तिः ॥ १२२ ॥ सर्वप्रकारप्रमितिप्रशान्तिर्बीजात्मनावस्थितिरेव बुद्धेः । सुषुप्तिरेतस्य किल प्रतीतिः किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥ १२३ ॥ देहेन्द्रियप्राणमनोऽहमादयः सर्वे विकारा विषयाः सुखादयः । व्योमादिभूतान्यखिलं च विश्वमव्यक्तपर्यन्तमिदं ह्यनात्मा ॥ १२४ ॥ माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम् । असदिदमनात्मकत्वं विद्धि मरुमरीचिकाकल्पम् ॥ १२५ ॥ अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः । यद्विज्ञाय नरो बन्धान्मुक्तः कैवल्यमश्नुते ॥ १२६ ॥ अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययगोचरः । अवस्थात्रयसाक्षी सन् पञ्चकोशविलक्षणः ॥ १२७ ॥ यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु । बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥ १२८ ॥ यः पश्यति स्वयं सर्वं यं न पश्यति कश्चन । यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२९ ॥ येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किंचन । आभारूपमिदं सर्वं तं भान्तमनु भात्ययम् ॥ १३० ॥ यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः । विषयेषु स्वकीयेषु वर्तन्ते प्रेरिता इव ॥ १३१ ॥ अहंकारादिदेहान्ता विषयाश्च सुखादयः । वेद्यन्ते घटवद्येन नित्यबोधस्वरूपिणा ॥ १३२ ॥ एषोऽन्तरात्मा पुरुषः पुराणो निरन्तराखण्डसुखानुभूतिः । सदैकरूपः प्रतिबोधमात्रो येनेषिता वागसवश्चरन्ति ॥ १३३ ॥ अत्रैव सत्त्वात्मनि धीगुहायामव्याकृताकाश उशत्प्रकाशः । आकाश उच्चै रविवत्प्रकाशते स्वतेजसा विश्वमिदं प्रकाशयन् ॥ १३४ ॥ ज्ञाता मनोहंकृतिविक्रियाणां देहेन्द्रियप्राणकृतक्रियाणाम् । अयोऽग्निवत्तानुवर्तमानो न चेष्टते नो विकरोति किंचन ॥१३५॥ न जायते नो म्रियते न वर्धते न क्षीयते नो

हेतुफलानि नित्यम् ॥ १७९ ॥ असङ्गचिद्रूपममुं विमोह्य देहेन्द्रियप्राणगुणैर्निबध्य । अहंममेति भ्रमयत्यजस्रं मनः स्वकृत्येषु फलोपभुक्तिषु ॥ १८० ॥ अध्यासदोषात्पुरुषस्य संसृतिरध्यासबन्धस्त्वमुनैव कल्पितः । रजस्तमोदोषवतो विवेकिनो जन्मादिदुःखस्य निदानमेतत् ॥ १८१ ॥ अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः । येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम् ॥ १८२ ॥ तन्मनःशोधनं कार्यं प्रयत्नेन मुमुक्षुणा । विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते ॥ १८३ ॥ मोक्षैकसक्त्या विषयेषु रागं निर्मूल्य संन्यस्य च सर्वकर्म । सच्छ्रद्धया यः श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः ॥१८४॥ मनोमयो नापि भवेत्परात्मा ह्याद्यन्तवत्त्वात्परिणामिभावात् । दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टा हि दृश्यात्मतया न दृष्टः ॥१८५॥ बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः । विज्ञानमयकोशः स्यात्पुंसः संसारकारणम् ॥ १८६ ॥ अनुव्रजच्चित्प्रतिबिम्बशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः । ज्ञानक्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते भृशम् ॥ १८७ ॥ अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढा । करोति कर्माण्यपि पूर्ववासनः पुण्यान्यपुण्यान्यपि तत्फलानि ॥ १८८ ॥ भुङ्क्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यध ऊर्ध्वमेषः । अस्यैव विज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्थासुखदुःखभोगः ॥ १८९ ॥ देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानं सततं ममेति । विज्ञानकोशोऽयमतिप्रकाशः प्रकृष्टसांनिध्यवशात्परात्मना । अतो भवत्येष उपाधिरस्य यदात्मधीः संसरति भ्रमेण ॥ १९० ॥ योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः । कूटस्थः

सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥ १९१ ॥ स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः। सर्वात्मकः सन्नपि वीक्षते स्वयं स्वतः पृथक्त्वेन मृदो घटानिव ॥ १९२ ॥ उपाधिसंबन्धवशात्परात्मा ह्युपाधिधर्माननुभाति तद्गुणः। अयोविकारानविकारिवह्निवत् सदैकरूपोऽपि परः स्वभावात् ॥ १९३ ॥ भ्रमेणाप्यन्यथा वास्तु जीवभावः परात्मनः। तदुपाधेरनादित्वान्नानादेर्नाश इष्यते ॥ १९४ ॥ अतोऽस्य जीवभावोऽपि नित्या भवति संसृतिः। न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ॥ १९५ ॥ सम्यक् पृष्टं त्वया विद्वन्सावधानेन तच्छृणु। प्रामाणिकी न भवति भ्रान्त्या मोहितकल्पना १९६ भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः। न घटेतार्थसंबन्धो नभसो नीलतादिवत् ॥ १९७ ॥ स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य प्रत्यग्बोधानन्दरूपस्य बुद्धेः। भ्रान्त्या प्राप्तो जीवभावो न सत्यो मोहापाये नास्त्यवस्तुस्वभावात् ॥ १९८ ॥ यावद्भ्रान्तिस्तावदेवास्य सत्ता मिथ्याज्ञानोज्जृम्भितस्य प्रमादात्। रज्ज्वां सर्पो भ्रान्तिकालीन एव भ्रान्तेर्नाशे नैव सर्पोऽपि तद्वत् ॥ १९९ ॥ अनादित्वमविद्यायाः कार्यस्यापि तथेष्यते। उत्पन्नायां तु विद्यायामाविद्यकमनाद्यपि ॥ २०० ॥ प्रबोधे स्वप्नवत्सर्वं सहमूलं विनश्यति। अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् ॥ २०१ ॥ अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः। यद्बुद्ध्युपाधिसंबन्धात्परिकल्पितमात्मनि ॥ २०२ ॥ जीवत्वं न ततोऽन्यत्तु स्वरूपेण विलक्षणः। संबन्धः स्वात्मनो बुद्ध्या मिथ्याज्ञानपुरस्सरः ॥ २०३ ॥ विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा। ब्रह्मात्मैकत्वविज्ञानं

सम्यग्ज्ञानं श्रुतेर्मतम् ॥ २०४ ॥ तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति । ततो विवेकः कर्तव्यः प्रत्यगात्मासदात्मनोः ॥ २०५ ॥ जलं पङ्कवदत्यन्तं पङ्कापाये जलं स्फुटम् । यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः ॥ २०६ ॥ असन्निवृत्तौ तु सदात्मना स्फुटं प्रतीतिरेतस्य भवेत्प्रतीचः । ततो निरासः करणीय एव सदात्मनः साध्वहमादिवस्तुनः ॥२०७॥ अतो नायं परात्मा स्याद्विज्ञानमयशब्दभाक् । विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः दृश्यत्वाद्व्यभिचारित्वान्नानित्यो नित्य इष्यते ॥ २०८ ॥ आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः । पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं भूत्वा नन्दति यत्र साधुतनुभृन्मात्रः प्रयत्नं विना ॥२०९॥ आनन्दमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा । स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥२१०॥ नैवायमानन्दमयः परात्मा सोपाधिकत्वात्प्रकृतेर्विकारात् । कार्यत्वहेतोः सुकृतक्रियाया विकारसंघातसमाहितत्वात् ॥२११॥ पञ्चानामपि कोशानां निषेधे युक्तितः श्रुतेः । तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते ॥ २१२ ॥ योऽयमात्मा स्वयंज्योतिः पञ्चकोशविलक्षणः । अवस्थात्रयसाक्षी सन्निर्विकारो निरञ्जनः ॥ २१३ ॥ सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पञ्चसु । सर्वाभावं विना किंचिन्न पश्याम्यत्र हे गुरो । विज्ञेयं किमु वस्त्वस्ति स्वात्मनात्मविपश्चिता ॥ २१५ ॥ सत्यमुक्तं त्वया विद्वन्निपुणोऽसि विचारणे । अहमादिविकारास्ते तदभावोऽयमप्यनु ॥ २१६ ॥ सर्वे येनानुभूयन्ते यः स्वयं नानुभूयते । तमात्मानं वेदितारं

विद्धि बुद्ध्या सुसूक्ष्मया ॥ २१७ ॥ तत्साक्षिकं भवेत्तत्तद्यद्येनानुभूयते । कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥२१८॥ असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते । अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ॥ २१९ ॥ जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योऽसौ समुज्जृम्भते प्रत्यग्रूपतया सदाहमहमित्यन्तः स्फुरन्नैकधा । नानाकारविकारभागिन इमान्पश्यन्नहंधीमुखान्नित्यानन्दचिदात्मना स्फुरति तं विद्धि स्वमेतं हृदि ॥२२०॥ घटोदके बिम्बितमर्कबिम्बमालोक्य मूढो रविमेव मन्यते । तथा चिदाभासमुपाधिसंस्थं भ्रान्त्याहमित्येव जडोऽभिमन्यते ॥ २२१ ॥ घटं जलं तद्गतमर्कबिम्बं विहाय सर्वं विनिरीक्ष्यतेऽर्कः । तटस्थ एतत्त्रितयावभासकः स्वयंप्रकाशो विदुषा यथा यथा ॥ २२२ ॥ देहं धियं चित्प्रतिबिम्बमेव विसृज्य बुद्धौ निहितं गुहायाम् । द्रष्टारमात्मानमखण्डबोधं सर्वप्रकाशं सदसद्विलक्षणम् ॥ २२३ ॥ नित्यं विभुं सर्वगतं सुसूक्ष्ममन्तर्बहिःशून्यमनन्यमात्मनः । विज्ञाय सम्यङ्निजरूपमेतं पुमान्विपाप्मा विरजो विमृत्युः ॥ २२४ ॥ विशोक आनन्दघनो विपश्चित् स्वयं कुतश्चिन्न बिभेति कश्चित् । नान्योऽस्ति पन्था भवबन्धमुक्तेर्विना स्वतत्त्वावगमं मुमुक्षोः ॥ २२५ ॥ ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम् । येनाऽद्वितीयमानन्दं ब्रह्म संपद्यते बुधैः ॥ २२६ ॥ ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः । विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः ॥ २२७ ॥ सत्यं ज्ञानमनन्तं ब्रह्म विशुद्धं परं स्वतःसिद्धम् । नित्यानन्दैकरसं प्रत्यगभिन्नं निरन्तरं जयति ॥ २२८ ॥ सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात् । नह्यन्यदस्ति किंचित्सम्यक्

मिदं प्रतीतं जहीहि यत्स्वात्मतया गृहीतम् । ब्रह्माहमित्येव विशुद्धबुद्ध्या विद्धि स्वमात्मानमखण्डबोधम् ॥२५४॥ मृत्कार्यं सकलं घटादि सततं मृन्मात्रमेवाहितं तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलम् । यस्मान्नास्ति सतः परं किमपि तत्सत्यं स आत्मा स्वयं तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम् ॥ २५५ ॥ निद्राकल्पितदेशकालविषयज्ञात्रादिसर्वं यथा मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः । यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत् तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम् ॥ २५६ ॥ जातिनीतिकुलगोत्रदूरगं नामरूपगुणदोषवर्जितम् । देशकालविषयातिवर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५७ ॥ यत्परं सकलवागगोचरं गोचरं विमलबोधचक्षुषः । शुद्धचिद्घनमनादिवस्तु यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५८ ॥ षड्भिरूर्मिभिरयोगियोगिहृद्भावितं न करणैर्विभावितम् । बुद्ध्यवेद्यमनवद्यमस्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥ भ्रान्तिकल्पितजगत्कलाश्रयं स्वाश्रयं च सदसद्विलक्षणम् । निष्कलं निरुपमानवद्धि यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥ जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशनविहीनमव्ययम् । विश्वसृष्ट्यवनघातकारणं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥ अस्तभेदमनपास्तलक्षणं निस्तरङ्गजलराशिनिश्चलम् । नित्यमुक्तमविभक्तमूर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥ एकमेव सदनेककारणं कारणान्तरनिरास्यकारणम् । कार्यकारणविलक्षणं स्वयं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६३ ॥ निर्विकल्पकमनल्पमक्षरं यत्क्षराक्षरविलक्षणं परम् । नित्यमव्ययसुखं निरञ्जनं ब्रह्म तत्त्वमसि भावयात्मनि

॥ २६४ ॥ यद्विभाति सदनेकधा भ्रमान्नामरूपगुणविक्रियात्मना । हेमवत्स्वयमविक्रियं सदा ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६५ ॥ यच्चकास्त्यनपरं परात्परं प्रत्यगेकरसमात्मलक्षणम् । सत्यचित्सुखमनन्तमव्ययं ब्रह्म तत्त्वमसि भावयात्मनि २६६ उक्तमर्थमिममात्मनि स्वयं भावयेत्प्रथितयुक्तिभिर्धिया । संशयादिरहितं कराम्बुवत्तेन तत्त्वनिगमो भविष्यति ॥ २६७ ॥ संबोधमात्रं परिशुद्धतत्त्वं विज्ञाय सङ्घे नृपवच्च सैन्ये । तदाश्रयः स्वात्मनि सर्वदा स्थितो विलापय ब्रह्मणि विश्वजातम् ॥ २६८ ॥ बुद्धौ गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परमद्वितीयम् । तदात्मना योऽत्र वसेद्गुहायां पुनर्न तस्याङ्ग गुहाप्रवेशः ॥ २६९ ॥ ज्ञाते वस्तुन्यपि बलवती वासनानादिरेषा कर्ता भोक्ताप्यहमिति दृढा यास्य संसारहेतुः । प्रत्यग्दृष्ट्यात्मनि निवसता सापनेया प्रयत्नान्मुक्तिं प्राहुस्तदिह मुनयो वासनातानवं यत् ॥ २७० ॥ अहं ममेति यो भावो देहाक्ष्यादावनात्मनि । अध्यासोऽयं निरस्तव्यो विदुषा स्वात्मनिष्ठया॥२७१॥ ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् । सोऽहमित्येव सद्वृत्त्यानात्मन्यात्ममतिं जहि ॥२७२॥ लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् । शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ २७३ ॥ लोकवासनया जन्तोः शास्त्रवासनयापि च । देहवासनया ज्ञानं यथावन्नैव जायते ॥ २७४ ॥ संसारकारागृहमोक्षमिच्छोरयोमयं पादनिबन्धशृङ्खलम् । वदन्ति तज्ज्ञाः पटुवासनात्रयं योऽस्माद्विमुक्तः समुपैति मुक्तिम् ॥ २७५ ॥ जलादिसंपर्कवशात्प्रभूतदुर्गन्धधूतागुरुदिव्यवासना । संघर्षणेनैव विभाति सम्यग्विधूयमाने सति बाह्यगन्धे ॥ २ ॥

अन्तःश्रितानन्तदुरन्तवासनाधूलीविलिप्ता परमात्मवासना । प्रज्ञातिसंघर्षणतो विशुद्धा प्रतीयते चन्दनगन्धवत्स्फुटम् २७७ यथा यथा प्रत्यगवस्थितं मनस्तथा तथा मुञ्चति बाह्यवासनाम् । निःशेषमोक्षे सति वासनानामात्मानुभूतिः प्रतिबन्धशून्या ॥ २७८ ॥ स्वात्मन्येव सदा स्थित्वा मनो नश्यति योगिनः । वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ॥ २७९ ॥ तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति । तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु ॥२८०॥ प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः । धैर्यमालम्ब्य यत्नेन स्वाध्यासापनयं कुरु ॥२८१॥ नाहं जीवः परंब्रह्मेत्येतद्व्यावृत्तिपूर्वकम् । वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८२ ॥ श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः । क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८३ ॥ अनादानविसर्गाभ्यामीपन्नास्ति क्रिया मुनेः । तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ २८४ ॥ तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः । ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्यासापनयं कुरु ॥ २८५ ॥ अहंभावस्य देहेऽस्मिन्निश्शेषविलयावधि । सावधानेन युक्तात्मा स्वाध्यासापनयं कुरु ॥ २८६ ॥ प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता । तावन्निरन्तरं विद्वन्स्वाध्यासापनयं कुरु ॥ २८७ ॥ निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः । क्वचिन्नावसरं दत्वा चिन्तयात्मानमात्मनि ॥ २८८ ॥ मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः । त्यक्त्वा चाण्डालवद्दूरं ब्रह्मीभूय कृती भव॥२८९॥ स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मनि । ब्रह्माण्डमपि पिण्डाण्डं त्यज्यतां मलभाण्डवत् ॥ २९० ॥ घटाकाशं महाकाश इवा-

त्मानं परात्मनि । विलाप्याखण्डभावेन तूर्णींभव महामुने ॥ २९१ ॥ चिदात्मनि सदानन्दे देहारूढामहंधियम् । निवेश्य लिङ्गमुत्सृज्य केवलो भव सर्वदा ॥ २९२ ॥ यत्रैष जगदाभासो दर्पणान्तःपुरं यथा । तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ २९३ ॥ यत्सत्यभूतं निजरूपमाद्यं चिदद्वयानन्दमरूपमक्रियम् । तदेत्य मिथ्यावपुरुत्सृजेत शैलूषवद्वेषमुपात्तमात्मनः ॥ २९४ ॥ सर्वात्मना दृश्यमिदं मृषैव नैवाहमर्थः क्षणिकत्वदर्शनात् । जानाम्यहं सर्वमिदं प्रतीतिः कुतोऽहमादेः क्षणिकस्य सिध्येत् ॥ २९५ ॥ अहंपदार्थस्त्वहमादिसाक्षी नित्यं सुषुप्तावपि भावदर्शनात् । ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं तत्प्रत्यगात्मा सदसद्विलक्षणः ॥ २९६ ॥ विकारिणां सर्वविकारवेत्ता नित्याविकारो भवितुं समर्हति । मनोरथस्वप्नसुषुप्तिषु स्फुटं पुनःपुनर्दृष्टमसत्त्वमेतयोः ॥ २९७ ॥ अतोऽभिमानं त्यज मांसपिण्डे पिण्डाभिमानिन्यपि बुद्धिकल्पिते । कालत्रयाबाध्यमखण्डबोधं ज्ञात्वा स्वमात्मानमुपैहि शान्तिम् ॥ २९८ ॥ त्यजाभिमानं कुलगोत्रनामरूपाश्रमेष्वार्द्रशवाश्रितेषु । लिङ्गस्य धर्मानपि कर्तृतादींस्त्यक्त्वा भवाखण्डसुखस्वरूपः ॥ २९९ ॥ सन्त्यन्ये प्रतिबन्धाः पुंसः संसारहेतवो दृष्टाः । तेषामेवं मूलं प्रथमविकारो भवत्यहंकारः ॥ ३०० ॥ यावत्स्यात्स्वस्य संबन्धोऽहंकारेण दुरात्मना । तावन्न लेशमात्रापि मुक्तिवार्ता विलक्षणा ॥ ३०१ ॥ अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते । चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः ॥ ३०२ ॥ यो वा पुरे सोऽहमिति प्रतीतो बुद्ध्या प्रक्लृप्तस्तमसातिमूढया । तस्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबन्धशून्यः ॥ ३०३ ॥

कामात्पुंसः प्रवर्तनम् ॥ ३२८ ॥ अतः प्रमादान्न परोऽस्ति मृत्युर्विवेकिनो ब्रह्मविदः समाधौ । समाहितः सिद्धिमुपैति सम्यक् समाहितात्मा भव सावधानः ॥ ३२९ ॥ ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः । पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ॥ ३३० ॥ संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम् । जीवतो यस्य कैवल्यं विदेहे स च केवलः ॥ यत्किंचित्पश्यतो भेदं भयं ब्रूते यजुःश्रुतिः ॥ ३३१ ॥ यदा कदा वापि विपश्चिदेष ब्रह्मण्यनन्तेऽप्यणुमात्रभेदम् । पश्यत्यथामुष्य भयं तदैव यद्वीक्षितं भिन्नतया प्रमादात् ॥ ३३२ ॥ श्रुतिस्मृतिन्यायशतैर्निषिद्धे दृश्येऽत्र यः स्वात्ममतिं करोति । उपैति दुःखोपरि दुःखजातं निषिद्धकर्ता स मलिम्लुचो यथा ॥३३३॥ सत्याभिसन्धानरतो विमुक्तो महत्त्वमात्मीयमुपैति नित्यम् । मिथ्याभिसंधानरतस्तु नश्येद्दृष्टं तदेतद्यदचौरचौरयोः॥३३४॥ यतिरसदनुसन्धिं बन्धहेतुं विहाय स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत् । सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या हरति परमविद्याकार्यदुःखं प्रतीतम् ॥ ३३५ ॥ बाह्यानुसन्धिः परिवर्धयेत्फलं दुर्वासनामेव ततस्ततोऽधिकाम् । ज्ञात्वा विवेकैः परिहृत्य बाह्यं स्वात्मानुसन्धिं विदधीत नित्यम् ॥ ३३६ ॥ बाह्ये निरुद्धे मनसः प्रसन्नता मनःप्रसादे परमात्मदर्शनम् । तस्मिन्सुदृष्टे भवबन्धनाशो बहिर्निरोधः पदवी विमुक्तेः ॥ ३३७ ॥ कः पण्डितः सन्सदसद्विवेकी श्रुतिप्रमाणः परमार्थदर्शी । जानन्हि कुर्यादसतोऽवलम्बं स्वपातहेतोः शिशुवन्मुमुक्षुः ॥३३८॥ देहादिसंसक्तिमतो न मुक्तिर्मुक्तस्य देहाद्यभिमत्यभावः । सुप्तस्य नो जागरणं न जाग्रतः स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥ ३३९ ॥

अन्तर्बहिः स्वं स्थिरजङ्गमेषु ज्ञात्वात्मनाधारतया विलोक्य । त्यक्ताखिलोपाधिरखण्डरूपः पूर्णात्मना यः स्थित एष मुक्तः ॥ ३४० ॥ सर्वात्मना बन्धविमुक्तिहेतुः सर्वात्मभावान्न परोऽस्ति कश्चित् । दृश्याग्रहे सत्युपपद्यतेऽसौ सर्वात्मभावोऽस्य सदात्मनिष्ठया ॥३४१॥ दृश्यस्याग्रहणं कथं तु घटते देहात्मना तिष्ठतो बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः । संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैस्तत्त्वज्ञैः करणीयमात्मनि सदानन्देच्छुभिर्यत्नतः ॥ ३४२ ॥ सर्वात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः । समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः ॥ ३४३ ॥ आरूढशक्तेरहमो विनाशः कर्तुं न शक्यः सहसापि पण्डितैः । ये निर्विकल्पाख्यसमाधिनिश्चलास्तानन्तरानन्तभवा हि वासनाः ॥ ३४४॥ अहंबुद्ध्यैव मोहिन्या योजयित्वाऽऽवृतेर्बलात् । विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ॥३४५॥ विक्षेपशक्तिविजयो विषमो विधातुं निःशेषमावरणशक्तिनिवृत्त्यभावे । दृग्दृश्ययोः स्फुटपयोजलवद्विभागे नश्येत्तदावरणमात्मनि च स्वभावात् ॥ ३४६ ॥ निःसंशयेन भवति प्रतिबन्धशून्यो विक्षेपणं नहि तदा यदि चेन्मृषार्थे। सम्यग्विवेकः स्फुटबोधजन्यो विभज्य दृग्दृश्यपदार्थतत्त्वम् । छिनत्ति मायाकृतमोहबन्धं यस्माद्विमुक्तस्य पुनर्न संसृतिः ॥ ३४७ ॥ परावरैकत्वविवेकवह्निर्दहत्यविद्यागहनं ह्यशेषम् । किं स्यात्पुनः संसरणस्य बीजमद्वैतभावं समुपेयुषोऽस्य ॥ ३४८ ॥ आवरणस्य निवृत्तिर्भवति हि सम्यक्पदार्थदर्शनतः । मिथ्याज्ञानविनाशस्तद्विक्षेपजनितदुःखनिवृत्तिः ॥३४९॥ एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात् । तस्माद्वस्तु सतत्त्वं ज्ञातव्यं

विदुषा ॥ ३५० ॥ अयोऽग्नियोगादिव सत्समन्वयान्मात्रादिरूपेण विजृम्भते धीः । तत्कार्यमेतद्वितयं यतो मृषा दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३५१ ॥ ततो विकाराः प्रकृतेरहंमुखा देहावसाना विषयाश्च सर्वे । क्षणेऽन्यथा भावितया ह्यमीषामसत्त्वमात्मा तु कदापि नान्यथा ॥ ३५२ ॥ नित्याद्वयाखण्डचिदेकरूपो बुद्ध्यादिसाक्षी सदसद्विलक्षणः । अहंपदप्रत्ययलक्षितार्थः प्रत्यक्सदानन्दघनः परात्मा ॥ ३५३ ॥ इत्थं विपश्चित्सदसद्विभज्य निश्चित्य तत्त्वं निजबोधदृष्ट्या । ज्ञात्वा स्वमात्मानमखण्डबोध तेभ्यो विमुक्तः स्वयमेव शाम्यति ॥ ३५४ ॥ अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा । समाधिना विकल्पेन यदाद्वैतात्मदर्शनम् ॥ ३५५ ॥ त्वमहमिदमितीयं कल्पना बुद्धिदोषात् प्रभवति परमात्मन्यद्वये निर्विशेषे । प्रविलसति समाधावस्य सर्वो विकल्पो विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥३५६॥ शान्तो दान्तः परमुपरतः क्षान्तियुक्तः समाधिं कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् । तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान् ब्रह्माकृत्या निवसति सुखं निष्क्रियो निर्विकल्पः ॥ ३५७ ॥ समाहिता ये प्रविलाप्य बाह्यं श्रोत्रादिचेतः स्वमहं चिदात्मनि । त एव मुक्ता भवपाशबन्धैर्नान्ये तु पारोक्ष्यकथाभिधायिनः ॥ ३५८ ॥ उपाधिभेदात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः । तस्मादुपाधेर्विलयाय विद्वान् वसेत्सदा कल्पसमाधिनिष्ठया ॥ ३५९ ॥ सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया । कीटको भ्रमरं ध्यायन्भ्रमरत्वाय कल्पते ॥ ३६० ॥ क्रियान्तरासक्तिमपास्य कीटको ध्यायन्नलित्वं ह्यलिभावमृच्छति । तथैव योगी परमात्मतत्त्वं

ध्यात्वा समायाति तदेकनिष्ठया ॥ ३६१ ॥ अतीव सूक्ष्मं परमात्मतत्त्वं न स्थूलदृष्ट्या प्रतिपत्तुमर्हति । समाधिनात्यन्तसुसूक्ष्मवृत्त्या ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥ ३६२ ॥ यथा सुवर्णं पुटपाकशोधितं त्यक्त्वा मलं स्वात्मगुणं समृच्छति । तथा मनः सत्त्वरजस्तमोमलं ध्यानेन सन्त्यज्य समेति तत्त्वम् ॥ ३६३ ॥ निरन्तराभ्यासवशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा । तदा समाधिः सविकल्पवर्जितः स्वतोऽद्वयानन्दरसानुभावकः ॥ ३६४ ॥ समाधिनानेन समस्तवासना ग्रन्थेर्विनाशोऽखिलकर्मनाशः । अन्तर्बहिः सर्वत एव सर्वदा स्वरूपविस्फूर्तिरयत्नतः स्यात् ॥ ३६५ ॥ श्रुतेः शतगुणं विद्यान्मननं मननादपि । निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम् ॥३६६॥ निर्विकल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवम् । नान्यथा चलतया मनोगतेः प्रत्ययान्तरविमिश्रितं भवेत् ॥ ३६७ ॥ अतः समाधत्स्व यतेन्द्रियः सन् निरन्तरं शान्तमनः प्रतीचि । विध्वंसय ध्वान्तमनाद्यविद्यया कृतं सदेकत्वविलोकनेन॥३६८॥ योगस्य प्रथमद्वारं वाङ्निरोधोऽपरिग्रहः । निराशा च निरीहा च नित्यमेकान्तशीलता ॥ ३६९ ॥ एकान्तस्थितिरिन्द्रियोपरमणे हेतुर्दमश्चेतसः संरोधे करणं शमेन विलयं यायादहंवासना । तेनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिनस्तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नान्मुने ॥ ३७० ॥ वाचं नियच्छात्मनि तं नियच्छ बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि । तं चापि पूर्णात्मनि निर्विकल्पे विलाप्य शान्तिं परमां भजस्व ॥ ३७१ ॥ देहप्राणेन्द्रियमनोबुद्ध्यादिभिरुपाधिभिः । यैर्यैर्वृत्तेः समायोगस्तत्तद्भावोऽस्य योगिनः ॥ ३७२ ॥

मुनेः सम्यक् सर्वोपरमणं सुखम् । संदृश्यते सदानन्दरसानुभवविप्लवः ॥ ३७३ ॥ बहिस्तु विषयैः सङ्गं तथान्तरहमादिभिः । विरक्त एव शक्नोति त्यक्तुं ब्रह्मणि निष्ठितः ॥ ३७४ ॥ अन्तस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते । त्यजत्यन्तर्बहिःसङ्गं विरक्तस्तु मुमुक्षया ॥ ३७५ ॥ वैराग्यबोधौ पुरुषस्य पक्षिवत् पक्षौ विजानीहि विचक्षण त्वम् । विमुक्तिसौधाग्रलताधिरोहणं ताभ्यां विना नान्यतरेण सिध्यति ॥ ३७६ ॥ अत्यन्तवैराग्यवतः समाधिः समाहितस्यैव दृढप्रबोधः । प्रबुद्धतत्त्वस्य हि बन्धमुक्तिर्मुक्तात्मनो नित्यसुखानुभूतिः ॥ ३७७ ॥ वैराग्यान्न परं सुखस्य जनकं पश्यामि वश्यात्मनस्तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्यसाम्राज्यधुक् । एतद्द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं सर्वत्रास्पृहया सदात्मनि सदा प्रज्ञां कुरु श्रेयसे ॥ ३७८ ॥ आशां छिन्धि विषोपमेषु विषयेष्वेषैव मृत्योः कृतिस्त्यक्त्वा जातिकुलाश्रमेष्वभिमतिं मुञ्चातिदूरात् क्रियाः । देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि त्वं द्रष्टास्यमनोऽसि निर्द्वयपरंब्रह्मासि यद्वस्तुतः ॥३७९॥ लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् । ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखण्डवृत्त्याऽनिशं ब्रह्मानन्दरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भृशम् ॥३८०॥ अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम् । चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ॥ ३८१ ॥ एष स्वयंज्योतिरशेषसाक्षी विज्ञानकोशो विलसत्यजस्रम् । लक्ष्यं विधायैनमसद्विलक्षणमखण्डवृत्त्यात्मतयानुभावय ॥ ३८२ ॥ एतमच्छिन्नया वृत्त्या प्रत्ययान्तरशून्यया । उल्लेखयन्विजानीयात्स्वस्वरूपतया

स्फुटम् ॥ ३८३ ॥ अत्रात्मत्वं दृढीकुर्वन्नहमादिषु सन्त्यजन् । उदासीनतया तेषु तिष्ठेत्स्फुटघटादिवत् ॥ ३८४ ॥ विशुद्धमन्तःकरणं स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे । शनैःशनैर्निश्चलतामुपानयन् पूर्णं स्वमेवानुविलोकयेत्ततः ॥ ३८५ ॥ देहेन्द्रियप्राणमनोऽहमादिभिः स्वाज्ञानकॢप्तैरखिलैरुपाधिभिः । विमुक्तमात्मानमखण्डरूपं पूर्णं महाकाशमिवावलोकयेत् ॥ ३८६ ॥ घटकलशकुसूलसूचिमुख्यैर्गगनमुपाधिशतैर्विमुक्तमेकम् । भवति न विविधं तथैव शुद्धं परमहमादिविमुक्तमेकमेव ॥ ३८७ ॥ ब्रह्मादिस्तम्बपर्यन्ता मृषामात्रा उपाधयः । ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ॥ ३८८ ॥ यत्र भ्रान्त्या कल्पितं तद्विवेके तत्तन्मात्रं नैव तस्माद्विभिन्नम् । भ्रान्तेर्नाशे भ्रान्तिदृष्टाहितत्त्वं रज्जुस्तद्वद्विश्वमात्मस्वरूपम् ॥ ३८९ ॥ स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः । स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किंचन ॥ ३९० ॥ अन्तः स्वयं चापि बहिः स्वयं च स्वयं पुरस्तात्स्वयमेव पश्चात् । स्वयं ह्यवाच्यां स्वयमप्युदीच्यां तथोपरिष्टात्स्वयमप्यधस्तात् ॥ ३९१ ॥ तरङ्गफेनभ्रमबुद्बुदादि सर्वं स्वरूपेण जलं यथा तथा । चिदेव देहाद्यहमन्तमेतत् सर्वं चिदेवैकरसं विशुद्धम् ॥ ३९२ ॥ सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः । पृथक् किं मृत्स्नायाः कलशघटकुम्भाद्यवगतं वदत्येष भ्रान्तस्त्वमहमिति मायामदिरया ॥ ३९३ ॥ क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः । ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९४ ॥ नवनिर्मलनि.
मनिष्पन्दननिर्विकारम् । अन्तर्बहिःशून्यमनन्यमद्वयं

ब्रह्म किमस्ति बोध्यम् ॥ ३९५ ॥ वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव जीवः स्वयं ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतिः । ब्रह्मैवाहमिति प्रबुद्धमतयः सन्त्यक्तबाह्याः स्फुटं ब्रह्मीभूय वसन्ति सन्ततचिदानन्दात्मनैतद्ध्रुवम् ॥ ३९६ ॥ जहि मलमयकोशेऽहंधियोत्थापिताशां प्रसभमनिलकल्पे लिङ्गदेहेऽपि पश्चात् । निगमगदितकीर्तिं नित्यमानन्दमूर्तिं स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥ ३९७ ॥ शवाकारं यावद्भजति मनुजस्तावदशुचिः परेभ्यः स्यात्क्लेशो जननमरणव्याधिनिलयः । यदात्मानं शुद्धं कलयति शिवाकारमचलं तदा तेभ्यो मुक्तो भवति हि तदाह श्रुतिरपि ॥ ३९८ ॥ स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः । स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ ३९९ ॥ समाहितायां सति चित्तवृत्तौ परात्मनि ब्रह्मणि निर्विकल्पे । न दृश्यते कश्चिदयं विकल्पः प्रजल्पमात्रः परिशिष्यते ततः ॥ ४०० ॥ असत्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि । निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०१ ॥ द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि । निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०२ ॥ कल्पार्णव इवात्यन्तपरिपूर्णैकवस्तुनि । निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०३ ॥ तेजसीव तमो यत्र प्रलीनं भ्रान्तिकारणम् । अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ ४०४ ॥ एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत् । सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ ४०५ ॥ न ह्यस्ति विश्वं परतत्त्वबोधात् सदात्मनि ब्रह्मणि निर्विकल्पे । कालत्रये नाप्यहिरीक्षितो गुणे नह्यम्बुबिन्दुर्मृगतृष्णिकायाम् ॥ ४०६ ॥ मायामात्रमिदं द्वैत-

मद्वैतं परमार्थतः । इति ब्रूते श्रुतिः साक्षात् सुषुप्तावनुभूयते ॥ ४०७ ॥ अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितम् । पण्डितै रज्जुसर्पादौ विकल्पो भ्रान्तिजीवनः ॥ ४०८ ॥ चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन । अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥ ४०९ ॥ किमपि सततबोधं केवलानन्दरूपं निरुपममतिवेलं नित्यमुक्तं निरीहम् । निरवधि गगनाभं निष्कलं निर्विकल्पं हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥४१०॥ प्रकृतिविकृतिशून्यं भावनातीतभावं समरसमसमानं मानसं बन्धदूरम् । निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥४११॥ अजरममरमस्ताभाववस्तुस्वरूपं स्तिमितसलिलराशिप्रख्यमाख्याविहीनम् । शमितगुणविकारं शाश्वतं शान्तमेकं हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४१२ ॥ समाहितान्तःकरणः स्वरूपे विलोकयात्मानमखण्डवैभवम् । विच्छिन्धि बन्धं भवगन्धगन्धितं यत्नेन पुंस्त्वं सफलीकुरुष्व ॥ ४१३ ॥ सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दमद्वयम् । भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥ ४१४ ॥ छायेव पुंसः परिदृश्यमानमाभासरूपेण फलानुभूत्या । शरीरमाराच्छववन्निरस्तं पुनर्न सन्धत्त इदं महात्मा ॥ ४१५ ॥ प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वा तिष्ठतु गोरिवास्रक् । न तत्पुनः पश्यति तत्त्ववेत्तानन्दात्मनि ब्रह्मणि लीनवृत्तिः ॥ ४१६ ॥ सततविमलबोधानन्दरूपं समेत्य त्यज जडमलरूपोपाधिमेतं सुदूरे । अथ पुनरपि नैव स्मर्यतां वान्तवस्तु स्मरणविषयभूतं कल्पते कुत्सनाय ॥ ४१७ ॥ समूलमेतत्परिदह्य वह्नौ सदात्मनि ब्रह्मणि निर्विकल्पे । ततः स्वयं नित्यवि-

शुद्धबोधानन्दात्मना तिष्ठति विद्वरिष्ठः ॥ ४१८ ॥ अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः । किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित् ॥ ४१९ ॥ संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः । बहिरन्तःसदानन्दरसास्वादनमात्मनि ॥ ४२० ॥ वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् । स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥ ४२१ ॥ यद्युत्तरोत्तराभावः पूर्वपूर्वं तु निष्फलम् । निवृत्तिः परमा तृप्तिरानन्दोऽनुपमः स्वतः ॥ ४२२ ॥ दृष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम् । यत्कृतं भ्रान्तिवेलायां नाना कर्म जुगुप्सितम् ।पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति ॥ ४२३ ॥ विद्याफलं स्यादसतो निवृत्तिः प्रवृत्तिरज्ञानफलं तदीक्षितम् । तज्ज्ञानयोर्यन्मृगतृष्णिकादौ नोचेद्विदां दृष्टफलं किमस्मात् ॥ ४२४ ॥ अज्ञानहृदयग्रन्थेर्विनाशो यद्यशेषतः ।अनिच्छोर्विषयः किंनु प्रवृत्तेः कारणं स्वतः ॥ ४२५ ॥ वासनानुदयो भोग्ये वैराग्यस्य तदावधिः । अहंभावोदयाभावो बोधस्य परमावधिः । लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ ४२६ ॥ ब्रह्माकारतया सदास्थिततया निर्मुक्तबाह्यार्थधीरन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् । स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधीरास्ते कश्चिदनन्तपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२७ ॥ स्थितप्रज्ञो यतिरयं यः सदानन्दमश्नुते । ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ॥ ४२८ ॥ ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी । निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते । सुस्थितासौ भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२९ ॥ यस्य स्थिता भवेत्प्रज्ञा यस्यानन्दो निरन्तरः । प्रपञ्चो विस्मृ-

तप्रायः स जीवन्मुक्त इष्यते ॥ ४३० ॥ लीनधीरपि जागर्ति
यो जाग्रद्धर्मवर्जितः । बोधो निर्वासनो यस्य स जीवन्मुक्त
इष्यते ॥ ४३१ ॥ शान्तसंसारकलनः कलावानपि निष्कलः ।
यस्य चित्तं विनिश्चिन्तं स जीवन्मुक्त इष्यते ॥ ४३२ ॥ वर्त-
मानोऽपि देहेऽस्मिञ्छायावदनुवर्तिनि । अहन्ताममताभावो
जीवन्मुक्तस्य लक्षणम् ॥ ४३३ ॥ अतीताननुसन्धानं भविष्य-
दविचारणम् । औदासीन्यमपि प्राप्तं जीवन्मुक्तस्य लक्षणम्
॥ ४३४ ॥ गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे । सर्वत्र
समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३५ ॥ इष्टानिष्टार्थसं-
प्राप्तौ समदर्शितयात्मनि । उभयत्राविकारित्वं जीवन्मुक्तस्य
लक्षणम् ॥ ४३६ ॥ ब्रह्मानन्दरसास्वादासक्तचित्ततया यतेः ।
अन्तर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३७ ॥ देहेन्द्रि-
यादौ कर्तव्ये ममाहंभाववर्जितः । औदासीन्येन यस्तिष्ठेत्स
जीवन्मुक्तलक्षणः ॥ ४३८ ॥ विज्ञात आत्मनो यस्य ब्रह्मभावः
श्रुतेर्बलात् । भवबन्धविनिर्मुक्तः स जीवन्मुक्तलक्षणः ॥४३९॥
देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके । यस्य नो भवतः क्वापि
स जीवन्मुक्त इष्यते ॥ ४४० ॥ न प्रत्यग्ब्रह्मणो भेदं कदापि
ब्रह्मसर्गयोः । प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः
॥ ४४१ ॥ साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः ।
समभावो भवेद्यस्य स जीवन्मुक्तलक्षणः ॥४४२॥ यत्र प्रविष्टा
विषयाः परेरिता नदीप्रवाहा इव वारिराशौ । लीयन्ति सन्मा-
त्रतया न विक्रियामुत्पादयन्त्येष यतिर्विमुक्तः ॥ ४४३ ॥
विज्ञातब्रह्मतत्त्वस्य यथा पूर्वं न संसृतिः । अस्ति चेन्न स विज्ञा-
तब्रह्मभावो बहिर्मुखः ॥ ४४४ प्राचीनवा...

संसरतीति चेत् । न सदेकत्वविज्ञानान्मन्दीभवति वासना ॥ ४४५ ॥ अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि । तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः ॥ ४४६ ॥ निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते । ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात् ॥ ४४७ ॥ सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्यते । फलोदयः क्रियापूर्वो निष्क्रियो नहि कुत्रचित् ॥ ४४८ ॥ अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् । संचितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ ४४९ ॥ यत्कृतं भ्रान्तिवेलायां पुण्यं वा पापमुल्बणम् । सुप्तोत्थितस्य किं तत्स्यात्स्वर्गाय नरकाय वा ॥ ४५० ॥ स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा । न श्लिष्यति च यत्किंचित्कदाचिद्भाविकर्मभिः ॥ ४५१ ॥ नभो न घटयोगेन सुरागन्धेन लिप्यते । तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥ ४५२ ॥ ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति । अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥४५३॥ व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ । न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम् ॥ ४५४ ॥ प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम् । ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थितास्तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥ ४५५ ॥ उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः । प्रारब्धसद्भावकथा न युक्ता स्वप्नार्थसंबन्धकथेव जाग्रतः ॥ ४५६ ॥ नहि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपञ्चे । करोत्यहन्तां ममतामिदन्तां किंतु स्वयं तिष्ठति जागरेण ॥ ४५७ ॥ न तस्य मिथ्यार्थसमर्थनेच्छा न संग्रह-

स्तज्जगतोऽपि दृष्टः । तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम् ॥ ४५८ ॥ तद्वत्परे ब्रह्मणि वर्तमानः सदात्मना तिष्ठति नान्यदीक्षते । स्मृतिर्यथा स्वप्नविलोकितार्थे तथाविदः प्राशनमोचनादौ ॥ ४५९ ॥ कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् । नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥ ४६० ॥ अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक् । तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥४६१॥ प्रारब्धं सिद्ध्यति तदा यदा देहात्मना स्थितिः । देहात्मभावो नैवेष्टः प्रारब्धं त्यजतामतः ॥ ४६२ ॥ शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि । अध्यस्तस्य कुतः सत्त्वमसत्त्वस्य कुतो जनिः ॥ ४६३ ॥ अजातस्य कुतो नाशः प्रारब्धमसतः कुतः । ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ॥ ४६४ ॥ तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् । समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः । न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ॥ ४६५ ॥ परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम् । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६६ ॥ सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम् । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६७ ॥ प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम् । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६८ ॥ अहेयमनुपादेयमनादेयमनाश्रयम् । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥४६९॥ निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम् । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४७० ॥ अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम् । एकमेवाद्वयं ब्रह्म नेह नानाऽस्ति किंचन ॥ ४७१ ॥ सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम् ।

याद्वयं ब्रह्म नेह नानाऽस्ति किंचन ॥ ४७२ ॥ निरस्तरागा विनिरस्तभोगाः शान्ताः सुदान्ता यतयो महान्तः । विज्ञाय तत्त्वं परमेतदन्ते प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७३ ॥ भवानपीदं परतत्त्वमात्मनः स्वरूपमानन्दघनं विचार्य । विधूय मोहं स्वमनःप्रकल्पितं मुक्तः कृतार्थो भवतु प्रबुद्धः ॥ ४७४ ॥ समाधिना साधुविनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा । न संशयं सम्यगवेक्षितश्चेत् श्रुतः पदार्थो न पुनर्विकल्पते ॥ ४७५ ॥ स्वस्याऽविद्यावन्धसंबन्धमोक्षात् सत्यज्ञानानन्दरूपात्मलब्धौ । शास्त्रं युक्तिर्देशिकोक्तिप्रमाणं चान्तःसिद्धा स्वानुभूतिः प्रमाणम् ॥ ४७६ ॥ बन्धो मोक्षश्च तृप्तिश्च चिन्तारोग्यक्षुधादयः । स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम् ॥४७७॥ तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा । प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७८ ॥ स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् । संसिद्धः सन्मुखं तिष्ठेन्निर्विकल्पात्मनाऽऽत्मनि ॥ ४७९ ॥ वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च । अखण्डरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः प्रमाणम् ॥ ४८० ॥ इति गुरुवचनाच्छ्रुतिप्रमाणात् परमवगम्य सतत्त्वमात्मयुक्त्या । प्रशमितकरणः समाहितात्मा क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥ ४८१ ॥ किंचित्कालं समाधाय परे ब्रह्मणि मानसम् । उत्थाय परमानन्दादिदं वचनमब्रवीत् ॥ ४८२ ॥ बुद्धिर्विनष्टा गलिता प्रवृत्तिर्ब्रह्मात्मनोरेकतयाधिगत्या । इदं न जानेऽप्यनिदं न जाने किं वा कियद्वा सुखमस्त्यपारम् ॥ ४८३ ॥ वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेर्वैभवम् । अम्भो-

राशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो यस्यांशांशलवे विलीनमधुनानन्दात्मना निर्वृतम् ॥ ४८४ ॥ क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् । अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ ४८५ ॥ किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् । अखण्डानन्दपीयूषपूर्णे ब्रह्ममहार्णवे ॥ ४८६ ॥ न किंचिदत्र पश्यामि न शृणोमि न वेद्म्यहम् । स्वात्मनैव सदानन्दरूपेणास्मि विलक्षणः ॥ ४८७ ॥ नमो नमस्ते गुरवे महात्मने विमुक्तसङ्गाय सदुत्तमाय । नित्याद्वयानन्दरसस्वरूपिणे भूम्ने सदापारदयाम्बुधाम्ने ॥ ४८८ ॥ यत्कटाक्षशशिसान्द्रचन्द्रिकापातधूतभवतापजश्रमः । प्राप्तवानहमखण्डवैभवानन्दमात्मपदमक्षयं क्षणात् ॥ ४८९ ॥ धन्योऽहं कृतकृत्योऽहं विमुक्तोऽहं भवग्रहात् । नित्यानन्दस्वरूपोऽहं पूर्णोऽहं तदनुग्रहात् ॥ ४९० ॥ असङ्गोऽहमनङ्गोऽहमलिङ्गोऽहमभङ्गुरः । प्रशान्तोऽहमनन्तोऽहममलोऽहं चिरन्तनः ॥ ४९१ ॥ अकर्ताहमभोक्ताहमविकारोऽहमक्रियः । शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ४९२ ॥ द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्न एवाहम् । नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा ॥ ४९३ ॥ नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम् । बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ॥ ४९४ ॥ निरुपममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम् । नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९५ ॥ नारायणोऽहं नरकान्तकोऽहं पुरान्तकोऽहं पुरुषोऽहमीशः । अखण्डबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहं च निर्ममः ॥४९६॥ सर्वेषु भूतेष्वहमेव ज्ञानात्मनान्तर्बहिराश्रितः सन् । भोक्ता च भोग्यं स्वयमेव

यद्यत्पृथग्दृष्टमिदन्तया पुरा ॥ ४९७ ॥ मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः। उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात् ॥ ४९८ ॥ स्थूलादिभावा मयि कल्पिता भ्रमादारोपिता नु स्फुरणेन लोकैः । काले यथा कल्पकवत्सरायनर्त्वादयो निष्कलनिर्विकल्पे ॥ ४९९ ॥ आरोपितं नाश्रयदूषकं भवेत्कदापि मूढैरतिदोषदूषितैः । नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारिमहाप्रवाहः ॥ ५०० ॥ आकाशवल्लेपविदूरगोहमादित्यवद्भास्यविलक्षणोऽहम् । अहार्यवन्नित्यविनिश्चलोऽहमम्भोधिवत्पारविवर्जितोऽहम् ॥ ५०१ ॥ न मे देहेन संबन्धो मेघेनेव विहायसः । अतः कुतो मे मद्धर्मा जाग्रत्स्वप्नसुषुप्तयः ॥ ५०२ ॥ उपाधिरायाति स एव गच्छति स एव कर्माणि करोति भुङ्क्ते । स एव जीवन्म्रियते सदाऽहं कुलाद्रिवन्निश्चल एव संस्थितः ॥ ५०३ ॥ न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य । एकात्मको यो निविडो निरन्तरो व्योमेव पूर्णः स कथं नु चेष्टते ॥ ५०४ ॥ पुण्यानि पापानि निरिन्द्रियस्य निश्चेतसो निर्विकृतेर्निराकृतेः । कुतो ममाखण्डसुखानुभूतेर्ब्रूते ह्यनन्वागतमित्यपि श्रुतिः ॥ ५०५ ॥ छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुष्टु वा । न स्पृशत्येव यत्किंचित्पुरुषं तद्विलक्षणम् ॥ ५०६ ॥ न साक्षिणं साक्ष्यधर्माः संस्पृशन्ति विलक्षणम् । अविकारमुदासीनं गृहधर्माः प्रदीपवत् ॥ ५०७ ॥ रवेर्यथा कर्मणि साक्षिभावो वह्नेर्यथा दाहनियामकत्वम् । रज्जोर्यथाऽऽरोपितवस्तुसङ्गस्तथैव कूटस्थचिदात्मनो मे ॥ ५०८ ॥ कर्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम् । द्रष्टापि वा दर्शयितापि नाहं सोऽहं स्वयंज्योतिरनीदृगात्मा

॥ ५०९ ॥ चलत्युपाधौ प्रतिविम्बलौल्यमौपाधिकं मूढधियो
नयन्ति । स्वविम्बभूतं रविवद्विनिष्क्रियं कर्तास्मि भोक्तास्मि
हतोऽस्मि हेति ॥ ५१० ॥ जले वापि स्थले वापि लुठत्वेष जडा-
त्मकः । नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा ॥ ५११ ॥
कर्तृत्वभोक्तृत्वखलत्वमत्तता जडत्वबद्धत्वविमुक्ततादयः । बुद्धे-
र्विकल्पा न तु सन्ति वस्तुतः स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये
॥ ५१२ ॥ सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वा-
पि । किं मेऽसङ्गचितस्तैर्न घनः क्वचिदम्बरं स्पृशति ॥ ५१३ ॥
अव्यक्तादिस्थूलपर्यन्तमेतद्विश्वं यत्राभासमात्रं प्रतीतम् । व्योम-
प्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥
सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् । नित्यं
शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१५ ॥
यत्प्रत्यस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम् । सत्य-
ज्ञानानन्तमानन्दरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१६ ॥ नि-
ष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः । निर्विक-
ल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः ॥ ५१७ ॥ स-
र्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः । केवलाखण्डबोधोऽह-
मानन्दोऽहं निरन्तरः ॥ ५१८ ॥ स्वाराज्यसाम्राज्यविभूतिरेषा
भवत्कृपा श्रीमहिमप्रसादात् । प्राप्ता मया श्रीगुरवे महात्मने
नमो नमस्तेऽस्तु पुनर्नमोऽस्तु ॥ ५१९ ॥ महास्वप्ने मायाकृत-
जनिजरामृत्युगहने भ्रमन्तं क्लिश्यन्तं बहुलतरतापैरनुदिनम् ।
अहंकारव्याघ्रव्यथितमिममत्यन्तकृपया प्रबोध्य प्रस्वापात्परम-
वितवान्मामसि गुरो ॥५२०॥ नमस्तस्मै सदेकस्मै
नमः । यदेतद्विश्वरूपेण राजते गुरुराज ते ॥ ५२१

नतमवलोक्य शिष्यवर्यं समधिगतात्मसुखं प्रबुद्धतत्त्वम् । प्रमु-
दितहृदयः स देशिकेन्द्रः पुनरिदमाह वचः परं महात्मा ॥५२२॥
ब्रह्मप्रत्ययसन्ततिर्जगदतो ब्रह्मैव सत्सर्वतः पश्याध्यात्मदृशा
प्रशान्तमनसा सर्वास्ववस्थास्वपि । रूपादन्यदवेक्षितं किमभितश्च-
क्षुष्मतां दृश्यते तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम्
॥ ५२३ ॥ कस्तां परानन्दरसानुभूतिमुत्सृज्य शून्येषु रमेत
विद्वान् । चन्द्रे महाह्लादिनि दीप्यमाने चित्रेन्दुमालोकयितुं क
इच्छेत् ॥ ५२४ ॥ असत्पदार्थानुभवेन किंचिन्न ह्यस्ति तृप्तिर्न
च दुःखहानिः । तदद्वयानन्दरसानुभूत्या तृप्तः सुखं तिष्ठ सदा-
त्मनिष्ठया ॥ ५२५ ॥ स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्व-
यम् । स्वानन्दमनुभुञ्जानः कालं नय महामते ॥ ५२६ ॥
अखण्डबोधात्मनि निर्विकल्पे विकल्पनं व्योम्नि पुरप्रकल्पनम् ।
तदद्वयानन्दमयात्मना सदा शान्तिं परामेत्य भजस्व
मौनम् ॥ ५२७ ॥ तूष्णीमवस्था परमोपशान्तिर्बुद्धेरसत्कल्प
विकल्पहेतोः । ब्रह्मात्मना ब्रह्मविदो महात्मनो यत्राद्वयान-
न्दसुखं निरन्तरम् ॥ ५२८ ॥ नास्ति निर्वासनान्मौनात्परं
सुखकृदुत्तमम् । विज्ञातात्मस्वरूपस्य स्वानन्दरसपायिनः ॥५२९॥
गच्छंस्तिष्ठन्नुपविशञ्छयानो वान्यथापि वा । यथेच्छया वसे-
द्विद्वानात्मारामः सदा मुनिः ॥ ५३० ॥ न देशकालासनदि-
ग्यमादिलक्ष्याद्यपेक्षाऽप्रतिबद्धवृत्तेः । संसिद्धतत्त्वस्य महात्मनो-
ऽस्ति स्ववेदने का नियमाद्यवस्था ॥ ५३१ ॥ घटोऽयमिति
विज्ञातुं नियमः कोन्ववेक्षते । विना प्रमाणसुष्ठुत्वं यस्मिन्सति
पदार्थधीः ॥ ५३२ ॥ अयमात्मा नित्यसिद्धः प्रमाणे सति
भासते ॥ न देशं नाऽपि वा कालं न शुद्धिं वाप्यपेक्षते॥५३३॥

देवदत्तोऽहमित्येतद्विज्ञानं निरपेक्षकम् । तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ॥ ५३४ ॥ भानुनेव जगत्सर्वं भासते यस्य तेजसा । अनात्मकमसत्तुच्छं किंतु तस्यावभासकम् ॥ ५३५ ॥ वेदशास्त्रपुराणानि भूतानि सकलान्यपि । येनार्थवन्ति तं किंतु विज्ञातारं प्रकाशयेत् ॥ ५३६ ॥ एष स्वयंज्योतिरनन्तशक्तिरात्माऽप्रमेयः सकलानुभूतिः । यमेव विज्ञाय विमुक्तबन्धो जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ ५३७ ॥ न खिद्यते नो विषयैः प्रमोदते न सज्जते नापि विरज्यते च । स्वस्मिन्सदा क्रीडति नन्दति स्वयं निरन्तरानन्दरसेन तृप्तः ॥ ५३८ ॥ क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि । तथैव विद्वान्रमते निर्ममो निरहं सुखी ॥ ५३९ ॥ चिन्ताशून्यमदैन्यभैक्ष्यमशनं पानं सरिद्वारिषु स्वातन्त्र्येण निरङ्कुशस्थितिरभीर्निद्रा श्मशाने वने । वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तुशय्या मही संचारो निगमान्तवीथिषु विदां क्रीडा परे ब्रह्मणि ॥५४०॥ विमानमालम्ब्य शरीरमेतद्भुनक्त्यशेषान्विषयानुपस्थितान् । परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिङ्गोऽननुषक्तबाह्यः ॥ ५४१ ॥ दिगम्बरो वापि च साम्बरो वा त्वगम्बरो वापि चिदम्बरस्थः । उन्मत्तवद्वापि च बालवद्वा पिशाचवद्वापि चरत्यवन्याम् ॥ ५४२ ॥ कामान्निष्कामरूपी संश्चरत्येकचरो मुनिः । स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ॥ ५४३ ॥ क्वचिन्मूढो विद्वान्क्वचिदपि महाराजविभवः क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराचारकलितः । क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदितश्चरत्येवं प्राज्ञः सततपरमानन्दसुखितः ॥ ५४४ ॥ निर्धनोऽपि सदा तुष्टोऽप्यसहायो महा-

चलः । नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः ॥ ५४५ ॥ अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि । शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ॥ ५४६ ॥ अशरीरं सदासन्तमिमं ब्रह्मविदं कचित् । प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥ ५४७ ॥ स्थूलादिसंबन्धवतोऽभिमानिनः सुखं च दुःखं च शुभाशुभे च । विध्वस्तबन्धस्य सदात्मनो मुनेः कुतः शुभं वाप्यशुभं फलं वा ॥ ५४८ ॥ तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः । ग्रस्त इत्युच्यते भ्रान्त्या ह्यज्ञात्वा वस्तुलक्षणम् ॥५४९॥ तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम् । पश्यन्ति देहवन्मूढाः शरीराभासदर्शनात् ॥ ५५० ॥ अहिनिर्ल्वयनीवायं मुक्त्वा देहं तु तिष्ठति । इतस्ततश्चाल्यमानो यत्किंचित्प्राणवायुना ॥५५१॥ स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् । दैवेन नीयते देहस्तथा कालोपभुक्तिषु ॥ ५५२ ॥ प्रारब्धकर्मपरिकल्पितवासनाभिः संसारिवच्चरति भुक्तिषु मुक्तदेहः । सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५३ ॥ नैवेन्द्रियाणि विषयेषु नियुङ्क्त एष नैवापयुङ्क्त उपदर्शनलक्षणस्थः । नैव क्रियाफलमपीषदवेक्षते स सानन्दसान्द्ररसपानसुमत्तचित्तः ॥ ५५४ ॥ लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना । शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ ५५५ ॥ जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः । उपाधिनाशाद्ब्रह्मैव सन्ब्रह्माप्येति निर्द्वयम् ॥ ५५६ ॥ शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् । तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ॥ ५५७ ॥ यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पततात् । ब्रह्मीभूतस्य यतेः प्रागेव तच्चिदग्निना दग्धम्

॥ ५५८ ॥ सदात्मनि ब्रह्मणि तिष्ठतो मुनेः पूर्णाद्वयानन्दम-
यात्मना सदा । न देशकालाद्युचितप्रतीक्षा त्वङ्मांसविट्पिण्ड-
विसर्जनाय ॥ ५५९ ॥ देहस्य मोक्षो नो मोक्षो न दण्डस्य
कमण्डलोः । अविद्याहृदयग्रन्थिमोक्षो मोक्षो यतस्ततः ॥५६०॥
कुल्यायामथ वा नद्यां शिवक्षेत्रेऽथ चत्वरे । पर्णं पतति चेत्तेन
तरोः किं नु शुभाशुभम् ॥ ५६१ ॥ पत्रस्य पुष्पस्य फलस्य
नाशवद्देहेन्द्रियप्राणधियां विनाशः । नैवात्मनः स्वस्य सदात्म-
कस्यानन्दाकृतेर्वृक्षवदस्ति चैषः ॥ ५६२ ॥ प्रज्ञानघन इत्या-
त्मलक्षणं सत्यसूचकम् । अनूद्यौपाधिकस्यैव कथयन्ति विना-
शनम् ॥ ५६३ ॥ अविनाशी वारेऽयमात्मेति श्रुतिरात्मनः ।
प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु ॥ ५६४ ॥ पाषाण-
वृक्षतृणधान्यकडङ्कराद्या दग्धा भवन्ति हि मृदेव यथा तथैव ।
देहेन्द्रियासुमनआदिसमस्तदृश्यं ज्ञानाग्निदग्धमुपयाति परात्म-
भावम् ॥ ५६५ ॥ विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि ।
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥ ५६६ ॥ घटे नष्टे
यथा व्योम्नि व्योमैव भवति स्फुटम् । तथैवोपाधिविलये ब्रह्मैव
ब्रह्मवित्स्वयम् ॥ ५६७ ॥ क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं
जले । संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः ॥ ५६८ ॥
एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् । ब्रह्मभावं प्रपद्यैव
यतिर्नावर्तते पुनः ॥ ५६९ ॥ सदात्मैकत्वविज्ञानदग्धाविद्या-
दिवर्ष्मणः । अमुष्य ब्रह्मभूतत्वाद् ब्रह्मणः कुत उद्भवः ॥५७०॥
मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः । यथा रज्जौ
निष्क्रियायां सर्पाभासविनिर्गमौ ॥ ५७१ ॥ आवृतेः सदस-
त्त्वाभ्यां वक्तव्ये बन्धमोक्षणे । नावृतिर्ब्रह्मणः का॰

चादनावृतम् । यद्यस्त्यद्वैतहानिः स्याद्वैतं न सहते श्रुतिः ॥ ५७२ ॥ बन्धं च मोक्षं च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयन्ति । दृगावृतिं मेघकृतां यथा रवौ यतोऽद्वयासङ्गचिदेतदक्षरम् ॥ ५७३ ॥ अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि । बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ॥ ५७४ ॥ अतस्तौ मायया क्लृप्तौ बन्धमोक्षौ न चात्मनि । निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ॥ ५७५ ॥ न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः । न मुमुक्षुर्न वै मुक्तिरित्येषा परमार्थता ॥ ५७६ ॥ सकलनिगमचूडास्वान्तसिद्धान्तरूपं परमिदमतिगुह्यं दर्शितं ते मयाद्य । अपगतकलिदोषं कामनिर्मुक्तबुद्धिं स्वसुतवदसकृत्त्वां भावयित्वा मुमुक्षुम् ॥ ५७७ ॥ इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानतिः । स तेन समनुज्ञातो ययौ निर्मुक्तबन्धनः ॥ ५७८ ॥ गुरुरेव सदानन्दसिन्धौ निर्मग्नमानसः । पावयन्वसुधां सर्वां विचचार निरन्तरः ॥ ५७९ ॥ इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् । निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ ५८० ॥ हितमिदमुपदेशमाद्रियन्तां विहितनिरस्तसमस्तचित्तदोषाः । भवसुखविरताः प्रशान्तचित्ताः श्रुतिरसिका यतयो मुमुक्षवो ये ॥ ५८१ ॥ संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथाखिन्नानां जलकाङ्क्षया मरुभुवि श्रान्त्या परिभ्राम्यताम् । अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शयत्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥ ५८२ ॥ इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्कृतो विवेकचूडामणिः समाप्तः ॥

उपदेशसाहस्री ॥ ३२ ॥

(गद्यप्रबन्धः प्रथमोभागः ।)

शिष्यप्रतिबोधविधिप्रकरणम् १

ॐपरमात्मने नमः॥ अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय ॥ १ ॥ तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याऽभिजनैः परीक्षिताय ब्रूयात् पुनः पुनः यावद्ग्रहणं दृढीभवति ॥ २ ॥ श्रुतिश्च–'परीक्ष्य लोकान्', 'तत्त्वतो ब्रह्मविद्याम्–' इति । दृढगृहीता हि विद्या आत्मनः श्रेयसे संतत्यै च भवति । विद्यासंततिश्च प्राण्यनुग्रहाय भवति नौरिव नदीं तितीर्षोः । शास्त्रं च–'यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात् एतदेव ततो भूयः' इति । अन्यथा च ज्ञानप्राप्त्यभावात्–'आचार्यवान् पुरुषो वेद', 'आचार्याद्धैव विद्या विदिता', 'आचार्यः प्लावयिता' सम्यग्ज्ञानं प्लव इहोच्यते । इत्यादिश्रुतिभ्यः, 'उपदेक्ष्यन्ति ते ज्ञानं' इत्यादिस्मृतेश्च ॥ ३ ॥ शिष्यस्य ज्ञानाग्रहणं च लिङ्गैर्बुध्वा अग्रहणे हेतून् अधर्म–लौकिक–प्रमाद–नित्यानित्यविवेकविषयासंजातदृढपूर्वश्रुतत्व–लोकचिन्तावेक्षण–जात्याद्यभिमानादीन् तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैः अपनयेत् अक्रोधादिभिरहिंसादिभिश्च यमैः ज्ञानाविरुद्धैश्च नियमैः ॥ ४ ॥ अमानित्वादिगुणं च ज्ञानोपायं सम्यक् ग्राहयेत् ॥ ५ ॥ आप. १।२९। १०।१८

संपन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तः त्यक्तसर्वकर्मसाधनो ब्रह्मवित् ब्रह्मणि स्थितोऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहंकारममत्वादिदोषवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी पूर्वमुपदिशेत्–'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्', 'यत्र नान्यत्पश्यति', 'आत्मैवेदं सर्वम्', 'आत्मा वा इदमेक एवाग्र आसीत्', 'सर्वं खल्विदं ब्रह्म' इत्याद्याः आत्मैक्यप्रतिपादनपराः श्रुतीः ॥ ६ ॥ उपदिश्य च ग्राहयेत् ब्रह्मणो लक्षणम्–'य आत्माऽपहतपाप्मा', 'यत्साक्षादपरोक्षाद्ब्रह्म', 'योऽशनायापिपासे', 'नेति नेति', 'अस्थूलमणु', 'स एष नेति', 'अदृष्टं द्रष्टृ', 'विज्ञानमानन्दम्', 'सत्यं ज्ञानमनन्तम्', 'अदृश्येऽनात्म्ये', 'स वा एष महानज आत्मा', 'अप्राणो ह्यमनाः', 'सबाह्याभ्यन्तरो ह्यजः', 'विज्ञानघन एव', 'अनन्तरमबाह्यम्', 'अन्यदेव तद्विदितादथो अविदितात्','आकाशो वै नाम' इत्यादिश्रुतिभिः ॥७॥ स्मृतिभिश्च–'न जायते म्रियते वा', 'नादत्ते कस्यचित्पापम्', 'यथाऽकाशस्थितो नित्यम्', 'क्षेत्रज्ञं चापि मां विद्धि', 'न सत्तन्नासदुच्यते' 'अनादित्वान्निर्गुणत्वात्', 'समं सर्वेषु भूतेषु', 'उत्तमः पुरुषः' इत्यादिभिः श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिः तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च ॥ ८ ॥ एवं श्रुतिस्मृतिभिः गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत् कस्त्वमसि सोम्येति ॥ ९ ॥ स यदि ब्रूयात्–ब्राह्मणपुत्रः अदोन्वयः ब्रह्मचार्यासम्–गृहस्थो वा, इदानीमस्मि परमहंसपरिव्राट् संसारसागरात् जन्ममृत्युमहाग्राहात् उत्तितीर्षुरिति ॥ १० ॥ आचार्यो ब्रूयात् इहैव तव सोम्य मृतस्य

शरीरं वयोभिरद्यते मृद्भावं वापद्यते तत्र कथं संसारादुद्धर्तु-मिच्छसीति । नहि नद्याः अवरे कूले भस्मीभूते नद्याः पारं तरिष्यसीति ॥ ११ ॥ स यदि ब्रूयात् अन्योऽहं शरीरात् । शरीरं तु जायते म्रियते वयोभिरद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याध्यादिभिश्च प्रयुज्यते । तस्मिन् अहं स्वकृतधर्माधर्म-वशात् पक्षी नीडमिव प्रविष्टः पुनःपुनः शरीरविनाशे धर्माधर्मवशात् शरीरान्तरं यास्यामि पूर्वनीडविनाशे पक्षीव नीडान्तरम्, एवमेवाहमनादौ संसारे देवमनुष्यतिर्यङ्निरयस्थानेषु स्वकर्मवशादुपात्तमुपात्तं शरीरं त्यजन् नवं नवं च अन्यदुपाददानो जन्ममरणप्रबन्धचक्रे घटीयन्त्रवत् स्वकर्मणा भ्राम्यमाणः क्रमेणेदं शरीरमासाद्य संसारचक्रभ्रमणात् अस्मान्निर्विण्णो भगवन्तमुपसन्नोऽस्मि संसारचक्रभ्रमणप्रशमाय । तस्मान्नित्य एवाहं शरीरादन्यः शरीराणि आगच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति ॥ १२ ॥ आचार्यो ब्रूयात् साध्ववादीः सम्यक्पश्यसि कथं मृषाऽवादीः ब्राह्मणपुत्रोऽदोन्वयो ब्रह्मचार्यासम्, गृहस्थो वा इदानीमस्मि परमहंसपरिव्राडिति ॥ १३ ॥ तं प्रति ब्रूयादाचार्यः स यदि ब्रूयात्–भगवन्, कथमहं मृषाऽवादिषमिति ॥ १४ ॥ यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयवर्जितस्यात्मनः प्रत्यभ्यज्ञासीः ब्राह्मणपुत्रोऽदोन्वय इत्यादिना वाक्येनेति ॥ १५ ॥ स यदि पृच्छेत् कथं भिन्नजात्यन्वयसंस्कारं शरीरं, कथं वा अहं जात्यन्वयसंस्कारवर्जित इति ॥ १६ ॥ आचार्यो ब्रूयात् शृणु सोम्य, यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जितः इत्युक्त्वा तं स्मारयेत्–स्मर्तुमर्हसि सोम्य,

यथोक्तलक्षणं श्रावितोऽसि 'सदेव सोम्येदम्' इत्यादिभिः श्रुतिभिः स्मृतिभिश्च । लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च ॥ १७ ॥ लब्धपरमात्मलक्षणस्मृतये ब्रूयात्—योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतः अशरीरः अस्थूलादिलक्षणः अपहतपाप्मादिलक्षणश्च सर्वः संसारधर्मैः अनागन्धितः 'यत्साक्षादपरोक्षाद्ब्रह्म', 'य आत्मा सर्वान्तरः', 'अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता' नित्यविज्ञानस्वरूपः 'अनन्तरः अबाह्यः विज्ञानघन एव' परिपूर्णः आकाशवत् अनन्तशक्तिः आत्मा सर्वस्य अशनायादिवर्जितः आविर्भावतिरोभाववर्जितश्च स्वात्मविलक्षणयोः नामरूपयोः जगद्बीजभूतयोः स्वात्मस्थयोः तत्त्वान्यत्वाभ्यामनिर्वचनीययोः स्वयंवेद्ययोः सद्भावमात्रेणाचिन्त्यशक्तित्वाद्व्याकर्ता अव्याकृतयोः ॥ १८ ॥ ते नामरूपे अव्याकृते सती व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते । तच्चाकाशाख्यं भूतमनेन प्रकारेण परमात्मनः संभूतं प्रसन्नादिव सलिलान्मलमिव फेनम् । न सलिलं न च सलिलादत्यन्तभिन्नं फेनम् । सलिलव्यतिरेकेणादर्शनात् । सलिलं तु स्वच्छं अन्यत्फेनात्मलरूपात् । एवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नः तद्विलक्षणः ते नामरूपे अव्याकृते सती व्याक्रियमाणे फेनस्थानीये आकाशनामाकृती संवृत्ते ॥ १९ ॥ ततोऽपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते ततोऽप्यग्निभावं अग्नेरब्भावं ततः पृथिवीभावं इत्येवंक्रमेण पूर्वपूर्वानुप्रवेशेन पञ्चमहाभूतानि पृथिव्यन्तान्युत्पन्नानि । ततः पञ्चमहाभूतगुणविशिष्टा पृथ्वी । पृथ्व्याश्च पञ्चा-

त्मक्यो व्रीहियवाद्या ओषधयो जायन्ते ताभ्यो भक्षिताभ्यो लोहितं च शुक्रं च स्त्रीपुंसशरीरसंबन्धि जायते । तदुभयमृतुकाले अविद्याप्रयुक्तकामखजनिर्मथनोद्धृतं मन्त्रसंस्कृतं गर्भाशये निषिच्यते । तत्स्वयोनिरसानुप्रवेशेन विवर्धमानं गर्भीभूतं नवमे दशमे वा मासि संजायते ॥ २० ॥ तज्जातं लब्धनामाकृतिकं जातकर्मादिभिः मन्त्रसंस्कृतं पुनः उपनयनसंस्कारयोगेन ब्रह्मचारिसंज्ञं भवति। तदेव शरीरं पत्नीयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति । तदेव वनस्थसंस्कारेण तापससंज्ञं भवति । तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्संज्ञं भवति । इत्येवं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं शरीरम् ॥ २१ ॥ मनश्चेन्द्रियाणि च नामरूपात्मकान्येव 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुतिभ्यः ॥ २२ ॥ कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु । योऽसौ नामरूपयोर्व्याकर्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः अन्यैरदृष्टः स्वयं पश्यन् तथाऽश्रुतः शृण्वन्-अमतो मन्वानो-अविज्ञातो विजानन् 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति । अस्मिन्नर्थे श्रुतयः सहस्रशः 'तत्सृष्ट्वा तदेवानुप्राविशत्', 'अन्तः प्रविष्टः शास्ता जनानाम्', 'स एष इह प्रविष्ट.', 'एष त आत्मा', 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत', 'एष सर्वेषु भूतेषु गूढोत्मा', 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः' इत्याद्याः ॥ २३ ॥ स्मृतयोऽपि 'आत्मैव देवताः सर्वाः', 'नवद्वारे पुरे देही', 'क्षेत्रज्ञं चापि मां विद्धि', 'समः सर्वेषु भूतेषु', 'उपद्रष्टानुमन्ता

च', 'उत्तमः पुरुषस्त्वन्यः', 'अशरीरं शरीरेषु' इत्याद्याः । तस्मात् जात्यन्वयसंस्कारवर्जितस्त्वमिति सिद्धम् ॥ २४ ॥ स यदि ब्रूयात्–अन्य एवाहमज्ञः सुखी दुःखी बद्धः संसारी–अन्योऽसौ मद्विलक्षणः असंसारी देवः तमहं वल्युपहारनमस्कारादिभिः वर्णाश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि कथमहं स एवेति ॥ २५ ॥ आचार्यो ब्रूयात्–'नैवं सोम्य, प्रतिपत्तुमर्हसि प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः' कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह–'अन्योऽसावन्योऽहमस्मीति न स वेद', 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इत्येवमाद्या ॥ २६ ॥ एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्ति ॥ २७ ॥ अभेदप्रतिपत्तेश्च मोक्षं दर्शयन्ति सहस्रशः 'स आत्मा तत्त्वमसि' इति परमात्मभावं विधाय 'आचार्यवान्पुरुषो वेद' इत्युक्त्वा 'तस्य तावदेव चिरम्' इति मोक्षं दर्शयन्त्यभेदविज्ञानादेव सत्याभिसंधस्यातस्करस्येव दाहाद्यभाववत् संसाराभावं दर्शयन्ति दृष्टान्तेन–भेददर्शनादसत्याभिसंधस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन ॥ २८ ॥ 'त इह व्याघ्रो वा' इत्यादिना च अभेददर्शनात् 'स स्वराट् भवति' इत्युक्त्वा तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयन्ति–'अथ येऽन्यथाऽतो विदुरन्येराजानस्तेऽक्षय्यलोका भवन्ति' इति प्रतिशाखम् । तस्मात् मृषैवैवमवादीः ब्राह्मणपुत्रोऽदोन्वयः संसारी परमात्मविलक्षण इति ॥२९॥ तस्मात् प्रतिषिद्धत्वाद्भेददर्शनस्य भेदविषयत्वाच्च कर्मोपादानस्य कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माऽभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः । कर्मणां

तत्साधनानां च यज्ञोपवीतादीनां परमात्माभेदप्रतिपत्तिविरुद्धत्वात्। संसारिणो हि कर्माणि विधीयन्ते तत्साधनानि च यज्ञोपवीतादीनि। न परमात्मनोऽभेददर्शिनः। भेददर्शनमात्रेण च ततोऽन्यत्वम्॥३०॥यदि कर्माणि कर्तव्यानि न निवर्तयिषितानि कर्मसाधनासंबन्धिनः कर्मनिमित्तजात्याश्रमाद्यसंबन्धिनश्च परमात्मनश्च आत्मनैवाभेदप्रतिपत्तिं नावक्ष्यत् 'स आत्मा तत्त्वमसि' इत्येवमादिभिर्निश्चितरूपैर्वाक्यैः, भेदप्रतिपत्तिनिन्दां च नाभ्यधास्यत् 'एष नित्यो महिमा ब्राह्मणस्य', 'अनन्वागतं पुण्येनानन्वागतं पापेन, अत्र स्तेनोऽस्तेनः' इत्यादिना ॥ ३१ ॥ कर्मासंबन्धिस्वरूपत्वं कर्मनिमित्तवर्णाद्यसंबन्धरूपतां च नाभ्यधास्यत् कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरित्याजयिषितानि तस्मात् ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा परमात्माऽभेददर्शनविरोधात् आत्मा च पर एवेति प्रतिपत्तव्यो यथाश्रुत्युक्तलक्षणः ॥३२ ॥ स यदि ब्रूयात् भगवन्, दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना-अशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम । परश्चायमात्मा, 'अयमात्माऽपहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपासः सर्वगन्धरसवर्जितः' श्रूयते सर्वश्रुतिषु स्मृतिषु । कथं तद्विलक्षणः अनेकसंसारधर्मसंयुक्तः परमात्मानमात्मत्वेन च मां संसारिणं परमात्मत्वेन अग्निमिव शीतत्वेन प्रतिपद्येयम् । संसारी च सन् सर्वाभ्युदयनिःश्रेयससाधने अधिकृतः अभ्युदयनिःश्रेयससाधनानि कर्माणि तत्साधनानि च यज्ञोपवीतादीनि कथं परित्यजेयमिति ॥ ३३ ॥ तं प्रति ब्रूयात्—यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति तदसत्। कस्मात् मा‍ने

छिद्यमान इव वृक्षे उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वात् दाहादिसमानाश्रयैव वेदना। यत्र हि दाहः छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोकः न वेदनां दाहाद्युपलब्धरीति । कथं । क ते वेदनेति पृष्टः शिरसि मे वेदना उरसि उदरे इति वा यत्र दाहादिस्तत्रैव व्यपदिशति न तूपलब्धरीति । यद्युपलब्धरि वेदना स्यात् वेदनानिमित्तं वा दाहच्छेदादि वेदनाश्रयत्वेनोपदिशेद्दाहाद्याश्रयवत् ॥ ३४ ॥ स्वयं च नोपलभ्येत चक्षुर्गतरूपवत् । तस्मात् दाहच्छेदादिसमानाश्रयत्वेन उपलभ्यमानत्वाद्दाहादिवत् कर्मभूतैव वेदना । भावरूपत्वाच्च साश्रया तण्डुलपाकवत् । वेदनासमानाश्रय एव तत्संस्कारः । स्मृतिसमानकाल एवोपलभ्यमानत्वात् वेदनाविषयः । तन्निमित्तविषयश्च द्वेषोऽपि संस्कारसमानाश्रय एव । तथा चोक्तम् 'रूपसंस्कारतुल्याऽऽधी रागद्वेषौ भयं च यत् । गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः सदा' ॥ ३५ ॥ किमाश्रयाः पुनः रूपादिसंस्कारादय इति । उच्यते । यत्र कामादयः । क पुनस्ते कामादयः 'कामः संकल्पो विचिकित्सा' इत्यादिश्रुतेः बुद्धावेव । तत्रैव रूपादिसंस्कारादयोऽपि 'कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदये' इति श्रुतेः–'कामा येऽस्य हृदि श्रिताः', 'तीर्णो हि यदा सर्वान् शोकान् हृदयस्य', 'असङ्गो ह्ययम्', 'तद्वा अस्यैतदतिच्छन्दाः' इत्यादिश्रुतिभ्यः, 'अविकार्योऽयमुच्यते', 'अनादित्वान्निर्गुणत्वात्' इत्यादि । इच्छाद्वेषादि च क्षेत्रस्यैव विषयस्य धर्मो नात्मन इति स्मृतिभ्यश्च कर्मस्थैवाशुद्धिः नात्मस्था इति ॥ ३६ ॥ अतो रूपादिसंस्काराद्यशुद्धिसंबन्धाभावात् न पर-

सादात्मनो विलक्षणस्त्वमिति प्रत्यक्षादिविरोधाभावात् युक्तं पर एवात्माऽहमिति प्रतिपत्तुम्—'तदात्मानमेवावेदहं ब्रह्मास्मि', 'एकधैवानुद्रष्टव्यम्', 'अहमेवाऽधस्तात्', 'आत्मैवाऽधस्तात्', 'सर्वमात्मानं पश्येत्' 'यत्र त्वस्य सर्वमात्मैव', 'इदं सर्वं यदयमात्मा', 'स एषोऽकलः', 'अनन्तरमबाह्यम्', 'सबाह्याभ्यन्तरो ह्यजः', 'ब्रह्मैवेदम्', 'एतया द्वारा प्रापद्यत', 'प्रज्ञानस्य नामधेयानि', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'तस्माद्वा', 'तत्सृष्ट्वा तदेवानुप्राविशत्', 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी', 'अशरीरं शरीरेषु', 'न जायते म्रियते', 'स्वप्नान्तं जागरितान्तम्', 'स म आत्मेति विद्यात्', 'यस्तु सर्वाणि भूतानि', 'तदेजति तन्नैजति', 'वेनस्तत्पश्यन्', 'तदेवाग्निः', अहं मनुरभवं सूर्यश्च', 'अन्तः प्रविष्टः शास्ता जनानाम्', 'सदेव सोम्य', 'तत्सत्यं स आत्मा तत्त्वमसि' इत्यादिश्रुतिभ्यः ॥ ३७ ॥ स्मृतिभ्यश्च—'पूः प्राणिनः सर्वगुहाशयम्', 'आत्मैव देवताः', 'नवद्वारे पुरे', 'समं सर्वेषु भूतेषु', 'विद्याविनयसंपन्ने', 'अविभक्तं विभक्तेषु', 'वासुदेवः सर्वम्' इत्यादिभ्यः एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम् ॥ ३८ ॥ स यदि ब्रूयात् यदि भगवन्, 'अनन्तरोऽबाह्यः' 'सबाह्याभ्यन्तरो ह्यजः' 'कृत्स्नः प्रज्ञानघन एव' सैन्धवघनवदात्मा सर्वमूर्तिभेदवर्जितः आकाशवदेकरसः तर्हि किमिदं दृश्यते श्रूयते वा साध्यं साधनं वा साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्तिविषय इति ॥ ३९ ॥ आचार्यो ब्रूयात्—अविद्याकृतमेतद्यदिदं दृश्यते श्रूयते वा, परमार्थतस्त्वेक एवात्मा अविद्यादृष्टेः आभासते, तिमिरदृष्ट्या अनेकचन्द्रवत् 'यत्र वा

मानः तथापि न परमात्मा, कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः, प्रत्यक्षादिभिः प्रमाणैः अनुभूयमानत्वात् । न अविद्यानिमित्तः अविद्यायाः स्वात्मविषयत्वानुपपत्तेः । अविद्या नाम अन्यस्मिन् अन्यधर्माध्यारोपणा–यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां, यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति प्रसिद्धं वा स्थाणुं पुरुषे । नाप्रसिद्धं प्रसिद्धे प्रसिद्धं चाप्रसिद्धे । नचात्मन्यनात्मानमध्यारोपयति आत्मनः अप्रसिद्धत्वात् । तथा आत्मानं अनात्मनि आत्मनोऽप्रसिद्धत्वादेव ॥ ५१ ॥ तं गुरुरुवाच–न, व्यभिचारात् । नहि वत्स, प्रसिद्धं प्रसिद्ध एवाध्यारोपयतीति नियन्तुं शक्यम् । आत्मन्यध्यारोपणदर्शनात् । गौरोऽहं कृष्णोऽहमिति देहधर्मस्य अहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य च आत्मनः देहे अयमस्मीति ॥ ५२ ॥ शिष्य आह—प्रसिद्ध एव तर्ह्यात्मा अहंप्रत्ययविषयतया देहश्च अयमिति । तत्रैवंसति प्रसिद्धयोरेव देहात्मनोरितरेतराध्यारोपणात् स्थाणुपुरुषयोः शुक्तिकारजतयोरिव । तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरितरेतराध्यारोपणेति नियन्तुं न शक्यते इति ॥ ५३ ॥ गुरुराह-शृणु । सत्यं प्रसिद्धौ देहात्मानौ नतु स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ । कथं तर्हि नित्यमेव निरंतराविविक्तप्रत्ययविषयतया । नहि अयं देहः, अयमात्मा, इति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यतः कश्चित् । अतएव हि मोमुह्यते लोकः आत्मानात्मविषये एवमात्मा नैवमात्मा इति । इमं विशेषमाश्रित्यावोचं नैवं नियन्तुं शक्यमिति॥५४॥ ननु अविद्याऽध्यारोपितं यत्र यत् तदसत् तत्र दृष्टं यथा रजतं

शुक्तिकायां, स्थाणौ पुरुषं, रज्ज्वां सर्पः, आकाशे तलमलिनत्वमित्यादि, तथा–देहात्मनोरपि नित्यमेव निरन्तराविविक्तप्रत्ययतया इतरेतराध्यारोपणा कृता स्यात् तदितरेतरयोः नित्यमेव असत्त्वे स्यात् । यथा शुक्तिकादिपु अविद्याध्यारोपितानां रजतादीनां नित्यमेव अत्यन्तासत्त्वं तद्विपरीतानां च विपरीतेपु तद्वत् देहात्मनोरविद्ययैव इतरेतराध्यारोपणा कृता स्यात् । तत्रैवंसति देहात्मनोरसत्त्वं प्रसज्येत । तच्चानिष्टं वैनाशिकपक्षत्वात् । अथ तद्विपर्ययेण देहः आत्मन्यविद्याऽध्यारोपितः देहस्यात्मनि सति असत्त्वं प्रसज्येत । तच्चानिष्टं प्रत्यक्षादिविरोधात् । तस्माद्देहात्मानौ नाविद्यया इतरेतरस्मिन् अध्यारोपितौ कथं तर्हि वंशस्तम्भवन्नित्यसंयुक्तौ ॥ ५५ ॥ न । अनित्यत्वपरार्थप्रसङ्गात्–संहतत्वात् परार्थत्वं अनित्यत्वं च वंशस्तम्भादिवदेव । किंच यस्तु परैर्देहेन संहतः कल्पित आत्मा स संहतत्वात् परार्थः । तेन असंहतः परोऽन्यो नित्यः सिद्धस्तावत् ॥ ५६ ॥ तस्यासंहतस्य देहे देहमात्रतया अध्यारोपितत्वेन असत्त्वानित्यत्वादिदोषप्रसङ्गो भवति । तत्र निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्यात् ॥ ५७ ॥ न स्वत एवात्मनः आकाशस्येव असंहतत्वाभ्युगपगमात् सर्वेणासंहतः स च आत्मेति न निरात्मको देहादिः सर्वः स्यात् । तथाच आकाशं सर्वेणासंहतमिति सर्वं न निराकाशं भवति एवम् । तस्मान्न वैनाशिकपक्षप्राप्तिदोषः स्यात् ॥ ५८ ॥ यत्पुनरुक्तं देहस्यात्मन्यसत्त्वे प्रत्यक्षादिविरोधः स्यादिति । तन्न । प्रत्यक्षादिभिः आत्मनि देहस्य सत्त्वानुपलब्धेः । नह्यात्मनि कुण्डे बदरं क्षीरे सर्पिः तिले तैलं भित्तौ चित्रमिव च

युक्ता । नहि चन्दनकण्टककृते सुखदुःखे चन्दनकण्टकार्थे घटोपयोगो वा घटार्थः । तस्मात् तद्विज्ञातुर्मम चन्दनादिकृतः अर्थः । अहं हि ततोऽन्यः समस्तमर्थं जानामि बुद्ध्यारूढम् ॥ ७० ॥ तं गुरुरुवाच—एवं तर्हि स्वार्थस्त्वं चितिमत्त्वान्न परेण प्रयुज्यसे । नहि चितिमान् परतन्त्रः परेण प्रयुज्यते—चितिमतश्चितिमदर्थत्वानुपपत्तेः समत्वात्प्रदीपप्रकाशयोरिव । नापि अचितिमदर्थत्वं चितिमतो भवति, अचितिमतोऽचितिमत्त्वादेव स्वार्थसंबन्धानुपपत्तेः । नापि अचितिमतोः अन्योन्यार्थत्वं दृष्टम् । नहि काष्ठकुड्ये अन्योन्यार्थं कुर्वाते ॥ ७१ ॥ ननु चितिमत्त्वे समेऽपि भृत्यस्वामिनोः अन्योन्यार्थत्वं दृष्टम् ॥७२॥ नैवं—अग्नेरुष्णप्रकाशवत् तव चितिमत्त्वस्य विवक्षितत्वात् प्रदर्शितश्च दृष्टान्तः प्रदीपप्रकाशयोरिति । तत्रैवंसति स्वबुद्ध्यारूढमेव सर्वमुपलभसे अग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचैतन्यस्वरूपेण यदि चैवमात्मनः सर्वदा निर्विशेषत्वमुपगच्छसि । किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोः दुःखमनुभवामि इति । किं अयमेव मम स्वभावः किंवा नैमित्तिकः इति च । किमसौ व्यामोहोऽपगतः किंवा नेति ॥ ७३ ॥ इत्युक्तः शिष्य आह—भगवन्, अपगतः त्वत्प्रसादात् व्यामोहः किंतु मम कूटस्थतायां संशयः कथम्—शब्दादीनां स्वतः सिद्धिर्नास्ति अचेतनत्वात्—शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषाम् प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारवतां स्वतः सिद्ध्यसंभवात् । तस्माद्बाह्याकारनिमित्तत्वं गम्यते इति बाह्याकारवत् शब्दाद्याकारत्वसिद्धिः । तथा प्रत्ययानामपि अहंप्रत्ययालम्बनवस्तुभेदानां संहतत्वात् अचैतन्योपपत्तेः स्वार्थत्वासं-

भवात्–स्वरूपव्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धिः शब्दादिवदेव असंहतत्वे सति चैतन्यात्मकत्वात् स्वार्थोऽपि अहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावानेव कूटस्थ इति संशयः ॥ ७४ ॥ तं गुरुरुवाच–न युक्तस्तव संशयः । यतस्तेषां प्रत्ययानां नियमेन अशेषतः उपलब्धेरेव अपरिणामित्वात् कूटस्थत्वसिद्धौ निश्चयहेतुमेव अशेषचित्तप्रचारोपलब्धिं संशयहेतुमात्थ । यदि हि तव परिणामित्वं स्यात् अशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्यात् चित्तस्येव स्वविषये । यथा चेन्द्रियाणां स्वविषयेषु । नच तथाऽऽत्मनस्तव स्वविषयैकदेशोपलब्धिः । अतः कूटस्थतैव तवेति ॥ ७५ ॥ तत्राह—उपलब्धिर्नाम धात्वर्थो विक्रियैव उपलब्धुः कूटस्थात्मता चेति विरुद्धम् ॥७६॥ न धात्वर्थविक्रियायां उपलब्ध्युपचारात् । यो हि बौद्धः प्रत्ययः स धात्वर्थो विक्रियात्मकः आत्मनः उपलब्ध्याभासफलावसान इति उपलब्धिशब्देन उपचर्यते । यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थेन उपचर्यते तद्वत् ॥ ७७ ॥ इत्युक्तः शिष्य आह–ननु भगवन्, मम कूटस्थत्वप्रतिपादनं प्रति असमर्थो दृष्टान्तः कथम्, छिदिः छेद्यविक्रियावसाना उपचर्यते–यथा धात्वर्थत्वेन तथा उपलब्धिशब्दोऽपचरितोऽपि धात्वर्थो बौद्धप्रत्ययः आत्मनः उपलब्धिविक्रियावसानश्चेत् नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः ॥ ७८ ॥ गुरुरुवाच–सत्यमेवं स्यात् यदि उपलब्ध्युपलब्ध्रोः विशेषः । नित्योपलब्धिमात्र एव हि उपलब्धा नतु तार्किकसमय इव अन्या उपलब्धिः अन्यः उपलब्धा च ॥ ७९ ॥ ननु उपलब्धिफलावसानो धात्वर्थः कथमिति ॥ ८० ॥ उच्यते–शृणु–उपलब्ध्याभा-

सफलावसान इत्युक्तं किं न श्रुतं तत् त्वया, नतु आत्मा विक्रियोत्पादनावसान इति मयोक्तम् ॥ ८१ ॥ शिष्य उवाच— कथं तर्हि कूटस्थे मयि अशेषस्वविषयचित्तप्रचारोपलब्धृत्वमित्यात्थ ॥ ८२ ॥ तं गुरुरुवाच—सत्यमवोचं, तेनैव कूटस्थतामब्रुवं तव ॥ ८३ ॥ यद्येवं भगवन्, कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकारबौद्धप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सु उत्पद्यमानेषु कस्त्वपराधो मम ॥ ८४ ॥ सत्यम् नास्त्यपराधः किंतु अविद्यामात्रस्तु अपराध इति प्रागेवावोचम् ॥ ८५ ॥ यदि भगवन्, सुषुप्त इव मम विक्रिया नास्ति कथं स्वप्नजागरिते ॥ ८६ ॥ तं गुरुरुवाच—किंत्वनुभूयेते त्वया सततम् ॥ ८७ ॥ बाढम् अनुभवामि, किंतु विच्छिद्यविच्छिद्य नतु सततम् ॥ ८८ ॥ तं गुरुरुवाच—तर्हि आगन्तुके त्वेते न तवात्मभूते, यदि तवात्मभूते चैतन्यस्वरूपवत् स्वतःसिद्धे संतते एव स्याताम् । किंच स्वप्नजागरिते न तव आत्मभूते व्यभिचारित्वात् वस्त्रादिवत् । नहि यस्य यत्स्वरूपं तत् तद्व्यभिचारि दृष्टम् । स्वप्नजागरिते तु चैतन्यमात्रत्वाद्व्यभिचरतः । सुषुप्ते चेत् स्वरूपं व्यभिचरेत् तन्नष्टं नास्तीति वा बाध्यमेव स्यात् आगन्तुकानां अतद्धर्माणां उभयात्मकत्वदर्शनात् यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रान्तिलब्धानां तु अभावो दृष्टः ॥८९॥ नन्वेवं भगवन्, चैतन्यस्वरूपमपि आगन्तुकं प्राप्तम् । स्वप्नजागरितयोरिव सुषुप्ते अनुपलब्धेः । अचैतन्यस्वरूपो वा स्यामहम् ॥ ९० ॥ न पश्य तदनुपपत्तेः । चैतन्यस्वरूपं चेत् आगन्तुकं पश्यसि, पश्य । नैतद्वर्षशतेनापि उपपत्त्या कलयितुं शक्नुमो वयम्, अन्यो वाऽचैतन्योऽपि संहतत्वात् पारार्थ्यं अनेकत्वं

नाशित्वं च न केनचित् उपपत्त्या वारयितुं शक्यम् । अस्यार्थस्य स्वतःसिद्धभावादित्यवोचाम । चैतन्यस्वरूपस्य तु आत्मनः स्वतःसिद्धेः अन्यानपेक्षत्वं न केनचित् वारयितुं शक्यम्, अव्यभिचारात् ॥ ९१ ॥ ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति ॥ ९२ ॥ न व्याहतत्वात् । कथं व्याघातः पश्यतस्तव न पश्यामि इति व्याहतं वचनम् । नहि कदाचित् भगवन्, सुषुप्ते मया चैतन्यं अन्यद्वा किंचित् दृष्टम् । पश्यन् तर्हि सुषुप्ते त्वम् यस्मात् दृष्टमेव प्रतिषेधसि न दृष्टिम् । या तव दृष्टिः तत् चैतन्यमिति मयोक्तम् । यया त्वं विद्यमानया न किंचित् दृष्टमिति प्रतिषेधसि सा दृष्टिः त्वच्चैतन्यम् । तर्हि सर्वत्र अव्यभिचारात् कूटस्थनित्यत्वं सिद्धं स्वत एव न प्रमाणापेक्षम् । स्वतःसिद्धस्य हि प्रमातुः अन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा । या तु अन्या नित्यापरिच्छित्तिः अपेक्ष्यते अन्यस्य अपरिच्छित्तिरूपस्य परिच्छेदाय सा हि नित्यैव कूटस्था स्वयंज्योतिःस्वभावा, आत्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति प्रमाणापेक्षा, तत्स्वभावत्वात् । यथा प्रकाशनं उष्णत्वं वा लोहोदकादिषु परतः अपेक्षते अग्न्यादित्यादिभ्यः अतत्स्वभावत्वात् न अग्न्यादित्यादीनां तदपेक्षा सर्वदा तत्स्वभावत्वात् ॥ ९३ ॥ अनित्यत्वे एव प्रमा स्यात् न नित्यत्वे इति चेत् ॥ ९४ ॥ न । अवगतेः नित्यत्वानित्यत्वयोः विशेषानुपपत्तेः । नहि अवगतेः प्रमात्वे अनित्या अवगतिः प्रमा न नित्या इति विशेषः अवगम्यते ॥ ९५ ॥ नित्यायां प्रमातुः अपेक्षाभावः । अनित्यायां तु यत्नान्तरितत्वात् अवगतिः अपेक्ष्यत इति विशेषः स्यात् इति चेत् ॥ ९६ ॥ सिद्धा तर्हि आ-

त्मनः प्रमातुः स्वतःसिद्धिः प्रमाणनिरपेक्षतयैवेति ॥ ९७ ॥ अभावेऽपि अपेक्षाऽभावः नित्यत्वात् इति चेत् न । अवगतेरेव आत्मनि सद्भावादिति परिहृतमेतत् ॥ ९८ ॥ प्रमातुश्चेत् प्रमाणापेक्षासिद्धिः कस्य प्रमित्सा स्यात् । यस्य प्रमित्सा स एव प्रमाता अभ्युपगम्यते तदीया च प्रमित्सा प्रमेयविषयैव न प्रमातृविषया । प्रमातृविषयत्वे अनवस्थाप्रसङ्गात् । प्रमातुः तदिच्छायाश्च तस्याप्यन्यः प्रमाता तस्याप्यन्य इति एवमेव इच्छायाः प्रमातृविषयत्वे प्रमातुरात्मनः अव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः । लोके हि प्रमेयं नाम प्रमातुः इच्छा–स्मृति–प्रयत्न–प्रमाणजन्म–व्यवहितं सिद्ध्यति नान्यथा । अवगतिः प्रमेयविषया दृष्टा । नच प्रमातुः प्रमाता स्वस्य स्वयमेव केनचित् व्यवहितः कल्पयितुं शक्यः इच्छादीनामन्यतमेनापि । स्मृतिश्च स्मर्तव्यविषया न स्मर्तृविषया । तथा इच्छायाः इष्टविषयत्वमेव न इच्छावद्विषयत्वम् स्मर्त्रिच्छावद्विषयत्वेऽपि हि उभयोः अनवस्था पूर्ववदपरिहार्या स्यात् ॥ ९९ ॥ ननु प्रमातृविषयावगत्यनुत्पत्तौ अनवगत एव प्रमाता स्यादिति चेत् ॥ १०० ॥ न, अवगन्तुः अवगतेः अवगन्तव्यविषयत्वात् अवगन्तृविषयत्वे च अनवस्था पूर्ववत् स्यात् । अवगतिश्च आत्मनि कूटस्थनित्यात्मज्योतिः अन्यतः अन्यतः अनपेक्षैव सिद्धा अग्न्यादित्याद्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितम् । अवगतेः चैतन्यात्मज्योतिषः स्वात्मनि अनित्यत्वे आत्मनः स्वार्थतानुपपत्तिः कार्यकारणसंघातवत् संहतत्वात् पारार्थ्यं दोषवत्त्वं च अवोचाम । कथम् । चैतन्यात्मज्योतिषः स्वात्मनि अनित्यत्वे [illegible] व्यवधानात् [illegible]त्वम् । ततश्च तस्य चैतन्यज्योतिषः

त्तेः प्रशंसाचोर्यं आत्मन्येव अभावात् चक्षुरादीनामिव संहतत्वात् पारार्थ्यं स्यात् । यदा च तत् उत्पन्नं आत्मनि विद्यते न तदा आत्मनः स्वार्थत्वम् तद्भावाभावापेक्षा हि आत्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिः । तस्मात् आत्मनः अन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम् ॥ १०१ ॥ ननु एवं सति अमति प्रमाऽश्रयत्वे कथं प्रमातुः प्रमातृत्वम् ॥ १०२ ॥ उच्यते— प्रमायाः नित्यत्वे अनित्यत्वे च रूपविशेषाभावात् । अवगतिर्हि प्रमा तस्याः स्मृतीच्छादिपूर्विकायाः अनित्यायाः कूटस्थनित्याया वा न स्वरूपविशेषो विद्यते। यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्य अनित्यस्य अपूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टः तिष्ठन्ति मनुष्याः तिष्ठन्ति पर्वताः इत्यादि । तथा नित्यावगतिस्वरूपेऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते फलसामान्यादिति ॥ १०३ ॥ अत्राह शिष्यः–नित्यावगतिस्वरूपस्य आत्मनः अविक्रियत्वात् कार्यकरणैः असंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते, असंहतस्वभावस्य च कार्यकरणोपादाने अनवस्था प्रसज्यते, तक्षादीनां तु कार्यकरणैः नित्यमेव संहतत्वमिति वास्याद्युपादाने नानवस्था स्यादिति ॥ १०४ ॥ इह तु असंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करणं उपादेयम् –तदुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणान्तरमुपादेयम्, तदुपादानेऽपि अन्यदिति प्रमातुः स्वातन्त्र्ये अनवस्था अपरिहार्या स्यात् इति । नच क्रियैव आत्मानं कारयति अनिर्वर्तितायाः स्वरूपाभावात् । अथ अन्यत् आत्मानं उपेत्य क्रियां कारयतीति चेत् । न । अन्यस्य स्वतःसिद्धत्वाविषयत्वाद्यनुपप-

त्तेः। नहि आत्मनः अन्यत् अचेतनं वस्तु स्वप्रमाणकं दृष्टम्। शब्दादिसर्वमेव अवगतिफलावसानप्रत्ययप्रमितं सिद्धं स्यात् अवगतिश्चेदात्मनोऽन्यस्य स्यात् सोऽपि आत्मैव असंहतः स्वार्थः स्यात् न परार्थः। नच देहेन्द्रियविषयाणां स्वार्थतां अवगन्तुं शक्नुमः। अवगत्यवसानप्रत्ययाऽपेक्षसिद्धिदर्शनात् ॥ १०५ ॥ ननु देहस्यावगतौ न कश्चित् प्रत्यक्षादिप्रत्ययान्तरं अपेक्षते ॥ १०६ ॥ बाढम्। जाग्रति एवं स्यात्। मृतिसुषुप्त्योस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिः तथैव इन्द्रियाणां बाह्या एव हि शब्दादयो देहेन्द्रियाकारपरिणता इति प्रत्यक्षादिप्रमाणापेक्षैव हि सिद्धिः। सिद्धिरिति च प्रमाणफलं अवगतिं अवोचाम। सा च अवगतिः कूटस्था स्वयंसिद्धाऽऽत्मज्योतिःस्वरूपेति च ॥ १०७ ॥ अत्राह चोदकः। अवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपेति च विप्रतिषिद्धम् इत्युक्तवन्तमाह–न विप्रतिषिद्धम्। कथं तर्हि कूटस्था नित्यापि सती प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते तादर्थ्यात्। प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे अनित्येव भवति तेन प्रमाणानां फलं इति उपचर्यते ॥ १०८ ॥ यद्येवं भगवन्! कूटस्थनित्यावगतिः आत्मज्योतिःस्वरूपैव स्वयंसिद्धा आत्मनि प्रमाणनिरपेक्षत्वात् ततोऽन्यतः अचेतनं संहत्यकारित्वात् परार्थं येन च सुखदुःखमोहप्रत्ययावगतिरूपेण पारार्थ्यं तेनैव स्वरूपेण अनात्मनः अस्तित्वं नान्येन रूपान्तरेण, अतो नास्तित्वमेव परमार्थतः। यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेण अभावो दृष्टः एवं जाग्रत्स्वप्नद्वैतभावस्यापि तदवगतिव्यतिरेकेण अभावो युक्तः एवमेव परमार्थतः भगवन्, अवगतेः आत्मज्योतिषः

नैरन्तर्यभावात् कूटस्थनित्यता अद्वैतभावश्च सर्वप्रत्ययभेदेषु अव्यभिचारात् प्रत्ययभेदाश्च अवगतिं व्यभिचरन्ति । यथा स्वप्ने नीलपीताद्याकारभेदरूपाः प्रत्ययाः तदवगतिं व्यभिचरन्तः परमार्थतो न सन्तीत्युच्यन्ते एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदाः तामेवावगतिं व्यभिचरन्तः असत्यरूपाः भवितुमर्हन्ति । तस्याश्च अवगतेः अन्यः अवगन्ता नास्तीति न स्वेन स्वरूपेण स्वयं उपादातुं हातुं वा शक्यते अन्यस्य च अभावात् ॥ १०९ ॥ तथैवेति । एषा अविद्या यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः । तस्याः अविद्यायाः विद्या निवर्तिका । इत्येवं त्वं अभयं प्राप्तोऽपि-नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यसि संसारदुःखान्मुक्तोऽसीति ॥ ११० ॥ ओमिति ॥ १११ ॥

इति कूटस्थाद्वयात्मबोधनामकं अवगतिप्रकरणं द्वितीयं विवृतम् ॥२॥

अथ परिसंख्यानप्रकरणं तृतीयम् ॥ ३ ॥

मुमुक्षूणां उपात्तपुण्यापुण्यक्षपणपराणां अपूर्वानुपचयार्थिनो परिसंख्यानमिदमुच्यते अविद्याहेतवो दोषाः वाङ्मनःकायप्रवृत्तिहेतवः-प्रवृत्तेश्च इष्टानिष्टमिश्रफलानि कर्माणि उपचीयन्ते इति तन्मोक्षार्थम् ॥ ११२ ॥ तत्र शब्दस्पर्शरूपरसगन्धानां श्रोत्रादिग्राह्यत्वात् स्वात्मनि परेषु वा विज्ञानाभावः, तेषामेव परिणतानां यथा लोष्टादीनां श्रोत्रादिद्वारैश्च ज्ञायन्ते, येन च ज्ञायन्ते सः ज्ञातृत्वात् अतज्जातीयः, ते हि शब्दादयः अन्योन्यसंसर्गित्वात् जन्मवृद्धिविपरिणामापक्षयनाशसंयोगवियोगाविर्भावतिरोभावविकारविकारिक्षेत्रबीजाद्यनेकधर्माणः सामान्येन च सुखदुःखाद्यनेककर्माणः तद्विज्ञातृत्वादेव तद्विज्ञाता सर्वशब्दादिधर्मविलक्षणः ॥ ११३ ॥ तत्र शब्दादिभिः उप-

लभ्यमानैः पीड्यमानो विद्वान् एवं परिसंचक्षीत ॥ ११४ ॥
शब्दस्तु ध्वनिसामान्यमात्रेण विशेषधर्मैर्वा षड्जादिभिः प्रियैः स्तुत्यादिभिः इष्टैः अनिष्टैश्च असत्यबीभत्सपरिभवाऽऽक्रोशादिभिर्वचनैः मां दृक्स्वभावं असंसर्गिणं अविक्रियं अचलं अनिधनं अभयं अत्यन्तसूक्ष्मं अविषयं गोचरीकृत्य स्प्रष्टुं नैवार्हति असंसर्गित्वादेव माम् । अतएव न शब्दनिमित्ता हानिः वृद्धिर्वा अतो मां किं करिष्यति स्तुतिनिन्दादिप्रियाप्रियत्वादिलक्षणः शब्दः । अविवेकिनं हि शब्दं आत्मत्वेन गतं प्रियः शब्दो वर्धयेत् अप्रियश्च क्षपयेत् अविवेकित्वात्, नतु मम विवेकिनो वालाग्रमात्रमपि कर्तुमुत्सहत इति, एवमेव स्पर्शसामान्येन तद्विशेषैश्च शीतोष्णमृदुकर्कशादि–ज्वरोदरशूलादिलक्षणैश्च अप्रियैः प्रियैश्च कैश्चित् शरीरसमवायिभिः बाह्यागन्तुकनिमित्तैश्च न मम काचित् विक्रिया वृद्धिहानिलक्षणा अस्पर्शत्वात् क्रियते व्योम्न इव मुष्टिघातादिभिः । तथा रूपसामान्येन तद्विशेषैश्च प्रियाप्रियैः स्त्रीव्यञ्जनादिलक्षणैः अरूपत्वात् न मम काचित् हानिः वृद्धिर्वा क्रियते । तथा रससामान्येन तद्विशेषैश्च प्रियाप्रियैः मधुराम्ललवणकटुतिक्तकषायैः मूढबुद्धिभिः परिगृहीतैः अरसात्मकस्य मम न काचित् हानिः वृद्धिर्वा क्रियते । तथा गन्धसामान्येन तद्विशेषैः प्रियाप्रियैः पुष्पाद्यनुलेपनादिलक्षणैः अगन्धात्मकस्य न मम काचित् हानिः वृद्धिर्वा क्रियते–'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' इति श्रुतेः ॥ ११५ ॥ किंच य एव बाह्याः शब्दादयः ते शरीराकारेण संस्थिताः तद्ग्राहकैश्च श्रोत्राद्याकारैःअन्तःकरणद्वयतद्विषयाकारेण च अन्योन्यसंसर्गितात् संहतत्वाच्च सर्वक्रियासु

एवं सति विदुषो मम न कश्चित् शत्रुः मित्रं उदासीनो वा अस्ति, तत्र यदि कश्चित् मिथ्याज्ञानाभिमानेन प्रियं अप्रियं वा प्रयुयुङ्क्षेत क्रियाफललक्षणं तन्मृषैव प्रयुयुङ्क्षते सः तस्य अविषयत्वान्मम—'अव्यक्तोऽयमचिन्त्योऽयं, इति स्मृतेः । तथा सर्वेषां पञ्चानामपि भूतानां अविकार्यः अविषयत्वात् 'अच्छेद्योऽयमदाह्योऽयं' इति स्मृतेः । यापि शरीरेन्द्रियसंस्थानमात्रमुपलक्ष्य मद्भक्तानां विपरीतानां च क्रियाऽक्रियादिप्रयुयुङ्क्षा तज्जा च धर्माधर्मादिप्राप्तिः सा तेषामेव ननु मयि अजरे अमृते अभये 'नैनं कृताकृते तपतः', 'न कर्मणा वर्धते नो कनीयान्—', 'स बाह्याभ्यन्तरो ह्यजः', 'न लिप्यते लोकदुःखेन बाह्यः' इत्यादिश्रुतिस्मृतिभ्यः अनात्मवस्तुनश्च असत्त्वात् इति परमो हेतुः । आत्मनश्च अद्वयत्वविषयाणि द्वयस्यासत्त्वात् यानि सर्वाणि उपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति ॥ ११६ ॥ इति श्रीमच्छंकरभगवत्पादकृतौ उपदेशसाहस्र्यां गद्यप्रबन्धः समाप्तः ॥

उपदेशसाहस्री (पद्यप्रबन्धः) ॥ ३३ ॥

उपोद्घातप्रकरणम् ॥ १ ॥

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् । यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥ समापय्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः । ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥ २॥ कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये । ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ॥ ३ ॥ धर्माधर्मौ ततो ज्ञस्य देहयोगस्तथा

पुनः । एवं नित्यप्रवृत्तोऽयं संसारश्चक्रवद्भृशम् ॥ ४ ॥ अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते । ब्रह्मविद्यात आरब्धा ततो निःश्रेयसं भवेत् ॥ ५ ॥ विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः । नाज्ञानस्याप्रहाणे हि रागद्वेषक्षयो भवेत् ॥ ६ ॥ रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवम् । तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते ॥ ७ ॥ ननु कर्म तथा नित्यं कर्तव्यं जीवने सति । विद्यायाः सहकारित्वं मोक्षं प्रति हि तद्व्रजेत् ॥ ८ ॥ यथा विद्या तथा कर्म चोदितत्वाविशेषतः । प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः ॥९॥ ननु ध्रुवफला विद्या नान्यत्किंचिदपेक्षते । नाग्निष्टोमो यथैवान्यद्ध्रुवकार्योऽप्यपेक्षते ॥ १० ॥ तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते । इत्येवं केचिदिच्छन्ति न कर्म प्रतिकूलतः ॥ ११ ॥ विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः । निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्तिता ॥ १२ ॥ अहं कर्ता ममेदं स्यादिति कर्म प्रवर्तते । वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः ॥ १३ ॥ कारकाण्युपमृद्नाति विद्या बुद्धिमिवोपरे । इति तत्सत्यमादाय कर्म कर्तुं व्यवस्यति ॥ १४ ॥ विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया । सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा ॥ १५ ॥ देहाद्यैरविशेषेण देहिनो ग्रहणं निजम् । प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत् ॥ १६ ॥ नेतिनेतीति देहादीनपोह्यात्मावशेषितः । अविशेषात्मबोधार्थं तेनाविद्या निवर्तिता ॥ १७ ॥ निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः । असत्येवाविशेषेऽपि प्रत्यगात्मनि केवले ॥ १८ ॥ न चेद्भूयः प्रसूयेत कर्ता भोक्तेति धीः कथम् । सदसीति च विज्ञाने तस्माद्विद्याऽसहायिका ॥ १९ ॥

अत्यरेचयदित्युक्तो न्यासः श्रुत्यात एव हि । कर्मभ्यो मानसान्तेभ्य एतावदिति वाजिनाम् ॥ २० ॥ अमृतत्वं श्रुतं यस्मात्त्याज्यं कर्म मुमुक्षुभिः । अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते ॥ २१ ॥ नैककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः । विद्या तद्विपरीतातो दृष्टान्तो विषमो भवेत् ॥ २२ ॥ कृष्यादिवत्फलार्थत्वादन्यकर्मोपबृंहणम् । अग्निष्टोमस्त्वपेक्षेत विद्यान्यत्किमपेक्षते ॥ २३ ॥ प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते । अहंकारफलार्थित्वे विद्येते नात्मवेदिनः ॥ २४ ॥ तस्मादज्ञानहानाय संसारविनिवृत्तये । ब्रह्मविद्याविधानाय प्रारब्धोपनिषत्त्वियम् ॥ २५ ॥ सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत् । मन्दीकरणभावाच्च गर्भादेः शातनात्तथा ॥ २६ ॥ इति प्रथममुपोद्घातप्रकरणम् ॥ १ ॥

प्रतिषेधप्रकरणम् ॥ २ ॥

प्रतिषेद्धुमशक्यत्वान्नेतिनेतीति शेषितम् । इदं नाहमिदं नाहमित्यद्धा प्रतिपद्यते ॥ १ ॥ अहंधीरिदमात्मोत्था वाचारम्भणगोचरा । निषिद्धात्मोद्भवत्वात्सा न पुनर्मानतां व्रजेत् ॥२॥ पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः । दृशिरेक स्वयं सिद्धः फलत्वात्स न बाध्यते ॥ ३ ॥ इदं वनमतिक्रम्य शोकमोहादिदूषितम् । वनाद्गान्धारको यद्वत्स्वात्मानं प्रतिपद्यते ॥ ४ ॥ इति द्वितीयं आत्मज्ञानोत्पत्तिविधिप्रकरणम् ॥ २ ॥

ईश्वरात्मप्रकरणम् ॥ ३ ॥

ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत् । आत्मा चेदीश्वरोऽस्मीति विद्या सान्यनिवर्तिका ॥ १ ॥ आत्मनोऽन्यस्य

॥ ४ ॥ चैतन्यभासताहमस्तादर्थ्यं च तदस्य यत् । इदमंशग्रहाणेन परः सोऽनुभवो भवेत् ॥ ५ ॥ इति पंचमं बुद्ध्यपराधप्रकरणम् ॥ ५ ॥

विशेषापोहप्रकरणम् ॥ ६ ॥

छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशिष्यते । तथा शिष्टेन सर्वेण येन येन विशेष्यते ॥ १ ॥ तस्मात्त्यक्तेन हस्तेन तुल्यं सर्व विशेषणम् । अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः ॥ २ ॥ विशेषणमिदं सर्व साध्वलंकरणं यथा । अविद्याध्यासतः सर्व ज्ञात आत्मन्यसद्भवेत् ॥ ३ ॥ ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः । अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत् ॥ ४ ॥ यावान्स्यादिदमंशो यः स स्वतोऽन्यो विशेषणम् । विशेषप्रक्षयो यत्र सिद्धो ज्ञश्चित्रगुर्यथा ॥ ५ ॥ इदमंशोऽहमित्यत्र त्याज्यो नात्मेति पण्डितैः । अहंब्रह्मेति शिष्टांशो भूतपूर्वगतेर्भवेत् ॥ ६ ॥ इति षष्ठं विशेषापोहप्रकरणम् ॥ ६ ॥

बुद्ध्यारूढप्रकरणम् ॥ ७ ॥

बुद्ध्यारूढं सदा सर्व दृश्यते यत्र तत्र वा । मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः ॥ १ ॥ यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि । नैवापोढुं न वा दातुं शक्यस्तस्मात्परो ह्यहम् ॥ २ ॥ विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः । अशेषबुद्धिसाक्षित्वाद्बुद्धिवच्चाल्पवेदना ॥ ३ ॥ मणौ प्रकाश्यते यद्वद्रक्ताद्याकारतातपे । मयि संदृश्यते सर्वमातपेनेव तन्मया ॥४॥ बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यये । द्रष्टा यस्मात्सदा

द्रष्टा तस्माद्वैतं न विद्यते ॥ ५ ॥ अविवेकात्पराभावं यथा बुद्धिरवैत्तथा। विवेकात्तु परादन्यः स्वयं चापि न विद्यते ॥ ६ ॥ इति सप्तमं बुद्ध्यारूढप्रकरणम् ॥ ७ ॥

मतिविलापनप्रकरणम् ॥ ८ ॥

चितिस्वरूपे स्वत एव मे मते रसादियोगस्तव मोहकारितः। अतो न किंचित्तव चेष्टितेन मे फलं भवेत्सर्वविशेषहानतः॥१॥ विमुच्य मायामयकार्यतामिह प्रशान्तिमायाह्यसदीहितात्सदा। अहं परंब्रह्म सदा विमुक्तवत्तथाजमेकं द्वयवर्जितं यतः ॥ २ ॥ सदा च भूतेषु समोऽस्मि केवलो यथा च खं सर्वगमक्षरं शिवं। निरंतरं निष्कलमक्रियं परं ततो न मेऽस्तीह फलं तवेहितैः॥३॥ अहं ममैको न तदन्यदिष्यते तथा न कस्याप्यहमस्म्यसङ्गतः। असङ्गरूपोऽहमतो न मे त्वया कृतेन कार्यं तव चाद्वयत्वतः ॥ ४ ॥ फले च हेतौ च जनो विषक्तवानिति प्रचिन्त्याहमतो विमोक्षणे। जनस्य संवादमिमं प्रकृप्तवान्स्वरूपतत्त्वार्थविबोधकारणम् ॥ ५ ॥ संवादमेतं यदि चिन्तयन्नरो विमुच्यते ज्ञानमहाभयागमात्। विमुक्तकामश्च तथा जनः सदा चरत्यशोकः सम आत्मवित्सुखी ॥ ६ ॥ इति अष्टमं मतिविलापनप्रकरणम् ॥ ८ ॥

सूक्ष्मताव्यापिताप्रकरणम् ॥ ९ ॥

सूक्ष्मताव्यापिते ज्ञेये गन्धादेरुत्तरोत्तरम्। प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः ॥ १ ॥ शारीरा पृथिवी तावद्यावद्बाह्या प्रमाणतः। अम्ब्वादीनि च तत्त्वानि तावज्ज्ञेयानि कृत्स्नशः ॥ २ ॥ वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा। अहमेकः

सदा सर्वश्चिन्मात्रः सर्वगोऽद्वयः ॥ ३ ॥ ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृताः । कामक्रोधादयो दोषा जायेरन्मे कुतोऽन्यतः ॥ ४ ॥ भूतदोषैः सदाऽस्पृष्टं सर्वभूतस्थमीश्वरम् । नीलं व्योम यथा बालो दुष्टं मां वीक्षते जनः ॥ ५ ॥ मच्चैतन्यावभास्यत्वात्सर्वप्राणिधियां सदा । पूर्मम प्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः ॥ ६ ॥ जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते । नित्यं निर्विषयं ज्ञानं तस्माद्वैतं न विद्यते ॐ ॥७॥ ज्ञातुर्ज्ञातिर्हि नित्योक्ता सुषुप्ते त्वन्यशून्यतः ॥ जाग्रज्ज्ञातिस्त्वविद्यातस्तद्ग्राह्यं चासदिष्यताम् ॥ ८ ॥ रूपवत्त्वाद्यसत्वान्न दृष्ट्यादेः कर्मता यथा । एवं विज्ञानकर्मत्वं भूम्नो नास्तीति गम्यते ॥ ९ ॥ इति नवमं सूक्ष्मताव्यापिताप्रकरणम् ॥ ९ ॥

दृशिस्वरूपपरमार्थदर्शनप्रकरणम् ॥ १० ॥

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् । अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐ ॥१॥ दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः । पुरस्तिरश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनि स्थितः ॥२॥ अजोऽमरश्चैव तथाजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमद्वयम् । न कारणं कार्यमतीव निर्मलः सदैकतृप्तश्च ततो विमुक्त ॐ ॥३॥ सुषुप्तजाग्रत्स्वपतश्च दर्शनं न मेऽस्ति किंचित्स्वमिवेह मोहनम् । स्वतश्च तेषां परतोऽप्यसत्वतस्तुरीय एवास्मि सदादृगद्वयः ॥ ४ ॥ शरीरबुद्धीन्द्रियदुःखसंततेर्न मे न चाहं मम निर्विकारतः । असत्त्वहेतोश्च तथैव संततेरसत्त्वमस्याः स्वपतो हि दृश्यवत् ॥ ५ ॥ इदं तु सत्यं मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः । न पुण्यपापे न च मोक्षबन्धने न

चास्ति वर्णाश्रमताऽशरीरतः ॥ ६ ॥ अनादितो निर्गुणतो न कर्म मे फलं च तस्मात्परमोऽहमद्वयः । यथा नभः सर्वगतं न लिप्यते तथा ह्यहं देहगतोऽपि सूक्ष्मतः ॥ ७ ॥ सदा च भूतेषु समोऽहमीश्वरः क्षराक्षराभ्यां परमो ह्यथोत्तमः । परात्मतत्त्वश्च तथाद्वयोऽपि सन्विपर्ययेणाभिमतस्त्वविद्यया ॥ ८ ॥ अविद्यया भावनया च कर्मभिर्विविक्त आत्माऽव्यवधिः सुनिर्मलः । दृगादिशक्तिप्रचितोऽहमद्वयः स्थितः स्वरूपे गगनं यथा चलम् ॥ ९ ॥ अहं परं ब्रह्म विनिश्चयात्मदृङ् न जायते भूय इति श्रुतेर्वचः । न चैव बीजे त्वसति प्रजायते फलं न जन्मास्ति ततो ह्यमोहता ॥ १० ॥ ममेदमित्थं च तथेदमीदृशं तथाहमेवं न परो न वान्यथा । विमूढतैवं न जनस्य कल्पना सदा समे ब्रह्मणि चाद्वये शिवे ॥ ११ ॥ यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता । तयोरभावे न हि कर्म जन्म वा भवेदयं वेदविदां विनिश्चयः ॥ १२ ॥ सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वतः । तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः ॥ १३ ॥ इतीदमुक्तं परमार्थदर्शनं मया हि वेदान्तविनिश्चितं परम् । विमुच्यतेऽस्मिन्यदि निश्चितो भवेन्न लिप्यते व्योम इवेह कर्मभिः ॥ १४ ॥

इति दशमं दृशिस्वरूपपरमार्थदर्शनप्रकरणम् ॥ १० ॥

ईक्षितृत्वप्रकरणम् ॥ ११ ॥

ईक्षितृत्वं स्वतःसिद्धं जन्तूनां च ततोऽन्यता । अज्ञानादित्यतोऽन्यत्वं सदसीति निवर्त्यते ॥ १ ॥ एतावद्ध्यमृतत्वं न किंचिदन्यत्सहायकम् । ज्ञानस्येति ब्रुवच्छास्त्रं सलिङ्गं कर्म बाधते ॥ २ ॥ सर्वेषां मनसो वृत्तमविशेषेण पश्यतः । तस्य मे

निर्विकारस्य विशेषः स्यात्कथंचन ॥ ३ ॥ मनोवृत्तं मनश्चैव स्वप्नवज्जाग्रतीक्षितुः । संप्रसादे द्वयासत्वाच्चिन्मात्रः सर्वगोऽव्ययः ॥ ४ ॥ स्वप्नः सत्यो यथा बोधाद्देहात्मत्वं तथैव च । प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्यादात्मवेदनात् ॥ ५ ॥ व्योमवत्सर्वभूतस्थो भूतदोषैर्विवर्जितः । साक्षी चेताऽगुणः शुद्धो ब्रह्मैवास्मीति केवलः ॥ ६ ॥ नामरूपक्रियाभ्योऽन्यो नित्यमुक्तस्वरूपवान् । अहमात्मा परं ब्रह्म चिन्मात्रोऽहं सदाद्वयः ॥७॥ अहं ब्रह्मास्मि कर्ता च भोक्ता चास्मीति ये विदुः । ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥ ८ ॥ धर्माधर्मफलेयोग इष्टो दृष्टो यथात्मनः । शास्त्राद्ब्रह्मत्वमप्यस्य मोक्षो ज्ञानात्तथेष्यताम् ॥ ९ ॥ या महारजनाद्यास्ता वासनाः स्वप्नदर्शिभिः । अनुभूयन्त एवेह ततोऽन्यः केवलो दृशिः ॥ १० ॥ कोशादिव विनिष्कृष्टः कार्यकारणवर्जितः । यथासिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः ॥ ११ ॥ आपेषात्प्रतिबुद्धस्य ज्ञस्य स्वाभाविकं पदम् । उक्तं नेत्यादिवाक्येन कल्पितस्यापनेतृणा ॥१२॥ महाराजादयो लोका मयि यद्वत्प्रकल्पिताः । स्वप्ने तद्वद्द्वयं विद्याद्रूपं वासनया सह ॥ १३ ॥ देहलिङ्गात्मना कार्या वासनारूपिणा क्रियाः । नेतिनेत्यात्मरूपत्वान्न मे कार्या क्रिया क्वचित् ॥ १४ ॥ न ततोऽमृतताशास्ति कर्मणोऽज्ञानहेतुतः । मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते ॥ १५ ॥ अमृतं चाभयं नार्तं नेतीत्यात्मा प्रियो मम । विपरीतमतोऽन्यद्यस्त्यजेत्तत्सक्रियं ततः ॥ १६ ॥ इति एकादशमीक्षितृत्वप्रकरणम् ॥ ११ ॥

प्रकाशप्रकरणम् ॥ १२ ॥

प्रकाशस्थं यथा देहं सालोकमभिमन्यते । द्रष्टाभासं तथा

चित्तं द्रष्टाहमिति मन्यते ॥ १ ॥ यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः । प्रपद्यते ततो मूढस्तेनात्मानं न विन्दति ॥२॥ दशमस्य नवात्मत्वप्रतिपत्तिवदात्मनः । दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा ॥ ३ ॥ त्वं कुरु त्वं तदेवेति प्रत्ययावेककालिकौ । एकनीडौ कथं स्यातां विरुद्धौ न्यायतो वद ॥ ४ ॥ देहाभिमानिनो दुःखं नादेहस्य स्वभावतः । स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशेः ॥ ५ ॥ दृशेश्छाया यदारूढा मुखच्छायेव दर्शने । पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते ॥ ६ ॥ तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः । स एव योगिनां श्रेष्ठो नेतरः स्यान्न संशयः ॥ ७ ॥ विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः । स स्यादनुभवस्तस्य ततोऽन्योऽनुभवो मृषा ॥ ८ ॥ दृशिरूपे सदानित्ये दर्शनादर्शने मयि । कथं स्यातां ततो नान्य इष्यतेऽनुभवस्ततः ॥ ९ ॥ यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा । सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा ॥१०॥ प्रतिषिद्धे दृगंशोऽङ्गः खमिवैकरसोऽद्वयः । नित्यमुक्तः सदाशुद्धः सोऽहं ब्रह्मास्मि केवलः ॥ ११ ॥ विज्ञातुर्नैव विज्ञाता परोऽन्यः संभवत्यतः । विज्ञाताहं परो मुक्तः सर्वभूतेषु सर्वदा ॥१२॥ यो वेदालुप्तदृष्टित्वमात्मनोऽकर्तृतां तथा । ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥१३॥ ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि । विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान्यतः ॥१४॥ अलुप्ता त्वात्मनो दृष्टिर्नोत्पाद्या कारकैर्यतः । दृश्यया चान्यया दृष्ट्या जन्यतास्याः प्रकल्पिता ॥१५॥ देहात्मबुद्ध्यपेक्षत्वादात्मनः कर्तृता मृषा । नैव किंचित्करोमीति सत्या बुद्धिः प्रमाणजा ॥१६॥ कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः । कर्ता भोक्तेति विज्ञानं

मृपैवेति सुनिश्चितम् ॥ १७ ॥ एवं शास्त्रानुमानाभ्यां स्वरूपेऽवगते सति । नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत् ॥ १८ ॥ यथा सर्वान्तरं व्योम व्योम्नोऽप्यभ्यन्तरो ह्यहम् । निर्विकारोऽचलः शुद्धोऽजरो मुक्तः सदाद्वयः ॥ १९ ॥ इति द्वादशं प्रकाशप्रकरणम् ॥ १२ ॥

अचक्षुष्ट्वप्रकरणम् ॥ १३ ॥

अचक्षुष्ट्वान्न दृष्टिर्मे तथाऽश्रोत्रस्य का श्रुतिः । अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वान्मतिः कुतः ॥ १ ॥ अप्राणस्य न कर्मास्ति बुद्ध्यभावे न वेदिता । विद्याविद्ये ततो न स्तश्चिन्मात्रज्योतिषो मम ॥ २ ॥ नित्यमुक्तस्य शुद्धस्य कूटस्थस्याविचालिनः । अमृतस्याक्षरस्यैवमशरीरस्य सर्वदा ॥ ३ ॥ जिघत्सा वा पिपासा वा शोकमोहौ जरामृती । न विद्यन्तेऽशरीरत्वाद्व्योमवद्व्यापिनो मम ॥ ४ ॥ अस्पर्शत्वान्न मे स्पृष्टिर्नाजिह्वत्वाद्रसज्ञता । नित्यविज्ञानरूपस्य ज्ञानाज्ञाने न मे सदा ॥ ५ ॥ या तु स्यान्मानसी वृत्तिश्चाक्षुष्का रूपरञ्जना । नित्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा ॥ ६ ॥ तथान्येन्द्रिययुक्ता या वृत्तयो विषयाञ्जनाः । स्मृती रागादिरूपा च केवलान्तर्मनस्यपि ॥ ७ ॥ मानसस्तद्वदन्यस्य दृश्यन्ते स्वप्नवृत्तयः । द्रष्टुर्दृष्टिस्ततो नित्या शुद्धानन्ता च केवला ॥ ८ ॥ अनित्या साऽविशुद्धेति गृह्यतेऽत्राविवेकतः । सुखी दुःखी तथा चाहं दृश्योपाधिभूतया ॥ ९ ॥ मूढया मूढ इत्येवं शुद्धया शुद्ध इत्यपि । मन्यते सर्वलोकोयं येन संसारमृच्छति ॥ १० ॥ अचक्षुष्कादिशास्त्रोक्तं सबाह्याभ्यन्तरं त्वजम् । नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्सदा स्मरेत् ॥ ११ ॥ अचक्षुष्कादिशास्त्राच्च नेन्द्रियाणि

सदा मम । अप्राणो ह्यमनाः शुभ्र इति चाथर्वणेर्वचः ॥ १२ ॥
शब्दादीनामभावश्च श्रूयते मम काठके । अप्राणो ह्यमना यस्मा-
दविकारी सदा ह्यहम् ॥ १३ ॥ विक्षेपो नास्ति तस्मान्मे न
समाधिस्ततो मम । विक्षेपो वा समाधिर्वा मनसः स्याद्विका-
रिणः ॥ १४ ॥ अमनस्कस्य शुद्धस्य कथं तत्स्याद्द्वयं मम ।
अमनस्त्वाविकारित्वे विदेहव्यापिनो मम ॥ १५ ॥ इत्येतद्या-
वदज्ञानं तावत्कार्यं ममाभवत् । नित्यमुक्तस्य शुद्धस्य बुद्धस्य
च सदा मम ॥ १६ ॥ समाधिर्वाऽसमाधिर्वा कार्यं चान्यत्कुतो
भवेत् । मां हि ध्यात्वा च बुद्ध्वा च मन्यन्ते कृतकृत्यताम्
॥ १७ ॥ अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धोऽस्म्यतः सदा ।
अजः सर्वत एवाहमजरश्चाक्षयोऽमृतः ॥ १८ ॥ मदन्यः सर्व-
भूतेषु बोद्धा कश्चिन्न विद्यते । कर्माध्यक्षश्च साक्षी च चेता
नित्योऽगुणोऽद्वयः ॥ १९ ॥ न सच्चाहं न चासच्च नोभयं
केवलः शिवः । न मे संध्या न रात्रिर्वा नाहर्वा सर्वदा दृशेः
॥ २० ॥ सर्वमूर्तिवियुक्तं यद्यथा खं सूक्ष्ममद्वयम् । तेनाप्यस्मि
विनाभूतं ब्रह्मैवाहं तथाद्वयम् ॥ २१ ॥ ममात्मा स्वत आत्मेति
भेदो व्योम्नो यथा भवेत् । एकस्य सुषिभेदेन तथा मम विक-
ल्पितः ॥ २२ ॥ भेदोऽभेदस्तथा चैको नाना चेति विक-
ल्पितः । ज्ञेयं ज्ञाता गतिर्गन्ता मय्येकस्मिन्कुतो भवेत् ॥ २३ ॥
न मे हेयं न चादेयमविकारी यतो ह्यहम् । सदा मुक्तस्तथा
शुद्धः सदा बुद्धोऽगुणोऽद्वयः ॥ २४ ॥ इत्येवं सर्वदात्मानं
विद्यात्सर्वं समाहितः । विदित्वा मां स्वदेहस्थमृषिर्मुक्तो ध्रुवो
भवेत् ॥ २५ ॥ कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च ।
य एवं वेद तत्त्वार्थमन्यथा ह्यात्महा भवेत् ॥ २६ ॥ वेदार्थो

निश्चितो ह्येष समासेन मयोदितः । संन्यासिभ्यः प्रवक्तव्यः शान्तेभ्यः शिष्टबुद्धिना ॥ २७ ॥ इति त्रयोदशमचक्षुष्ट्वप्रकरणम् ॥ १३ ॥

स्वप्नस्मृतिप्रकरणम् ॥ १४ ॥

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते । पुरा नूनं तदाकारा धीर्दृष्टेत्यनुमीयते ॥ १ ॥ भिक्षामटन्यथा स्वप्ने दृष्टो देहो न स स्वयम् । जाग्रद्दृश्यात्तथा देहाद्द्रष्टृत्वादन्य एव सः ॥ २ ॥ मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा । रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥ ३ ॥ व्यञ्जको वा यथालोको व्यङ्ग्यस्याकारतामियात् । सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते ॥ ४ ॥ धीरेवार्थस्वरूपा हि पुंसा दृष्टा पुरापि च । न चेत्स्वप्ने कथं पश्येत्स्मरतो वा कृतिः कुतः ॥ ५ ॥ व्यञ्जकत्वं तदेवास्या रूपाद्याकारदृश्यता । द्रष्टृत्वं च दृशेस्तद्वद्व्याप्तिः स्यादिव उद्भवे ॥ ६ ॥ चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः । मया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो ह्यहम् ॥ ७ ॥ करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः । जाग्रत्येवं यतो दृष्टा द्रष्टा तस्मादतोऽन्यथा ॥८॥ बुद्ध्यादीनामनात्मत्वं हेयोपादेयरूपतः । हानोपादानकर्तात्मा न त्याज्यो न च गृह्यते ॥९॥ सबाह्याभ्यन्तरे शुद्धे प्रज्ञानैकरसे घने । बाह्यमाभ्यन्तरं चान्यत्कथं हेयं प्रकल्प्यते ॥ १० ॥ य आत्मा नेतिनेतीति परापोहेन शेषितः । स चेद्ब्रह्मविदात्मेष्टो यतेतातः परं कथम् ॥११॥ अशनायाद्यतिक्रान्तं ब्रह्मैवास्मि निरन्तरम् । कार्यवान्स्यां कथं चाहं विमृशेदेवमज्ञमा ॥ १२ ॥ पारगस्तु यथा नद्यास्तत्स्थः पारं यियासति । आत्मज्ञश्चेत्तथा कार्यं कर्तुमन्यदिहेच्छति

॥ १३ ॥ आत्मज्ञस्यापि यस्य स्याद्धानोपादानता यदि । न मोक्षार्हः स विज्ञेयो वान्तोऽसौ ब्रह्मणा ध्रुवम् ॥ १४ ॥ सादित्यं हि जगत्प्राणस्तस्मान्नाहर्निशैव वा । प्राणज्ञस्यापि न स्यातां कुतो ब्रह्मविदोऽद्वये ॥ १५ ॥ न स्मरत्यात्मनो ह्यात्मा विस्मरेद्वाप्यलुप्तचित् । मनोऽपि स्मरतीत्येतज्ज्ञानमज्ञानहेतुजम् ॥ १६ ॥ ज्ञातुर्ज्ञेयः परो ह्यात्मा सोऽविद्याकल्पितः स्मृतः । अपोढे विद्यया तस्मिन्रज्ज्वां सर्प इवाद्वयः ॥ १७ ॥ कर्तृकर्मफलाभावात्सबाह्याभ्यन्तरं ह्यजम् । ममाहं वेत्ति यो भावस्तस्मिन्कस्य कुतो भवेत् ॥ १८ ॥ आत्मा ह्यात्मीय इत्येष भावोऽविद्याप्रकल्पितः । आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलम् ॥ १९ ॥ द्रष्टृ श्रोतृ तथा मन्तृ विज्ञात्रेव तदक्षरम् । द्रष्ट्राद्यन्यन्न तद्यस्मात्तस्माद्द्रष्टाहमक्षरम् ॥ २० ॥ स्थावरं जंगमं चैव द्रष्टृत्वादिक्रियायुतम् । सर्वमक्षरमेवातः सर्वस्यात्माक्षरं ह्यहम् ॥ २१ ॥ अकार्यशेषमात्मानमक्रियात्म क्रियाफलम् । निर्ममं निरहंकारं यः पश्यति स पश्यति ॥ २२ ॥ ममाहंकारयत्नेच्छाः शून्या एव स्वभावतः । आत्मनीति यदि ज्ञातमाध्वं स्वस्थाः किमीहितैः ॥ २३ ॥ योऽहंकर्तारमात्मानं तथा वेत्तारमेव च । वेत्ति नात्मज्ञ एवासौ योऽन्यथाज्ञः स आत्मवित् ॥ २४ ॥ यथान्यत्वेऽपि तादात्म्यं देहादिष्वात्मनो मतम् । तथाकर्तुरविज्ञानात्फलकर्मात्मतात्मनः ॥ २५ ॥ दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा । तासामात्मस्वरूपत्वादतः प्रत्यक्षतात्मनः ॥ २६ ॥ परलोकभयं यस्य नास्ति मृत्युभयं तथा । तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः ॥ २७ ॥ ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः । तृष्णा

चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवाऽशुभा ॥ २८ ॥ अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि । अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा ॥ २९ ॥ बुद्ध्यादौ सत्युपाधौ च तथासत्यविशेषता । यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं भवेत् ॥३०॥ प्रसन्ने विमले व्योम्नि प्रज्ञानैकरसेऽद्वये । उत्पन्नात्मधियो ब्रूत किमन्यत्कार्यमिष्यते ॥ ३१ ॥ आत्मानं सर्वभूतस्थममित्रं चात्मनोऽपि यः । पश्यन्निच्छत्यसौ नूनं शीतीकर्तुं विभावसुम् ॥ ३२ ॥ प्रज्ञाप्राणानुकार्यात्मा छायेवाक्षादिगोचरः । ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स्वतो हि सः ॥ ३३ ॥ अप्राणस्यामनस्कस्य तथाऽसंसर्गिणो दृशेः । व्योमवद्व्यापिनो ह्यस्य कथं कार्यं भवेन्मम ॥ ३४ ॥ असमाधिं न पश्यामि निर्विकारस्य सर्वदा । ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्विपाप्मनः ॥ ३५ ॥ गन्तव्यं च तथा नैव सर्वगस्याचलस्य च । नोर्ध्वं नाधस्तिरो वापि निष्कलस्यागुणत्वतः ॥ ३६ ॥ चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते । कथं कार्यं ममैवाद्य नित्यमुक्तस्य शिष्यते ॥ ३७ ॥ अमनस्कस्य का चिन्ता क्रिया वानिन्द्रियस्य का । अप्राणो ह्यमनाः शुभ्र इति सत्यं श्रुतेर्वचः ॥ ३८ ॥ अकालत्वाददेशत्वाददिक्त्वादनिमित्ततः । आत्मनो नैव कालादेरपेक्षा ध्यायतः सदा ॥ ३९ ॥ यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम् । व्रजेत्तन्मानसं तीर्थं यस्मिन्स्नात्वाऽमृतो भवेत् ॥ ४० ॥ न चास्ति शब्दादिरनन्यवेदनः परस्परेणापि न चैव दृश्यते । परेण दृश्यास्तु यथा रसादयस्तथैव दृश्यत्वत एव दैहिकाः ॥ ४१ ॥ अहंममत्वेपणयत्नविक्रियासुखादयस्तद्वदिह प्रदृश्यतः । दृश्यत्वयोगाच्च परस्परेण ते न दृश्यता

यान्ति ततः परो भवान् ॥ ४२ ॥ अहंक्रियाद्या हि समस्तवि-
क्रिया सकर्तृका कर्मफलेन संहता । चितिस्वरूपेण समन्ततो-
ऽर्कवत्प्रकाश्यमानाऽसिततात्मनो ह्यतः ॥ ४३ ॥ दृशिस्वरूपेण
हि सर्वदेहिनां वियद्यथा व्याप्य मनांस्यवस्थितः । अतो न
तस्मादपरोऽस्ति वेदिता परोऽपि तस्मादत एक ईश्वरः ॥ ४४ ॥
शरीरबुद्ध्योर्यदि चान्यदृश्यता निरात्मवादाः सुनिराकृता मया ।
परश्च शुद्धो ह्यविशुद्धिकर्मतः सुनिर्मलः सर्वगतोऽसितोऽद्वयः
॥ ४५ ॥ घटादिरूपं यदि तेन गृह्यते मनः प्रवृत्तं बहुधा स्ववृ
त्तिभिः । अशुद्ध्यचिद्रूपविकारदोषता मतेर्यथा वारयितुं न-
पार्यते ॥ ४६ ॥ यथा विशुद्धं गगनं निरन्तरं न सज्जते नापि
च लिप्यते तथा । समस्तभूतेषु सदैव तेष्वयं समः सदात्मा
ह्यजरोऽमरोऽभयः ॥ ४७ ॥ अमूर्तमूर्तानि च कर्मवासना दृशि-
स्वरूपस्य बहिः प्रकल्पिताः । अविद्यया ह्यात्मनि मूढदृष्टिभिर-
पोह्य नेतीत्यवशेषितो दृशि ॥ ४८ ॥ प्रबोधरूपं मनसोऽर्थयो-
गजं स्मृतौ च सुप्तस्य च दृश्यतोऽर्थवत् । तथैव देहप्रतिमानतः
पृथग्दृशेः शरीरं च मनश्च दृश्यतः ॥ ४९ ॥ स्वभावशुद्धे
गगने घनादिके मलेऽपयाते सति चाविशेषता । यथाच तद्व-
च्छ्रुतिवारितद्वये सदाऽविशेषो गगनोपमे दृशौ ॥ ५० ॥ इति
चतुर्दशं स्वमस्मृतिप्रकरणम् ॥ १४ ॥

नान्यदन्यत्प्रकरणम् ॥ १५ ॥

नान्यदन्यद्भवेद्यस्मान्नान्यत्किंचिद्विचिन्तयेत् । अन्यस्यान्य-
स्वभावे हि नाशस्तस्य ध्रुवो भवेत् ॥ १ ॥ सरतो दृश्यते दृष्टं
पटे चित्रमिवार्पितम् । यत्र येन च तौ ज्ञेयौ सत्त्वक्षेत्रज्ञसंज्ञकौ
॥ २ ॥ फलान्तं चानुभूतं यद्युतं कर्त्रादिकारकैः । सर्यमाणं

हि कर्मस्थं पूर्वं कर्मैव तच्चितः ॥ ३ ॥ द्रष्टुश्चान्यद्भवेद्दृश्यं दृश्य-
त्वाद्घटवत्सदा । दृश्याद्द्रष्टा सजातीयो न धीवत्साक्षितान्यथा
॥ ४ ॥ स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः । जा-
त्यादिः शववत्तेन तद्धानानात्मतान्यथा ॥ ५ ॥ न प्रियाप्रिय
इत्युक्तेर्नादेहत्वं क्रियाफलम् । देहयोगः क्रियाहेतुस्तस्माद्विद्वा-
न्क्रियास्त्यजेत् ॥ ६ ॥ कर्मस्वात्मा स्वतन्त्रश्चेन्निवृत्तं च तथेष्य-
ताम् । अदेहत्वे फलेऽकार्ये ज्ञाते कुर्यात्कथं क्रियाः ॥ ७ ॥
जात्यादीन्संपरित्यज्य निमित्तं कर्मणां बुधः । कर्म हेतुविरुद्धं
यत्स्वरूपं शास्त्रतः स्मरेत् ॥ ८ ॥ आत्मैकः सर्वभूतेषु तानि
तस्मिंश्च खे यथा । पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते ॥९॥
व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत् । शुद्धापापतयालेपं
लिङ्गं चाकायमित्युत ॥ १० ॥ वासुदेवो यथाश्वत्थे स्वदेहे
चाब्रवीत्समम् । तद्वेत्ति य आत्मानं समं स ब्रह्मवित्तमः
॥ ११ ॥ यथा ह्यन्यशरीरेषु ममाहन्ता न चेष्यते । अस्मिंश्चापि
तथा देहे धीसाक्षित्वाविशेषतः ॥ १२ ॥ रूपसंस्कारतुल्याधी
रागद्वेषौ भयं च यत् । गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः
सदा ॥ १३ ॥ यन्मनास्तन्मयोऽन्यत्वे नात्मतातो क्रियात्मनि ।
आत्मत्वे चानपेक्षत्वात्सापेक्षं हि न तन्मयम् ॥ १४ ॥ स्वमि-
वेकत्वा ज्ञप्तिरविभक्ताजगत्स्मृता । चक्षुराद्युपधानात्सा विप-
रीता विभाव्यते ॥ १५ ॥ दृश्यत्वादहमित्येषो नात्मधर्मो घटा-
दिवत् । तथान्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो मतः ॥१६॥
सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः । विक्रियेत यदि द्रष्टा
बुद्ध्यादिवाल्पविद्भवेत् ॥ १७ ॥ न दृष्टिर्लुप्यते द्रष्टुश्चक्षुरादेर्य-
थैव तत् । नहि द्रष्टुरिति ह्युक्तं तस्माद्द्रष्टा सदैकदृक् ॥ १८ ॥

संघातो वासि भूतानां करणानां तथैव च । व्यस्तं वान्यतमो वासि को वासीति विचारयेत् ॥ १९ ॥ व्यस्तं नाहं समस्तं वा भूतमिन्द्रियमेव वा । ज्ञेयत्वात्करणत्वाच्च ज्ञातान्योऽस्माद्घटादिवत् ॥ २० ॥ आत्माग्नेरिन्धना बुद्धिरविद्याकामकर्मभिः । दीपिता प्रज्वलत्येषा द्वारैः श्रोत्रादिभिः सदा ॥ २१ ॥ दक्षिणाक्षिप्रधानेषु यदा बुद्धिर्विचेष्टते । विषयैर्हविषा दीप्ता ह्यात्माग्निः स्थूलभुक्तदा ॥ २२ ॥ हूयन्ते तु हवींषीति रूपादिग्रहणे स्मरन् । अरागद्वेष आत्माग्नौ जाग्रद्दोषैर्न लिप्यते ॥ २३ ॥ मानसे तु गृहे व्यक्तः सोऽविद्याकर्मवासनाम् । पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिः प्रकाशिता ॥ २४ ॥ विषया वासना वापि चोद्यन्ते नैव कर्मभिः । यदा बुद्धौ तदा ज्ञेयः प्राज्ञ आत्मा ह्यनन्यदृक् ॥ २५ ॥ मनोबुद्धीन्द्रियाणां या अवस्थाः कर्मचोदिताः । चैतन्येनैव भास्यन्ते रविणेव घटादयः ॥ २६ ॥ तत्रैवंसति बुद्धीज्ञ आत्मभासावभासयन् । कर्ता तासां यदर्थास्ता मूढैरेवाभिधीयते ॥ २७ ॥ सर्वज्ञोऽप्यतएव स्यात्स्वेन भासावभासयन् । सर्वं सर्वक्रियाहेतोः सर्वकृत्त्वं तथात्मनः ॥ २८ ॥ सोपाधिश्चैवमात्मोक्तो निरुपाख्योऽनुपाधिकः । निष्कलो निर्गुणः शुद्धस्तं मनो वाङ्न नाप्नुतः ॥ २९ ॥ चेतनोऽचेतनो वापि कर्ताकर्ता गतोऽगतः । बद्धो मुक्तस्तथा चैकोऽनेकः शुद्धोऽन्यथेति वा ॥ ३० ॥ अप्राप्यैव निवर्तन्ते वचोधीभिः सहैव तु । निर्गुणत्वात्क्रियाभावाद्विशेषाणामभावतः ॥ ३१ ॥ व्यापकं सर्वतो व्योम मूर्तैः सर्वैर्वियोजितम् । यथा तद्वदिहात्मानं विन्द्याच्छुद्धं परं पदम् ॥ ३२ ॥ दृष्टं हित्वा स्मृतिं तस्मिन्सर्वग्रन्थं तमस्त्यजेत् । सर्वदृग्ज्योतिषा युक्तो

दिनकृच्छावरं यथा ॥ ३३ ॥ रूपस्मृत्यन्धकारार्थाः प्रत्यया यस्य गोचराः । स एवात्मा ममो द्रष्टा सर्वभूतेषु सर्वगः॥ ३४॥ आत्मबुद्धिमनश्चक्षुर्विषयालोकसंगमात् । विचित्रो जायते बुद्धेः प्रत्ययोऽज्ञानलक्षणः ॥ ३५॥ विविच्यास्मात्स्वमात्मानं विन्द्याच्छुद्धं परं पदम् । द्रष्टारं सर्वभूतस्थं समं सर्वभयातिगम् ॥३६॥ समस्तं सर्वगं शान्तं विमलं व्योमवत्स्थितम् । निष्कलं निष्क्रियं सर्वं नित्यं द्वन्द्वैर्विवर्जितम् ॥ ३७ ॥ सर्वप्रत्ययसाक्षी ज्ञः कथं ज्ञेयो मयेत्युत । विमृश्यैवं विजानीयाज्ज्ञानकर्म न वेत्ति वा ॥ ३८ ॥ अदृष्टं द्रष्टृविज्ञातं दृष्टमित्यादि शासनात् । नैव ज्ञेयं मयान्यैर्वा परं ब्रह्म कथंचन ॥ ३९ ॥ स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः । अन्यज्ञानानपेक्षत्वाज्ज्ञातं चैव सदा मया ॥ ४० ॥ नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने । स्वबोधान्नान्यबोधेच्छा बोधस्यात्मप्रकाशने ॥ ४१ ॥ न तस्यैवान्यतोपेक्षा स्वरूपं यस्य यद्भवेत् । प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन ॥ ४२ ॥ व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात् । प्रकाशस्तर्ककार्यः स्यादिति मिथ्या वचो ह्यतः ॥ ४३ ॥ यतोऽभूत्वा भवेद्यच्च तस्य तत्कार्यमिष्यते । स्वरूपत्वादभूत्वा न प्रकाशो जायते रवेः ॥ ४४ ॥ सत्तामात्रे प्रकाशस्य कर्तादित्यादिरिष्यते । घटादिव्यक्तितो यद्वत्तद्वद्बोधात्मनीष्यताम् ॥ ४५ ॥ बिलात्सर्पस्य निर्याणे सूर्यो यद्वत्प्रकाशकः । प्रयत्नेन विना तद्वज्ज्ञातात्मा बोधरूपतः ॥ ४६ ॥ दग्धैवमुष्णः सत्तायां तद्वद्बोद्धात्मनीष्यताम् । सत्येव यदुपाधौ तु ज्ञाते सर्प इवोत्थिते ॥ ४७ ॥ ज्ञाताप्यत्नोपि तद्वज्ज्ञः कर्ता भ्रामकवद्भवेत् । स्वरूपेण स्वयं नात्मा ज्ञेयोऽज्ञेयोऽथवा ततः

॥ ४८ ॥ विदिताविदिताभ्यां तदन्यदेवेति शासनात् । बन्धमोक्षादयो भावास्तद्वदात्मनि कल्पिताः ॥ ४९ ॥ नाहोरात्रे यथा सूर्ये प्रभारूपाविशेषतः । बोधरूपाविशेषान्न बोधाबोधौ तथात्मनि ॥ ५० ॥ यथोक्तं ब्रह्म यो वेद हानोपादानवर्जितम् । यथोक्तेन विधानेन स सत्यं नैव जायते ॥५१॥ जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात् । इत उद्धर्तुमात्मानं ज्ञानादन्येन केनचित् ॥ ५२ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्ट इति श्रुतेः॥५३॥ ममाहमित्येतदपोह्य सर्वतो विमुक्तदेहं पदमम्बरोपमम् । सुदृष्टशास्त्रानुमितिभ्य ईरितं विमुच्यतेऽस्मिन्यदि निश्चितो नरः ॥ ५४ ॥ इति पञ्चदशं नान्यदन्यत्प्रकरणम् ॥ १५ ॥

पार्थिवप्रकरणम् ॥ १६ ॥

पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतोऽम्मयः । पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वम्बरोद्भवाः ॥ १ ॥ घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात् । रूपालोकवदिष्टं हि सजातीयार्थमिन्द्रियम् ॥ २ ॥ बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे । तद्विकल्पार्थमन्तस्थं मन एकादशं भवेत् ॥ ३ ॥ निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीम् । ज्ञातात्मोक्तः स्वरूपेण ज्योतिषा व्यञ्जयन्सदा ॥ ४ ॥ व्यञ्जकस्तु यथालोको व्यङ्ग्यस्याकारतां गतः । व्यतिकीर्णोऽप्यसंकीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा ॥ ५ ॥ स्थितो दीपो यथायत्नः प्राप्तं सर्वं प्रकाशयेत् । शब्दाद्याकारबुद्धीद्धिः प्राप्तास्तद्वत्प्रपश्यति ॥ ६ ॥ शरीरेन्द्रियसंघात आत्मत्वेन गतां धियम् । नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः ॥ ७ ॥ शिरोदुःखादिनात्मानं दुःख्य-

सीति हि पश्यति । द्रष्टान्यो दुःखिनो दृश्याद्द्रष्टृत्वाच्च न दुःख्यसौ ॥ ८ ॥ दुःखी स्याद्दुःख्यहंमानाद्दुःखिनो दर्शनान्न वा । संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ॥ ९ ॥ चक्षुर्वत्कर्मकर्तृत्वं स्याच्चेन्नानेकमेव तत् । संहतं च ततो नात्मा द्रष्टृत्वात्कर्मतां व्रजेत् ॥ १० ॥ ज्ञानयत्नाद्यनेकत्वमात्मनोऽपि मतं यदि । नैकज्ञानगुणत्वात्तु ज्योतिर्वत्तस्य कर्मता ॥ ११ ॥ ज्योतिषो द्योतकत्वेऽपि यद्वन्नात्मप्रकाशनम् । भेदेऽप्येवं समत्वाज्ज्ञ आत्मानं नैव पश्यति ॥ १२ ॥ यद्धर्मा यः पदार्थो न तस्यैवेयात्स कर्मताम् । न ह्यात्मानं दहत्यग्निस्तथा नैव प्रकाशयेत् ॥ १३ ॥ एतेनैवात्मनात्मानो ग्रहो बुद्धेर्निराकृतः । अंशोऽप्येवं समत्वाद्धि निर्भेदत्वान्न युज्यते ॥ १४ ॥ शून्यतापि न युक्तं वै बुद्धेरन्येन दृश्यता । युक्तातो घटवत्तस्याः प्राक्सिद्धेश्च विकल्पतः ॥ १५ ॥ अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः । विकल्पोत्पत्तिहेतुत्वाद्यद्यस्यैव तु कारणम् ॥ १६ ॥ अज्ञानं कल्पनामूलं संसारस्य नियामकम् । हित्वात्मानं परं ब्रह्म विन्द्यान्मुक्तं सदाभयम् ॥ १७ ॥ जाग्रत्स्वप्नं तयोर्बीजं सुषुप्ताख्यं तमोमयम् । अन्योन्यस्मिन्नसत्त्वाच्च नास्तीत्येतत्त्रयं त्यजेत् ॥ १८ ॥ आत्मबुद्धिमनश्चक्षुरालोकार्थादिसंकरात् । भ्रान्तिः स्यादात्मकर्मेति क्रियाणां संनिपाततः ॥ १९ ॥ निमीलोन्मीलने स्थाने वायव्ये तेन चक्षुषः । प्रकाशत्वान्मनस्येवं बुद्धौ न स्तः प्रकाशतः ॥ २० ॥ संकल्पाध्यवसायौ तु मनोबुद्ध्योर्यथा क्रमात् । नेतरेतरधर्मत्वं सर्वं चात्मनि कल्पितम् ॥ २१ ॥ स्थानावच्छेददृष्टिः स्यादिन्द्रियाणां तदात्मताम् । गता धीस्तां हि पश्यन्त्यो देहमात्र इवेक्ष्यते ॥ २२ ॥ क्षणिकं हि तदत्यर्थं

धर्ममात्रं निरन्तरम् । सादृश्यादीपवत्तद्धीस्तच्छान्तिः पुरुषार्थता ॥ २३ ॥ स्वाकारान्यावभासं च येषां रूपादि विद्यते । येषां नास्ति ततश्चान्यत्पूर्वासंगतिरुच्यते ॥ २४ ॥ बाह्याकारस्ततो ज्ञप्तेः स्मृत्यभावः सदा क्षणात् । क्षणिकत्वाच्च संस्कारं नैवाधत्ते कचित्तु धीः ॥ २५ ॥ आधारस्याप्यसत्त्वाच्च तुल्यता निर्निमित्ततः । स्थाने वा क्षणिकत्वस्य हानं स्यान्न तदिष्यते ॥ २६ ॥ शान्तेश्चायत्नसिद्धत्वात्साधनोक्तिरनर्थिका । एकैकस्मिन्समाप्तत्वाच्छान्तेरन्यानपेक्षता ॥ २७ ॥ अपेक्षा यदि भिन्नेऽपि परसंतान इष्यताम् । सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता ॥ २८ ॥ तुल्यकालसमुद्भूतावितरेतरयोगिनौ । योगाच्च संस्कृतो यस्तु सोऽन्यं हीक्षितुमर्हति ॥ २९ ॥ मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र नो मतः । सर्वनाशो भवेद्यस्य मोक्षः कस्य फलं वद ॥ ३० ॥ अस्ति तावत्स्वयं नाम ज्ञानं वात्मान्यदेव वा । भावाभावज्ञतस्तस्य नाभावस्त्वधिगम्यते ॥ ३१ ॥ येनाधिगम्यतेऽभावस्तत्सत्स्यात्तन्न चेद्भवेत् । भावाभावानभिज्ञत्वं लोकस्य स्यान्न चेष्यते ॥ ३२ ॥ सदसत्सदसच्चेति विकल्पात्प्राग्यदिष्यते । तदद्वैतं समत्वात्तु नित्यं चान्यद्विकल्पितात् ॥ ३३ ॥ विकल्पोद्भवताऽसत्त्वं स्वप्नदृश्यवदिष्यताम् । द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात् ॥ ३४ ॥ वाचारम्भणशास्त्राच्च विकाराणां ह्यभावता । मृत्योः स मृत्युमित्यादेर्मम मायेति च स्मृतेः ॥ ३५ ॥ विशुद्धिश्चात एवास्य विकल्पाच्च विलक्षणः । उपादेयो न हेयोऽत आत्मा नान्यैर्कल्पितः ॥ ३६ ॥ अप्रकाशो यथादित्ये नास्ति ज्योतिःस्वभावतः । नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि ॥ ३७॥ तथा-

विक्रियरूपत्वान्नावस्थान्तरमात्मनः । अवस्थान्तरवत्त्वे हि नाशोऽस्य स्यान्न संशयः ॥ ३८ ॥ मोक्षोऽवस्थान्तरं यस्य कृतकः स चलो ह्यतः । न संयोगो वियोगो वा मोक्षो युक्तः कथंचन ॥ ३९ ॥ संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च । गमनागमने चैव स्वरूपं तु न हीयते ॥ ४० ॥ स्वरूपस्यानिमित्तत्वात्सनिमित्ता हि चापरे । अनुपात्तं स्वरूपं हि स्वेनात्यक्तं तथैव च ॥ ४१ ॥ स्वरूपत्वान्न सर्वस्य त्यक्तुं शक्यो ह्यनन्यतः । गृहीतुं वा ततो नित्योऽविषयत्वात्पृथक्त्वतः ॥४२॥ आत्मार्थत्वाच्च सर्वस्य नित्य आत्मैव केवलः । त्यजेत्तस्मात्क्रियाः सर्वाः साधनैः सह मोक्षवित् ॥ ४३ ॥ आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः । अलाभोऽन्यात्मलाभस्तु त्यजेत्तस्मादनात्मताम् ॥ ४४ ॥ गुणानां समभावस्य भ्रंशो न ह्युपपद्यते । अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरुच्यते ॥ ४५ ॥ इतरेतरहेतुत्वे प्रवृत्तिः स्यात्सदा न वा । नियमो न प्रवृत्तीनां गुणेष्वात्मनि वा भवेत् ॥ ४६ ॥ विशेषो मुक्तबद्धानां तादर्थ्येन च युज्यते । अर्थार्थिनोस्त्वसंबन्धो नार्थी ज्ञो नेतरोऽपि वा ॥ ४७ ॥ प्रधानस्य च पारार्थ्ये पुरुषस्याविकारतः । न युक्तं सांख्यशास्त्रेऽपि विकारेऽपि न युज्यते ॥ ४८ ॥ संबन्धानुपपत्तेश्च प्रकृतेः पुरुषस्य च । मिथो युक्तं तदर्थत्वं प्रधानस्याचितित्वतः ॥ ४९ ॥ क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत् । निर्निमित्ते त्वनिर्मोक्षः प्रधानस्य प्रसज्यते ॥ ५० ॥ न प्रकाश्यं यथौष्ण्यत्वं ज्ञानेनैवं सुखादयः । एकनीडत्वतोऽग्राह्याः स्युः कणादादिवर्त्मनाम् ॥ ५१ ॥ युगपत्समवेतत्वं सुखविज्ञानयोरपि । मनोयोगैकहेतुत्वादग्राह्यत्वं सुखस्य च

॥ ५२ ॥ तथान्येषां च भिन्नत्वाद्युगपज्जन्म नेष्यते । गुणानां समवेतत्वं ज्ञानं चेन्न विशेषणात् ॥ ५३ ॥ ज्ञानेनैव विशेषत्वाज्ज्ञानाप्यत्वं स्मृतेस्तथा । सुखं ज्ञातं मयेत्येवं तवाज्ञानात्मकत्वतः ॥ ५४ ॥ सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः । भेदादन्यस्य कस्मान्न मनसो वा विशेषतः ॥ ५५ ॥ स्यान्मालाऽपरिहार्या तु ज्ञानं चेज्ज्ञेयता व्रजेत् । युगपद्वापि चोत्पत्तिरभ्युपेतात इष्यते ॥ ५६ ॥ अनवस्थान्तरत्वाच्च बन्धो नात्मनि विद्यते । नाशुद्धिश्चाप्यसङ्गत्वादसङ्गो हीति च श्रुतेः ॥ ५७ ॥ सूक्ष्मैकागोचरेभ्यश्च न लिप्यत इति श्रुतेः ॥ ५८ ॥ एवं तर्हि न मोक्षोऽस्ति बन्धाभावात्कथंचन । शास्त्रानर्थक्यमेव स्यान्न बुद्धेर्भ्रान्तिरिष्यते । *बन्धो मोक्षश्च तन्नाशः स यथोक्तो न* चान्यथा ॥ ५९ ॥ बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते । बुद्धिर्नान्योऽस्ति बोद्धेति सेयं भ्रान्तिर्हि धीगता॥६०॥ बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते । अविवेकोऽप्यनाद्योऽयं संसारो नान्य इष्यते ॥६१॥ मोक्षस्तन्नाश एव स्यान्नान्यथानुपपत्तितः । येषां वस्त्वन्तरापत्तिर्मोक्षो नाशस्तु तैर्मतः ॥६२॥ अवस्थान्तरमप्येवमविकारान्न युज्यते। विकारोऽवयवित्वं स्यात्ततो नाशो घटादिवत् ॥६३॥ तस्माद्भ्रान्तिरतोऽन्या हि बन्धमोक्षादिकल्पनाः। सांख्यकाणादबौद्धानां मीमांसाहतकल्पनाः॥६४॥ शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन । शक्यन्ते शतशो वक्तुंदोषास्तासां सहस्रशः ॥६५॥ अपि निन्दोपपत्तेश्च यान्यतोऽन्यानि चेत्यतः । त्यक्त्वातो ह्यन्यशास्त्रोक्तीर्मतिं कुर्याद्दृढां बुधः ॥ ६६ ॥ श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवम् । वेदान्तस्यैव तत्त्वार्थे व्यासस्याभिमतौ तथा ॥ ६७॥ इति

प्रणुन्ना द्वयवादकल्पना निगमन्यवादाश्च तथाहि युक्तितः। व्यपेतशङ्काः परवादतः स्थिरा मुमुक्षवो ज्ञानपथे स्युरित्युत ॥ ६८ ॥ समाक्षिकं ज्ञानमतीव निर्मलं विकल्पनाभ्यो विपरीतमद्वयम्। अवाप्य सम्यग्यदि निश्चितो भवेन्निरन्वयो निर्वृतिमेति शाश्वतीम् ॥६९॥ इदं रहस्यं परमं परायणं व्यपेतदोषैरभिमानवर्जितैः। समीक्ष्य कार्या मतिरार्जवे सदा न तत्त्वदृश्यान्यमतिर्हि कश्चन ॥ ७० ॥ अनेकजन्मान्तरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकैः। इदं विदित्वा परमं हि पावनं न लिप्यते व्योम इवेह कर्मभिः॥७१॥ प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे। गुणान्विताय्यानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे ॥ ७२ ॥ परस्य देहे न यथाभिमानिता परस्य तद्वत्परमार्थमीक्ष्य च। इदं हि विज्ञानमतीव निर्मलं संप्राप्य मुक्तोऽथ भवेच्च सर्वतः ॥७३॥ नहीह लाभोऽभ्यधिकोऽस्ति कश्चन स्वरूपलाभात्स इतो हि नान्यतः। न देयमैन्द्रादपि राज्यतोऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः ॥ ७४ ॥ इति षोडशं पार्थिवप्रकरणम् ॥ १६ ॥

सम्यङ्मतिप्रकरणम् ॥ १७ ॥

आत्मा ज्ञेयः परो ह्यात्मा यस्मादन्यन्न विद्यते। सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेयात्मने नमः ॥ १ ॥ पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितम्। ब्रह्म वेदरहस्यं यैस्तान्नित्यं प्रणतोऽस्म्यहम् ॥ २ ॥ यद्वाक्सूर्यांशुसंपातप्रनष्टध्वान्तकल्मषः। प्रणम्य तान्गुरून्वक्ष्ये ब्रह्मविद्याविनिश्चयम् ॥ ३ ॥ आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते। यदर्था वेदवादाश्च स्मार्ताश्चापि तु याः क्रियाः ॥ ४ ॥ आत्मार्थोऽपि हि यो लाभः सुखा-

येष्टो विपर्ययः । आत्मलाभः परः प्रोक्तो नित्यत्वाद्ब्रह्मवेदिभिः ॥ ५ ॥ स्वयं लब्धस्वभावत्वाल्लाभस्तस्य नचान्यतः । अन्यापेक्षस्तु यो लाभः सोऽन्यदृष्टिसमुद्भवः ॥ ६ ॥ अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते । ज्ञानेनैव तु सोऽपि स्याद्विरोधित्वान्न कर्मणा ॥ ७ ॥ कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः । प्रमाणं वेद एवात्र ज्ञानस्याधिगमे स्मृतः ॥ ८ ॥ ज्ञानैकार्थपरत्वात्तं वाक्यमेकं ततो विदुः । एकत्वं ह्यात्मनो ज्ञेयं वाक्यार्थप्रतिपत्तितः ॥ ९ ॥ वाच्यभेदात्तु तद्भेदः कल्प्यो वाच्यो हि तच्छ्रुतेः । त्रयं त्वेतत्ततः प्रोक्तं रूपं नाम च कर्म च ॥ १० ॥ असदेतत्त्रयं तस्मादन्योन्येन हि कल्पितम् । कृतो वर्णो यथाशब्दाच्छ्रुतोऽन्यत्र धिया बहिः ॥ ११ ॥ दृष्टं चापि यथारूपं बुद्धेः शब्दाय कल्पते । एवमेतज्जगत्सर्वं भ्रान्तिबुद्धिविकल्पितम् ॥ १२ ॥ असदेतत्ततो युक्तं सच्चिन्मात्रं न कल्पितम् । वेदश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितम् ॥ १३ ॥ येन वेत्ति स वेदः स्यात्स्वमे सर्वं तु मायया । येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥ १४ ॥ येन स्वप्नगतो वक्ति सा वाग्घ्राणं तथैव च । रसनस्पर्शने चैव मनश्चान्यत्तथेन्द्रियम् ॥ १५ ॥ कल्प्योपाधिभिरेवैतद्भिन्नं ज्ञानमनेकधा । आधिभेदाद्यथा भेदो मणेरेकस्य जायते ॥ १६ ॥ जाग्रतश्च यथा भेदो ज्ञानस्यास्य विकल्पितः । बुद्धिस्थं व्याकरोत्यर्थं भ्रान्त्या तृष्णोद्भवक्रियः ॥ १७ ॥ स्वमे तद्वत्प्रबोधे यो बहिश्चान्तस्तथैव च । आलेख्याध्ययने यद्वत्तदन्योन्यधियोद्भवम् ॥ १८ ॥ यदायं कल्पयेद्भेदं तत्कामः सन्यथाक्रतुः । यत्कामस्तत्क्रतुर्भूत्वा कृतं यत्तत्प्रपद्यते ॥ १९ ॥ अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत् ।

तद्वता दृश्यते यस्मात्सुषुप्ते न च गृह्यते ॥ २० ॥ विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि नः । तस्मात्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते ॥ २१ ॥ चित्ते ह्यादर्शवद्यस्माच्छुद्धे विद्या प्रकाशते । यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनम् ॥ २२ ॥ शारीरादितपः कुर्यात्तद्विशुद्ध्यर्थमुत्तमम् । मनआदिसमाधानं तत्तद्देहविशोषणम् ॥ २३ ॥ मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥२४॥ दृष्टं जागरितं विद्यात्स्मृतं स्वप्नं तदेव तु । सुषुप्तं तदभावं च स्वमात्मानं परं पदम् ॥ २५ ॥ सुषुप्त्याख्यं तमोज्ञानं बीजं स्वप्नप्रबोधयोः । स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाभवम् ॥ २६ ॥ तदेवैकं त्रिधा ज्ञेयं मायाबीजं पुनः क्रमात् । मायाव्यात्माविकारोऽपि बहुधैको जलार्कवत् ॥ २७ ॥ बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा । स्वप्नजाग्रच्छरीरेषु तद्वच्चात्मा जलेन्दुवत् ॥ २८ ॥ मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत् । आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगोचरः ॥ २९ ॥ न हस्ती न तदारूढो मायाव्यन्यो यथास्थितः । न प्राणादि न तद्द्रष्टा तथा ज्ञोऽन्यः सदादृशिः ॥ ३० ॥ अबद्धचक्षुषो नास्ति माया मायाविनोऽपि वा । बद्धाक्षस्यैव सा माया मायाव्येव ततो भवेत् ॥ ३१ ॥ साक्षाद्देवः स विज्ञेयः साक्षादात्मेति च श्रुतेः । भिद्यते हृदयग्रन्थिर्न चेदित्यादितः श्रुतेः ॥ ३२ ॥ अशब्दादिस्ततो नास्य ग्रहणं चेन्द्रियैर्भवेत् । सुखादिभ्यस्तथान्यत्वाद्बुद्ध्या वापि कथं भवेत् ॥ ३३ ॥ अदृश्योऽपि यथा राहुश्चन्द्रे बिम्बं यथाम्भसि । सर्वगोऽपि तथैवात्मा बुद्धावेव स गृह्यते ॥ ३४ ॥ भानोर्बिम्बं यथा चौष्ण्यं जले दृष्टं न

चाम्भसः । बुद्धौ बोधो न तद्धर्मस्तथैव स्याद्विधर्मतः ॥ ३५ ॥
चक्षुर्युक्ता धिया वृत्तिर्या तां पश्यन्नलुप्तदृक् । दृष्टेर्द्रष्टा भवेदात्मा श्रुतेः श्रोता तथा भवेत् ॥ ३६ ॥ केवलां मनसो वृत्तिं पश्यन्मन्ता मतेरजः । विज्ञाताऽलुप्तशक्तित्वात्तथा शास्त्रं नहीत्यतः ॥ ३७ ॥ ध्यायतीत्यविकारित्वं तथा लेलायतीत्यपि । अत्र स्तेनेति शुद्धत्वं तथानन्वागतं श्रुतेः ॥ ३८ ॥ शक्त्यलोपात्सुषुप्ते ज्ञस्तथा बोधेऽविकारतः । ज्ञेयस्यैव विशेषस्तु यत्र वेत्ति श्रुतेर्वचः ॥ ३९ ॥ व्यवधानाद्धि पारोक्ष्यं लोकदृष्टेरनात्मनः । दृष्टेरात्मस्वरूपत्वात्प्रत्यक्षं ब्रह्म तत्स्मृतम् ॥ ४० ॥ नहि दीपान्तरापेक्षा यद्वद्दीपप्रकाशने । बोधस्यात्मस्वरूपत्वान्न बोधोऽन्यस्तथेष्यते ॥ ४१ ॥ विषयत्वं विकारित्वं नानात्वं वा नहीष्यते । न हेयो नाप्युपादेय आत्मा नान्येन वा ततः ॥ ४२ ॥ सबाह्याभ्यन्तरो जीर्णो जन्ममृत्युजरातिगः । अहमात्मेति यो वेत्ति कुतोऽन्वेव बिभेति सः ॥ ४३ ॥ प्रागेवैतद्विधेः कर्म वर्णित्वादेरपोहनात् । तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात्॥४४॥ पूर्वदेहपरित्यागे जात्यादीनां प्रहाणतः । देहस्यैव तु जात्यादिस्तस्याप्येवं ह्यनात्मता ॥ ४५ ॥ ममाहं चेत्यतोऽविद्या शरीरादिष्वनात्मसु । आत्मज्ञानेन हेया स्यादसुराणामिति श्रुतेः ॥ ४६ ॥ दशाहाशौचकार्याणां पारिव्राज्ये निवर्तनम् । यथा ज्ञानस्य संप्राप्तौ तद्वज्जात्यादिकर्मणाम् ॥ ४७ ॥ यत्कामस्तत्क्रतुर्भूत्वा कृतं तज्ज्ञः प्रपद्यते । यदा स्वात्मदृशः कामाः प्रमुच्यन्तेऽमृतस्तदा ॥ ४८ ॥ आत्मरूपविधेः कार्यं क्रियादिभ्यो निवर्तनम् । न साध्यं साधनं वात्मा नित्यतृप्तः स्मृतेर्मतः ॥ ४९ ॥ उत्पाद्याप्यविकार्याणि संस्कार्यं च क्रियाफलम् ।

नातोऽन्यत्कर्मणा कार्यं त्यजेत्तस्मात्ससाधनम् ॥ ५० ॥ तापान्तत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः । संहृत्यात्मनि तां प्रीतिं सत्यार्थी गुरुमाश्रयेत् ॥ ५१ ॥ शान्तं प्राज्ञं तथा मुक्तं निष्क्रियं ब्रह्मणि स्थितम् । श्रुतेराचार्यवान्वेद तद्विद्धीति स्मृतेस्तथा ॥५२॥ स गुरुस्तारयेद्युक्तं शिष्यं शिष्यगुणान्वितम् । ब्रह्मविद्याप्लवेनाशु स्वान्तध्वान्तमहोदधिम् ॥ ५३ ॥ दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेव च । शक्तयोऽन्याश्च भिद्यन्ते चिद्रूपत्वेऽप्युपाधिभिः ॥ ५४ ॥ अपायोद्भूतिहीनाभिर्नित्यं दीप्यन्रविर्यथा । सर्वज्ञः सर्वदृक् शुद्धः सर्वं जानाति सर्वदा ॥ ५५ ॥ अन्यदृष्टिः शरीरस्थस्तावन्मात्रो ह्यविषया । जलेन्द्वाद्युपमाभिस्तु तद्धर्मा च विभाव्यते ॥ ५६ ॥ दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत्प्रविहाय च । अथोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनन्यगः ॥ ५७ ॥ प्राणाद्येवं त्रिकं हित्वा तीर्णोऽज्ञानमहोदधिम् स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः ॥ ५८ ॥ अजोऽहं चामरोऽमृत्युरजरोऽभय एव च । सर्वज्ञः सर्वदृक् शुद्ध इति बुद्धो न जायते ॥ ५९ ॥ पूर्वोक्तं यत्तमोबीजं तन्नास्तीति विनिश्चयः । तदभावे कुतो जन्म ब्रह्मैकत्वं विजानतः ॥ ६० ॥ क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तं तस्मिन्नपूर्ववत् । बुद्ध्यादेर्ज्ञस्तथाऽसत्यान्न देही पूर्ववद्भवेत् ॥ ६१ ॥ सत्यं ज्ञानमनन्तं च रसादेः पञ्चकात्परम् । स्वामदृश्यादिशास्त्रोक्तमहं ब्रह्मेति निर्भयः ॥ ६२ ॥ यस्माद्भीताः प्रवर्तन्ते वाङ्मनःपावकादयः । तदात्मानन्दतत्त्वज्ञो न बिभेति कुतश्चन ॥ ६३ ॥ नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोऽद्वये । प्रणमेत्कं तदात्मज्ञो न कार्यं कर्मणा तदा ॥ ६४ ॥ विराड्वैश्वानरो बाह्यः

सरक्षन्तः प्रजापतिः। प्रविलीने तु सर्वस्मिन्प्राज्ञोऽव्याकृतमुच्यते ॥ ६५ ॥ वाचारम्भणमात्रत्वात्सुषुप्तादित्रिकं त्वसत् । सत्यो ह्यथाहमित्येवं सत्यसन्धो विमुच्यते ॥ ६६ ॥ भारूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च। ज्ञानाज्ञाने न मे स्यातां चिद्रूपत्वाविशेषतः ॥ ६७ ॥ शास्त्रस्यानतिशङ्क्यत्वाद्ब्रह्मैव स्यामहं सदा। ब्रह्मणो मे न हेयं स्याद्ग्राह्यं वेति च संस्मरेत् ॥ ६८ ॥ अहमेव च भूतेषु सर्वेष्वेको नभो यथा। मयि सर्वाणि भूतानि पश्यन्नेवं न जायते ॥ ६९ ॥ न बाह्यं मध्यतो वान्तर्विद्यतेऽन्यत्स्वतः क्वचित्। अबाह्यान्तःश्रुतेः किंचित्तस्माच्छुद्धः स्वयंप्रभः ॥ ७० ॥ नेतिनेत्यादिशास्त्रेभ्यः प्रपञ्चोपशमोऽद्वयः। अविज्ञातादिशास्त्राच्च नैव ज्ञेयो ह्यतोऽन्यथा ॥ ७१ ॥ सर्वस्मात्माहमेवेति ब्रह्म चेद्विदितं परम्। स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः ॥ ७२ ॥ जीवश्चेत्परमात्मानं स्वात्मानं देवमञ्जसा। देवोपास्यः स देवानां पशुत्वाच्च निवर्तते ॥ ७३ ॥ अहमेव सदात्मज्ञः शून्यस्त्वन्यैर्यथाम्बरम्। इत्येवं सत्यसंधत्वादसद्धाता न बध्यते ॥ ७४ ॥ कृपणास्तेऽन्यथैवातो विदुर्ब्रह्म परं हि ये। स्वराड्योऽनन्यदृक्तस्यस्तस्य देवा असन्वशे ॥७५॥ हित्वा जात्यादिसंबन्धान्वाचोऽन्याः सह कर्मभिः। ओमित्येवं सदात्मानं सर्वं शुद्धं प्रपद्यथ ॥ ७६ ॥ सेतुं सर्वव्यवस्थानामहोरात्रादिवर्जितम्। तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयम् ॥ ७७ ॥ धर्माधर्मविनिर्मुक्तं भूतभव्यात्कृताकृतात्। स्वमात्मानं परं विद्याद्विमुक्तं सर्वबन्धनैः ॥ ७८ ॥ अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः। मायया सर्वशक्तित्वादजः सन्बहुधा मतः ॥ ७९ ॥ राजवत्साक्षिमात्रत्वात्सांनिध्याद्भ्रामको यथा।

आमयञ्जगदात्माहं निःक्रियोऽकारकोऽद्वयः ॥ ८० ॥ निर्गुणं निष्क्रियं नित्यं निर्द्वन्द्वं यन्निरामयम् । शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत् ॥ ८१ ॥ बन्धं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च ज्ञेयं ज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धम् । विज्ञायैतद्यथावच्छ्रुतिमुनिगदितं शोकमोहावतीतः सर्वज्ञः सर्वकृत्स्याद्भवभयरहितो ब्राह्मणोऽवाप्तकृत्यः ॥ ८२ ॥ न स्वयं स्वस्य नान्यश्च नान्यस्यात्मा च हेयगः । उपादेयो न चाप्येवमिति सम्यङ्मतिः स्मृता ॥ ८३ ॥ आत्मप्रत्यायिका ह्येषा सर्ववेदान्तगोचरा । ज्ञात्वैतां हि विमुच्यन्ते सर्वसंसारबन्धनैः ॥ ८४ ॥ रहस्यं सर्ववेदानां देवानां चापि यत्परम् । पवित्रं परमं ह्येतत्तदेतत्संप्रकाशितम् ॥ ८५ ॥ नैतद्देयमशान्ताय रहस्यं ज्ञानमुत्तमम् । विरक्ताय प्रदातव्यं शिष्यायानुगताय च ॥ ८६ ॥ ददतश्चात्मनो ज्ञानं निष्क्रियोऽन्यो न विद्यते । ज्ञानमिच्छंस्तरेत्तसाद्युक्तः शिष्यगुणैः सदा ॥ ८७ ॥ ज्ञानं ज्ञेयं तथा ज्ञाता यस्मादन्यो न विद्यते । सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः ॥ ८८ ॥ विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम् । सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसंकुलम् ॥८९॥ इति सप्तदशं सम्यङ्मतिप्रकरणम् ॥ १७ ॥

तत्त्वमसिप्रकरणम् ॥ १८ ॥

येनात्मना विलीयन्ते उद्भवन्ति च वृत्तयः । नित्यावगतये तस्मै नमो धीप्रत्ययात्मने ॥ १ ॥ प्रमथ्य वज्रोपमयुक्तिसंभृतैः श्रुतेररातीञ्शतशो वचोसिभिः । ररक्ष वेदार्थनिधिं विशालधीर्नमो यतीन्द्राय गुरोर्गरीयसे ॥ २ ॥ नित्यमुक्तः सदेवास्मीत्येवं चेन्न भवेन्मतिः । किमर्थं श्रावयत्येव मातृवच्छ्रुतिराद-

रात् ॥ ३ ॥ सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते । रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ॥ ४ ॥ शास्त्रप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा । विषापोहो यथा ध्यानाद् हुतिः स्यात्पाप्मनस्तथा ॥ ५ ॥ सद्ब्रह्माहं करोमीति प्रत्ययावात्मसाक्षिकौ । तयोरज्ञानजस्यैव त्यागो युक्ततरो मतः ॥६॥ सदसीति प्रमाणोत्था धीरन्या तन्निभोद्भवा । प्रत्यक्षादिनिभा वापि बाध्यते दिग्भ्रमादिवत् ॥ ७ ॥ कुरु भोक्तेति यच्छास्त्रं लोकबुद्ध्यनुवादि तत् । सदसीति श्रुतेर्जाता बाध्यतेऽन्यैतयैव धीः ॥ ८ ॥ सदेव त्वमसीत्युक्ते नात्मनो मुक्तता स्थिरा । प्रवर्तते प्रसंचक्षामतो युक्त्याऽनुचिन्तयेत् ॥ ९ ॥ सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत् । अपेक्षते त एवान्यदवोचाम द्वयं हि तत् ॥ १० ॥ नियोगोऽप्रतिपन्नत्वात्कर्मणां स यथा भवेत् । अविरुद्धो भवेत्तावद्यावत्संवेद्यताऽदृढा ॥ ११ ॥ चेष्टितं च तथा मिथ्या स्वच्छन्दः प्रतिपद्यते । प्रसंख्यानमतः कार्यं यावदात्मानुभूयते ॥ १२ ॥ सदसीति च विज्ञानमक्षजो बाधते ध्रुवम् । शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ॥ १३ ॥ श्रुतानुमानजन्मानौ सामान्यविषयौ यतः । प्रत्ययावक्षजोऽवश्यं विशेषार्थो निवारयेत् ॥ १४ ॥ वाक्यार्थप्रत्ययी कश्चिन्निर्दुःखो नोपलभ्यते । यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः ॥ १५ ॥ निर्दुःखोऽस्तीतदेहेषु कृतभावोऽनुमीयते । चर्या नोऽशास्त्रसंवेद्या स्यादनिष्टं तथासति ॥ १६ ॥ सदसीति फलं चोक्त्वा विधेयं साधनं यतः । न तदन्यत्प्रसंख्यानात्प्रसिद्धार्थमिहेष्यते ॥ १७ ॥ तस्मादनुभवायैव प्रसंचक्षीत यत्नतः । त्यजन्साधनतत्साध्यविरुद्धं शममादिमान् ॥ १८ ॥ नैतदेवं

रहम्यानां नेतिनेत्यवमानतः । क्रियागाध्यं पुरा श्राव्यं न मोक्षो नित्यमिद्धतः ॥ १९ ॥ पुत्रदुःखं यथाध्यस्तं पित्रादुःखे म्य आत्मनि । अहंकर्ता तथाध्यस्तो नित्यादुःखे म्य आत्मनि ॥ २० ॥ मोऽध्यासो नेतिनेतीति प्राप्तस्यप्रतिषिध्यते । भूयोऽध्यासविधिः कश्चित्कृतश्चिन्नोपपद्यते ॥ २१ ॥ आत्मनीह यथाध्यासः प्रतिषेधस्तथैव च । मलाध्यासनिषेधौ खे क्रियेते च यथाबुधैः ॥ २२ ॥ प्राप्तश्चेत्प्रतिषिध्येत मोक्षोऽनित्यो भवेद्ध्रुवम् । अतोऽप्राप्तनिषेधोऽयं दिव्यग्निचयनादिवत् ॥ २३ ॥ संभाव्यो गोचरे शब्दः प्रत्ययो वा न चान्यथा । न संभाव्यो तदात्मत्वादहं कर्तुस्तथैव च ॥ २४ ॥ अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत् । नेति नेतीति तत्सर्वं साहंकर्त्रा निषिध्यते ॥ २५ ॥ उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यक्सदक्रियः । साक्षात्सर्वान्तरः साक्षी चेता नित्योऽगुणोऽद्वयः ॥ २६ ॥ संनिधौ सर्वदा तस्य स्यात्तदाभोऽभिमानकृत् । आत्मात्मीयं द्वयं चातः स्यादहंममगोचरः ॥ २७ ॥ जातिकर्मादिमत्त्वाद्धि तस्मिञ्शब्दास्त्वहंकृति । न कश्चिद्वर्तते शब्दस्तदभावात्स्व आत्मनि ॥ २८ ॥ आभासो यत्र तत्रैव शब्दाः प्रत्यग्दृशि स्थिताः । लक्षयेयुर्न साक्षात्तमभिदध्युः कथंचन ॥ २९ ॥ नह्यजात्यादिमान्कश्चिदर्थः शब्दैर्निरूप्यते ॥ ३० ॥ आत्माभासो यथाहंकृदात्मशब्दैस्तथोच्यते । उल्मुकादौ यथाग्न्यर्थाः परार्थत्वान्न चाञ्जसा ॥ ३१ ॥ मुखादन्यो मुखाभासो यथादर्शानुकारतः । आभासान्मुखमप्येवमादर्शननुवर्तनात् ॥ ३२ ॥ अहंकृत्यात्मनिर्भासो मुखाभासवदिष्यते । मुखवत्स्मृत आत्मान्योऽविविक्तौ तौ तथैव च ॥ ३३ ॥ संसारी च स इत्येक

आभासो यस्त्वहंकृतिः । वस्तुच्छाया स्मृतेरन्यन्माधुर्यादि च कारणम् ॥ ३४ ॥ ह्यैकदेशो विकारो वा तदाभासाश्रयः परे । अहंकर्तैव संसारी स्वतन्त्र इति केचन ॥ ३५ ॥ अहंकारादिसंतानः संसारी नान्वयी क्वचित् । इत्येवं सौगता आहुस्तत्र न्यायो विचार्यताम् ॥ ३६ ॥ संसारिणां कथा त्वास्तां प्रकृतं त्वधुनोच्यते । मुखाभासो य आदर्शे धर्मो नान्यतरस्य सः । द्वयोरेकस्य चेद्धर्मो वियुक्तेऽन्यतरे भवेत् ॥ ३७ ॥ मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मतम् । नादर्शानुविधानाच्च मुखे सत्यविभावतः ॥ ३८ ॥ द्वयोरेवेति चेत्तन्न द्वयोरेवाप्यदर्शनात् । अदृश्यस्य सतो दृष्टिः स्याद्राहोश्चन्द्रसूर्ययोः ॥ ३९ ॥ राहोः प्रागेव वस्तुत्वं सिद्धं शास्त्रप्रमाणतः । छायापक्षे त्ववस्तुत्वं तस्य स्यात्पूर्वयुक्तितः ॥ ४० ॥ छायाक्रान्तेर्निषेधोऽयं ननु वस्तुत्वसाधकः । नह्यर्थान्तरनिष्ठं सद्वाक्यमर्थान्तरं वदेत् ॥ ४१ ॥ माधुर्यादि च यत्कार्यमुष्णद्रव्याद्यसेवनात् । छायाया न त्वदृष्टत्वादपामेव च दर्शनात् ॥ ४२ ॥ आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा । गम्यन्ते शास्त्रयुक्तिभ्यामाभासासत्त्वमेव च ॥ ४३ ॥ न ह्येरविकारित्वादाभासस्याप्यवस्तुतः । नाचितित्वादहंकर्तुः कस्य संसारिता भवेत् ॥ ४४ ॥ अविद्यामात्र एवातः संसारोऽस्त्वविवेकतः । कूटस्थेनात्मना नित्यमात्मवानात्मनीव सः ॥ ४५ ॥ रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः । अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा ॥४६॥ आत्माभासाश्रयश्चात्मा प्रत्ययैः स्वैर्विकारवान् । सुखी दुःखी च संसारी नित्य एवेति केचन ॥४७॥ आत्माभासापरिज्ञानाद्याथात्म्येन विमोहिताः । अहंकर्तारमात्मेति मन्यन्ते ते निरागमाः

॥४८॥ संसारो वस्तुसंस्तेषां कर्तृभोक्तृत्वलक्षणः । आत्माभासाश्रयाज्ज्ञानात्संसरन्त्यविवेकतः ॥४९॥ चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता । स्याच्चेत्तं ज्ञानशब्दैश्च वेदः शास्तीति युज्यते ।५०। प्रकृतिप्रत्ययार्थौ यौ भिन्नानेकाश्रयौ यथा । करोति गच्छतीत्यादौ दृष्टौ लोकप्रसिद्धितः ॥ ५१ ॥ नानयोर्ध्याश्रयत्वं च लोके दृष्टं स्मृतौ तथा । जानात्यर्थेषु को हेतुर्घ्याश्रयत्वे निगद्यताम् ॥५२॥ आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया । उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥ ५३ ॥ न बुद्धेरवबोधोऽस्ति नात्मनो विद्यते क्रिया । अतो नान्यतरस्यापि जानातीति च युज्यते ॥ ५४ ॥ नाप्यतो भानशब्देन ज्ञप्तिरित्यपि युज्यते । न ह्यात्मा विक्रियामात्रो नित्य आत्मेति शासनात् ॥ ५५ ॥ न बुद्धेर्बुद्धिवाच्यत्वं करणं न ह्यकर्तृकम् । नापि ज्ञायत इत्येवं कर्मशब्दैर्निरूप्यते ॥ ५६ ॥ न येषामेक एवात्मा निर्दुःखोऽविक्रियः सदा । तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा ॥ ५७ ॥ यदाहं कर्तुरात्मत्वं तदा शब्दार्थमुख्यता । नाशनायादिमत्त्वात्तु श्रुतौ तस्यात्मतेष्यते ॥ ५८ ॥ हन्त तर्हि न मुख्यार्थो नापि गौणः कथंचन । जानातीत्यादिशब्दस्य गतिर्वाच्या तथापि तु ॥ ५९ ॥ शब्दानामयथार्थत्वे वेदस्याप्यप्रमाणता । सा च नेष्टा ततो ग्राह्या गतिरस्य प्रसिद्धितः ॥६०॥ प्रसिद्धिर्मूढलोकस्य यदि ग्राह्या निरात्मता । लोकायतिकसिद्धान्तः सा चानिष्टा प्रसज्यते ॥ ६१ ॥ अभियुक्तप्रसिद्धिश्चेत्पूर्ववद्दुर्विवेकता । गतिशून्यं न वेदोऽयं प्रमाणं संवदत्युत ॥ ६२ ॥ आदर्शे मुखसामान्यं मुखस्येष्टं हि मानवैः । मुखस्य प्रतिबिम्बो हि मुखाकारेण दृश्यते ॥ ६३ ॥ यत्र यस्यावभासस्तु तयोरे-

वाविवेकतः । जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः ॥ ६४ ॥ बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते । तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते ॥ ६५ ॥ स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिःश्रुतेर्यतः । न बुद्ध्या क्रियते तस्मान्नात्मनान्येन वा सदा ॥ ६६ ॥ देहेऽहंप्रत्ययो यद्वज्जानातीति च लौकिकाः । वदन्ति ज्ञानकर्तृत्वं तद्वद्बुद्धेस्तथात्मनः ॥ ६७ ॥ बौद्धैस्तु प्रत्ययैरेवं क्रियमाणैश्च चिन्निभैः । मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः ॥ ६८ ॥ तस्माज्ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिताः । जानातीत्यादिशब्दश्च प्रत्ययो या च तत्स्मृतिः ॥ ६९ ॥ आदर्शानुविधायित्वं छायाया अस्तते मुखम् । बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथेष्यते ॥ ७० ॥ बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः । ग्राहिका इव भासन्ते दहन्तीवोल्मुकादयः ॥ ७१ ॥ स्वयमेवावभासन्ते ग्राहकाः स्वयमेव च । इत्येवं ग्राहकास्तित्वं प्रतिषिध्यन्ति सौगताः ॥ ७२ ॥ यद्येवं नान्यदृश्यास्ते किं तद्वारणमुच्यताम् । भावाभावौ हि तेषां यौ नान्यग्राह्यौ सता यदि ॥ ७३ ॥ अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम् । अचितित्वस्य तुल्यत्वादन्यस्मिन्ग्राहके सति ॥ ७४ ॥ अध्यक्षस्य समीपे तु सिद्धिः स्यादिति चेन्मतम् । नाध्यक्षेऽनुपकारित्वादन्यत्रापि प्रसङ्गतः ॥ ७५ ॥ अर्थी दुःखी च यः श्रोता सत्त्वध्यक्षोऽथवेतरः । अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम् ॥७६॥ कर्ताध्यक्षः सदसीति नैव सद्ग्रहमर्हति । सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ॥ ७७ ॥ अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद्ग्रहस्तथा । असदस्तु विविच्यैव त्वमेवेति वदेद्यदि । प्रत्ययान्वयिनिष्ठत्व-

मुक्तदोषः प्रसज्यते ॥ ७८ ॥ त्वमित्यध्यक्षनिष्ठश्चेदहमध्यक्षयोः कथम्। संबन्धो वाच्य एवात्र येन त्वमिति लक्षयेत् ॥ ७९ ॥ द्रष्टृदृश्यत्वसंबन्धो यद्यध्यक्षे क्रियेत्कथम् ॥ ८० ॥ अक्रियत्वेऽपि तादात्म्यमध्यक्षस्य भवेद्यदि। आत्माध्यक्षो ममास्तीति संबन्धाग्रहणेन धीः ॥८१॥ संबन्धग्रहणं शास्त्रादिति चेन्मन्यसे नहि। पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहो वा स्यान्ममेति च ॥८२॥ अदृशिर्दृशिरूपेण भाति बुद्धिर्यदा तदा। प्रत्यया अपि तस्याः स्युस्तप्तायोविस्फुलिङ्गवत् ॥ ८३ ॥ आभासस्तदभावश्च दृशेः सीम्नो न चान्यथा। लोकस्य युक्तितः स्यातां तद्ग्रहश्च तथा सति ॥ ८४ ॥ नन्वेवं दृशिसंक्रान्तिरयःपिण्डेऽग्निवद्भवेत्। मुखाभासवदित्येतदादर्शे तन्निराकृतम् ॥ ८५ ॥ कृष्णायोलोहिताभासमित्येतद्दृष्टमुच्यते। दृष्टदार्ष्टान्ततुल्यत्वं न तु सर्वात्मना क्वचित् ॥ ८६ ॥ तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत्। मुखाभासो यथादर्शे आभासश्चोदितो मृषा ॥ ८७ ॥ चित्तं चेतनमित्येतच्छास्त्रयुक्तिविवर्जितम्। देहस्यापि प्रसङ्गः स्याच्चक्षुरादेस्तथैव च ॥ ८८ ॥ तदप्यस्त्विति चेत्तन्न लोकायतिकसंगतेः। न च धीर्दृशिरसीति यद्याभासो न चेतसि ॥८९॥ सदसीति धियोऽभावे व्यर्थं स्यात्तत्त्वमस्यपि। युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ॥ ९० ॥ ममेदंप्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः। अहमित्यस्मदीष्टः स्यादयमसीति चोभयोः ॥९१॥ अन्योन्यापेक्षया तेषां प्रधानगुणतेष्यते। विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्तितः ॥ ९२ ॥ ममेदं द्वयमप्येतन्मध्यमस्य विशेषणम्। धनी गोमान्यथा तद्वद्देहोऽहंकर्तुरेव च ॥ ९३ ॥ बुद्ध्यारूढं सदा सर्वं साहंकर्ता च साक्षिणः। तस्मात्सर्वाविभा-

सो ज्ञः किंचिदप्यस्पृशन्सदा ॥ ९४ ॥ प्रतिलोममिदं सर्वं यथोक्तं लोकबुद्धितः । अविवेकधियामस्ति नास्ति सर्वं विवेकिनाम् ॥ ९५ ॥ अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च । स्यादेतदहमित्यत्र युक्तिरेवावधारणे ॥ ९६ ॥ नाद्राक्षमहमित्यस्मिन्सुषुप्तेऽन्यन्मनागपि । न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति ॥ ९७ ॥ स्वयंज्योतिर्न हि द्रष्टुरित्येवं संविदोऽस्तिताम् । कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम् ॥ स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक् ॥ ९८ ॥ एवं विज्ञातवाक्यार्थे श्रुतिलोकप्रसिद्धितः । श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ॥ ९९ ॥ ब्रह्मा दाशरथेर्यद्वदुक्त्यैवापानुदत्तमः । तस्य विष्णुत्वसंबोधे न यत्नान्तरमूचिवान् ॥ १०० ॥ अहंशब्दस्य निष्ठा या ज्योतिषि प्रत्यगात्मनि । सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ॥ १०१ ॥ श्रुतमात्रेण चेन्न स्यात्कार्यं तत्र भवेद्ध्रुवम् । व्यवहारात्पुरापीष्टः सद्भावः स्वयमात्मनः ॥ १०२ ॥ अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा । तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेऽप्यसंशयः ॥ १०३ ॥ प्रतिबन्धविहीनत्वात्स्वयं चानुभवात्मनः । जायेतैव प्रमा तत्र स्वात्मन्येव न संशयः ॥ १०४ ॥ किं सदेवाहमस्मीति किंवान्यत्प्रतिपद्यते । सदेव चेदहंशब्दः सता मुख्यार्थ इष्यताम् ॥१०५॥ अन्यचेत्सदहंग्राहप्रतिपत्तिर्मृषैव सा । तस्मान्मुख्यग्रहे नास्ति वारणावगतेरिह ॥ १०६ ॥ प्रत्ययी प्रत्ययश्चैव यदाभासौ तदर्थता । तयोरचितिमत्त्वाच्च चैतन्ये कल्प्यते फलम् ॥ १०७ ॥ कूटस्थेऽपि फलं योग्यं राजनीव जयादिकम् । तदनात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य च ॥ १०८ ॥ आदर्शस्तु यदाभा-

सो मुखाकारः स एव सः । यथैवं प्रत्ययादर्शो यदाभासस्तदा ग्रहम् ॥ १०९ ॥ इत्येवं प्रतिपत्तिः स्यात्तदस्मीति च नान्यथा । तत्त्वमित्युपदेशोऽपि द्वाराभावादनर्थकः ॥ ११० ॥ श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं तथा भवेत् । अध्यक्षस्य न चेदिष्टं श्रोतृत्वं कस्य तद्भवेत् ॥ १११ ॥ अध्यक्षस्य समीपे स्याद्बुद्धेरेवेति चेन्मतम् । न तत्कृतोपकारोऽस्ति काष्ठाद्यद्वत् कल्प्यते ॥ ११२ ॥ बुद्धौ चेत्तत्कृतः कश्चित्तन्वेवं परिणामिता । आभासेऽपि च को दोषः सति श्रुत्याद्यनुग्रहे ॥ ११३ ॥ आभासे परिणामश्चेन्न रज्ज्वादिनिभत्ववत् । सर्पादेश्च तथा गोचमादर्शे च मुखत्ववत् ॥ ११४ ॥ नात्माभासत्वसिद्धिश्चेदात्मनो ग्रहणात्पृथक् । मुखादेश्च पृथक्सिद्धिरिह त्वन्योन्यसंश्रयः ॥ ११५ ॥ अध्यक्षस्य पृथक्सिद्धावाभासस्य तदीयता । आभासस्य तदीयत्वे ह्यध्यक्षव्यतिरिक्तता ॥ ११६ ॥ नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य दृशेस्तथा । रथादेस्तत्र शून्यत्वात्प्रत्ययस्यात्मना ग्रहः ॥ ११७ ॥ अनगत्या हि संव्याप्तः प्रत्ययो विषयाकृतिः । जायते स यदाकारः स बाह्यो विषयो मतः ॥ ११८ ॥ कर्मेप्सिततमत्वात्स तद्वान्कार्ये नियुज्यते । आकारो यत्र चार्प्येत करणं तदिहोच्यते ॥ ११९ ॥ यदाभासेन संव्याप्तः संज्ञातेति निगद्यते । त्रयमेतद्विविच्यात्र यो जानाति स आत्मवित् ॥१२०॥ सम्यक्संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः । एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ॥ १२१ ॥ आधिभेदाद्यथा भेदो मणेरवगतेस्तथा । अशुद्धिः परिणामश्च सर्वं प्रत्ययसंश्रयात् ॥ १२२ ॥ प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहान्यतः । आपरोक्ष्यात्तदेवोक्तमनुमानं प्रदीपवत् ॥ १२३ ॥ किमन्यद्ग्राहये-

त्कश्चित्प्रमाणेन तु केनचित् । विनैव तु प्रमाणेन निवृत्त्यान्यस्य शेषतः ॥ १२४ ॥ शब्देनैव प्रमाणेन निवृत्तिश्चेदिहोच्यते । अध्यक्षस्याप्रसिद्धित्वाच्छून्यतैव प्रसज्यते ॥ १२५ ॥ चेतनस्त्वं कथं देह इति चेन्नाप्रसिद्धितः । चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः ॥ १२६ ॥ अध्यक्षः स्वयमस्त्येव चेतनस्यापरोक्षतः । तुल्य एवं प्रबोधः स्यादन्यस्यासत्त्ववादिना ॥१२७॥ अहमज्ञासिषं चेदमिति लोकस्मृतेरिह । करणं कर्म कर्ता च सिद्धास्त्वेकक्षणे किल ॥ १२८ ॥ प्रामाण्येऽपि स्मृतेः शैघ्र्याद्यौगपद्यं विभाव्यते । क्रमेण ग्रहणं पूर्वं स्मृतेः पश्चात्तथैव च ॥ १२९ ॥ अज्ञासिषमिदं मां चेत्यपेक्षा जायते ध्रुवम् । विशेषोऽपेक्ष्यते यत्र तत्र नैवैककालता ॥ १३० ॥ आत्मनो ग्रहणे चापि त्रयाणामिह संभवात् । आत्मन्यासक्तकर्तृत्वं न स्यात्करणकर्मणोः ॥ १३१ ॥ व्याप्तुमिष्टं च यत्कर्तुः क्रियया कर्म तत्स्मृतम् । अतो हि कर्तृतन्त्रत्वं तस्येष्टं नान्यतन्त्रता ॥ १३२ ॥ शब्दाद्वानुमितेर्वापि प्रमाणाद्वा ततोऽन्यतः । सिद्धिः सर्वपदार्थानां स्यादज्ञंप्रति नान्यथा ॥ १३३ ॥ अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा । विना स्वस्य प्रसिद्धिस्तु नाज्ञं प्रत्युपयुज्यते ॥ १३४ ॥ तस्यैवाज्ञत्वमिष्टं चेज्ज्ञानत्वेन्या मतिर्भवेत् । अन्यस्यैवाज्ञतायां च तद्विज्ञाने ध्रुवा भवेत् ॥ १३५ ॥ ज्ञातता स्वात्मलाभो वा सिद्धिः स्यादन्यदेव वा । ज्ञातत्वेऽनन्तरोक्तौ त्वं पक्षौ संसर्तुमर्हसि ॥ १३६ ॥ सिद्धिः स्यात्स्वात्मलाभश्चेद्यत्नस्तत्र निरर्थकः । सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तु वस्तुतः ॥१३७॥ ज्ञानज्ञेयादिवादेऽतः सिद्धिर्ज्ञातत्वमुच्यते । अध्यक्ष्याध्यक्षयोः सिद्धिर्ज्ञेयत्वं नात्मलाभता ॥ १३८ ॥ स्पष्टत्वं कर्म-

कर्त्रादेः सिद्धिता यदि कल्प्यते । स्पष्टतास्पष्टते स्यातामन्यस्यैव न चात्मनः ॥१३९॥ अद्रष्टुनैव चान्धस्य स्पष्टीभावो घटस्य तु । कर्त्रादेः स्पष्टतेष्टा चेद्रष्टृताऽध्यक्षकर्तृका ॥ १४० ॥ अनुभूतेः किमन्यस्मिन्स्यात्तवापेक्षया वद । अनुभवितरीष्टा स्यात्सोऽप्यनुभूतिरेव नः ॥ १४१ ॥ अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ १४२ ॥ भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते । सत्त्वं नाशित्वमस्याश्चेत्सकर्तृत्वं तथेष्यताम् ॥ १४३ ॥ न कश्चिचेष्यते धर्म इति चेत्पक्षहानता । नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः । न भूतेस्तर्हि नाशित्वं स्यालक्षण्यं मतं हि ते ॥ १४४ ॥ स्वलक्षणावधिर्नाशोऽनाशोनाशनिवृत्तिता । अगोरसत्वं गोत्वं ते नतु तद्गोत्वलक्षणम् ॥१४५॥ क्षणवाच्योऽपि योऽर्थः स्यात्सोऽप्यन्याभाव एव ते ॥ १४६ ॥ भेदाभावेऽप्यभावस्य भेदो नामभिरिष्यते । नामभेदैरनेकत्वमेकस्य स्यात्कथं तव ॥१४७॥ अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि । नाभावा भेदकाः सर्वे विशेषा वा कथंचन ॥ १४८ ॥ नामजात्यादयो यद्वत्संविदस्तेऽविशेषतः ॥ १४९ ॥ प्रत्यक्षमनुमानं वा व्यवहारे यदीच्छसि । क्रियाकारकभेदैस्तदभ्युपेयं ध्रुवं भवेत् ॥ १५० ॥ तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणम् । संविदस्तदुपेयं स्याद्येन चाप्यनुभूयते ॥ १५१ ॥ रूपादीनां यथान्यः स्याद्ग्राह्यत्वाद्ग्राहकस्तथा । प्रत्ययस्तत्तथान्यः स्याद्ग्राह्यकत्वात्प्रदीपवत् ॥ १५२ ॥ अध्यक्षस्य दृशेः कीदृक्संबन्धः संभविष्यति । अध्यक्षेण तु दृश्येन मुक्त्वान्यो द्रष्टृदृश्यताम् ॥१५३॥ अध्यक्षेण कृता दृष्टिर्दृश्यं व्याप्नोत्यथापि वा । नित्याध्यक्षकृतः कश्चिदुपकारो

भवेद्धियाम् ॥ १५४ ॥ स चोक्तस्तन्निभत्वं प्राक्संव्याप्तिश्च घटादिषु । यथालोकादिसंव्याप्तिर्व्यञ्जकत्वाद्धियस्तथा ॥१५५॥ आलोकस्थो घटो यद्वद्बुद्ध्यारूढो भवेत्तथा । धीव्याप्तिः स्याद्घटारोहो धियो व्याप्तौ क्रमो भवेत् ॥ १५६ ॥ पूर्वं स्यात्प्रत्ययव्याप्तिस्ततोऽनुग्रह आत्मनः । कृत्स्नाध्यक्षस्य नो युक्तः कालाकाशादिवत्क्रमः ॥ १५७ ॥ विषयग्रहणं यस्य कारणापेक्षया भवेत् । सत्येव ग्राह्यशेषे च परिणामी स चित्तवत् ॥ १५८ ॥ अध्यक्षोऽहमिति ज्ञानं बुद्धेरेव विनिश्चयः । नाध्यक्षस्याविशेषत्वान्न तस्यास्ति परो यतः ॥ १५९ ॥ कर्ता चेदहमित्येवमनुभूयेत मुक्तता । सुखदुःखविनिर्मोको नाहंकर्तरि युज्यते ॥१६०॥ बाध्यते प्रत्ययेनेह विवेकेनाविवेकवान् । देहादावभिमानोत्थो दुःखीति प्रत्ययो ध्रुवम् । कुण्डलीप्रत्ययो यद्वत्प्रत्यगात्माभिमानिना ॥ १६१ ॥ विपर्यासे सदन्तं स्यात्प्रमाणस्याप्रमाणतः ॥ १६२ ॥ दाहच्छेदविनाशेषु दुःखित्वं नान्यथात्मनः । नैव ह्यन्यस्य दाहादावन्यो दुःखी भवेत्कचित् ॥ १६३ ॥ अस्पर्शत्वाददेहत्वान्नाहं दाह्यो यतः सदा । तस्मान्मिथ्याभिमानोत्थं मृते पुत्रे मृतिर्यथा ॥ १६४ ॥ कुण्डल्यहमिति ह्येतद्बाध्येतैव विवेकिना । दुःखीति प्रत्ययस्तद्वत्केवलाहंधिया सह ॥१६५॥ सिद्धे दुःखित्व इष्टं स्यात्तच्छक्तिश्छन्दसात्मनः । मिथ्याभिमानतो दुःखी तेनार्थापादनक्षमः ॥ १६६ ॥ अस्पर्शोऽपि यथा स्पर्शमचलश्चलनादि च । अविवेकात्तथा दुःखं मानसं चात्मनीक्षते ॥ १६७ ॥ विवेकात्मधिया दुःखं नुद्यते चलनादिवत् । अविवेकस्वभावेन मनो गच्छत्यनिच्छतः ॥ १६८ ॥ तदानुदृश्यते दुःखं नैश्चल्येनैव तस्य तत् । प्रत्य-

गात्मनि तस्मात्तद्दुःखं नैवोपपद्यते ॥ १६९ ॥ त्वंसतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत् ॥ १७० ॥ निर्दुःखवाचिना योगात्त्वंशब्दस्य तदर्थता । प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा ॥ १७१ ॥ दशमस्त्वमसीत्येवं वाक्यं स्यात्प्रत्यगात्मनि ॥ १७२ ॥ स्वार्थस्य ह्यप्रहाणेन विशिष्टार्थसमर्पकौ । प्रत्यगात्मावगत्यन्तौ नान्योऽर्थोऽर्थाद्विरोध्यतः ॥ १७३ ॥ नवसंख्याहृतज्ञानो दशमं स्वमात्मानं दशपूरणम् । अपश्यञ्ज्ञातुमेवेच्छेत्स्वमात्मानं जनस्तथा ॥ १७४ ॥ अविद्याबद्धचक्षुष्ट्वात्कामापहृतधीः सदा । विविक्तं दृशिमात्मानं नेक्षते दशमं यथा ॥ १७५ ॥ दशमस्त्वमसीत्येवं तत्त्वमस्यादिवाक्यतः । स्वमात्मानं विजानाति कृत्स्नान्तःकरणे क्षणम् ॥ १७६ ॥ इदं पूर्वमिदं पश्चात्पदं वाक्यं भवेदिति । अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबोधनम् ॥१७७॥ वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः । नियमो नैव वेदेऽस्ति पदमांगत्यमर्थतः ॥१७८॥ यदा नित्येषु वाक्येषु पदार्थस्तु विविच्यते । वाक्यार्थज्ञानसंक्रान्त्यै तदा प्रश्नो न युज्यते ॥ १७९ ॥ अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु । स्मृत्यभावे न वाक्यार्थो ज्ञातुं शक्यो हि केनचित् ॥ १८० ॥ तत्त्वमस्यादिवाक्येषु त्वंपदार्थविवेकतः । व्यज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमित्यतः ॥ १८१ ॥ अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा । त्वंपदार्थविवेके हि पाणावर्पितबिल्ववत् ॥ १८२ ॥ वाक्यार्थो व्यज्यते चैवं केवलोऽहं पदार्थतः । दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात् ॥ १८३ ॥ तत्रैवं संभवत्यर्थे श्रुतहानाश्रुतार्थधीः । नैव कल्पयितुं युक्ता पदवाक्यार्थकोविदैः ॥ १८४ ॥ प्रत्यक्षादीनि बाधन्ते कृष्णलादिषु

पाकवत् । अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम् ॥१८५॥ दुःख्यसीति सति ज्ञाने निर्दुःखीति न जायते । प्रत्यक्षादिनिभत्वेऽपि वाक्यान्न व्यभिचारतः ॥ १८६ ॥ स्वप्ने दुःख्यहमध्यासं दाहच्छेदादिहेतुतः । तत्कालभाविभिर्वाक्यैर्न बाधः क्रियते यदि ॥ १८७ ॥ समाप्तेस्तर्हि दुःखस्य प्राक् तद्बाध इष्यताम् । न हि दुःखस्य संतानो भ्रान्तेर्वा दृश्यते क्वचित् ॥ १८८ ॥ प्रत्यगात्मन आत्मत्वं दुःख्यसीत्यस्य बाधया । दशमं नवमस्येव वेद चेदविरुद्धता ॥ १८९ ॥ नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः । वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥ १९० ॥ अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् । एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥ १९१ ॥ सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् । दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥ १९२ ॥ प्रबोधेन यथा स्वाप्नं सर्वदुःखं निवर्तते । प्रत्यगात्मधिया तद्वद्दुःखित्वं सर्वदात्मनः ॥ १९३ ॥ कृष्णलादौ प्रमाजन्म तदन्यार्थोऽस्मृदुत्वतः । तत्त्वमस्यादिवाक्येषु न त्वेवमविरोधतः ॥ १९४ ॥ वाक्ये तत्त्वमसीत्यस्मिन्ज्ञातार्थं तदसिद्धयम् । समर्थे सत्यसाहाय्याद्वाक्यं नोत्पादयेत्प्रमाम् ॥१९५॥ तत्त्वमोस्तुल्यनीडार्थमसीत्येतत्पदं भवेत् ॥ १९६ ॥ तच्छब्दः प्रत्यगात्मार्थस्तच्छब्दार्थस्त्वमस्तथा । दुःखित्वाप्रत्यगात्मत्वं वारयेतामुभावपि ॥ १९७ ॥ एवं च नेतिनेत्यर्थं गमयेतां परस्परम् ॥ १९८ ॥ एवं तत्त्वमसीत्यस्य गम्यमाने फले कथम् । अप्रमाणत्वमस्योक्त्वा क्रियापेक्षत्वमुच्यते ॥ १९९ ॥ तस्मादाद्यन्तमध्येषु कुर्वित्येतद्विरोध्यतः । न कल्प्योऽश्रुतत्वाच्च श्रुतत्यागोऽप्यनर्थकः ॥ २०० ॥ यथानुभूयते

तृप्तिर्भुजेर्वाक्यान्न गम्यते । वाक्यस्य विधृतिस्तद्वद्धीशक्त्यपाय-सीक्रिया ॥२०१॥ सत्यमेवमनात्मार्थवाक्यात्पारोक्ष्यबोधनम् । प्रत्यगात्मनि न त्वेवं संख्याप्राप्तिवदध्रुवम् ॥ २०२ ॥ स्वयंवेद्यत्वपर्यायः स्वप्रमाणक इष्यताम् । निवृत्तावगमः सिद्धः स्वात्मनोऽनुभवश्च नः ॥ २०३ ॥ बुद्धीनां विषयो दुःखं नो यस्य विषया मताः । कुतोऽस्य दुःखसंबन्धो दृशेः स्यात्प्रत्यगात्मनः ॥ २०४ ॥ दृशिरेवानुभूयेत स्वेनैवानुभवात्मना । तदाभासतया जन्म धियोऽस्यानुभवः स्मृतः ॥ २०५ ॥ अशनायादिनिर्मुक्तः सिद्धो मोक्षस्त्वमेव सः । श्रोतव्यादि तवेत्येतद्विरुद्धं कथमुच्यते ॥ २०६ ॥ सेत्स्यतीत्येव चेत्तत्स्याच्छ्रवणादि तदा भवेत् । मोक्षस्यानित्यतैवं स्याद्विरोधे नान्यथा वचः ॥२०७॥ श्रोतृश्रोतव्ययोर्भेदो यदीष्टः स्याद्भवेदिदम् । इष्टार्थकोप एवं स्यान्न युक्तं सर्वथा वचः ॥ २०८ ॥ सिद्धो मोक्षोऽहमित्येव ज्ञात्वात्मानं भवेद्यदि । चिकीर्षुर्यः स मूढात्मा शास्त्रं चोद्धाटयत्यपि ॥ २०९ ॥ नहि सिद्धस्य कर्तव्यं सकार्यस्य न सिद्धता । उभयालम्बनं कुर्वन्नात्मानं वञ्चयत्यपि ॥ २१० ॥ सिद्धो मोक्षस्त्वमित्येतद्वस्तुमात्रं प्रदर्श्यते । श्रोतुस्तथात्वविज्ञाने प्रवृत्तिः स्यात्कथं लिति ॥ २११ ॥ कर्ता दुःख्यहमस्मीति प्रत्यक्षेणानुभूयते । कर्ता दुःखी च माभूवमिति यत्नो भवेत्ततः ॥ २१२ ॥ तद्विज्ञानाय युक्त्यादि कर्तव्यं श्रुतिरब्रवीत् । कर्तृत्वाद्यनुवादेन सिद्धत्वानुभवाय तु ॥ २१३ ॥ निर्दुःखो निष्क्रियोऽकामः सिद्धो मोक्षोऽहमित्यपि । गृहीत्वैव विरुद्धार्थमादध्यात्कथमेव मः ॥ २१४ ॥ सकामः सक्रियः सिद्ध इति मेऽनुभवः कथम् । अतो मे विपरीतस्य तद्ब्रवान्वक्तुमर्हति ॥२१५॥

इहैव घटते प्रश्नो न मुक्तत्वानुभूतये । प्रमाणेन विरोधी यः सोऽर्थः प्रश्नमर्हति ॥ २१६ ॥ अहं निर्मुक्त इत्येव सदसीत्यन्यमानजः। प्रत्यक्षाभासजन्यत्वाद्दुःखित्वं प्रश्नमर्हति ॥२१७॥ पृष्टमाकाङ्क्षितं वाच्यं दुःखाभावमभीप्सितम् ॥ २१८ ॥ कथं हीदं निवर्तेत दुःखं सर्वात्मना मम । इति प्रश्नानुरूपं यद्वाच्यं दुःखनिवर्तकम् ॥ २१९ ॥ श्रुतेः स्वात्मनि नाशङ्का प्रामाण्ये सति विद्यते । तस्मादात्मविमुक्तत्वं प्रत्याययति तद्वचः । वक्तव्यं तत्त्वथार्थं स्याद्विरोधेऽसति केनचित् ॥ २२० ॥ इतोऽन्योऽनुभवः कश्चिदात्मनो नोपपद्यते । अविज्ञातं विजानतां विज्ञातारमिति श्रुतेः ॥ २२१ ॥ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । साधनत्वं व्रजत्येव शान्तोदान्तानुशासनात् ॥२२२॥ त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि । वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम् ॥ २२३ ॥ सर्वमात्मेति वाक्यार्थे विज्ञातेऽस्य प्रमाणतः । असत्त्वे ह्यन्यमानस्य विधिस्तं योजयेत्कथम् ॥ २२४ ॥ तस्माद्वाक्यार्थविज्ञानान्नोर्ध्वं कर्मविधिर्भवेत् । नहि ब्रह्मास्मि कर्तेति विरुद्धे भवतो धियौ ॥ २२५ ॥ ब्रह्मासीति च विधेयं नैव कर्तेति बाध्यते । सकामो बद्ध इत्येवं प्रमाणाभासजा तया ॥ २२६ ॥ शास्त्राद्ब्रह्मास्मि नान्योऽहमिति बुद्धिर्भवेद्दृढा । यदा युक्ता तदैवं धीर्यथा देहात्मधीरिति॥२२७॥ सभयादभयं प्राप्तस्तदर्थं यतते च यः । स पुनः सभयं गन्तुं स्वतश्चेन्न गच्छति॥२२८॥ यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः । पदार्थाज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ॥ २२९ ॥ अतः सर्वमिदं सिद्धं यत्प्रागस्माभिरीरितम् ॥ २३० ॥ यो हि यस्माद्विरक्तः स्यान्नासौ तस्मै प्रवर्तते । लोकत्रया[illegible]न्मु-

मुमुक्षुः किमितीहते ॥ २३१ ॥ क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति । मृष्टान्नध्वस्ततृट् ज्ञानन्नामृढस्तज्जिघत्सति ॥ २३२ ॥ वेदान्तवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम् । उज्जहारालिवद्यो नस्तस्मै सद्गुरवे नमः ॥ २३३ ॥ इत्यष्टादशं तत्त्वमसिप्रकरणम् ॥ १८ ॥

अथात्ममनःसंवादप्रकरणम् ॥ १९ ॥

प्रयुज्य तृष्णाज्वरनाशकारणं चिकित्सितं ज्ञानविरागभेषजम् । न याति कामज्वरसन्निपातजां शरीरमालां शतयोगदुःखिताम् ॥ १ ॥ अहं ममेति त्वमनर्थमीहमे परार्थमिच्छन्ति तवान्य ईहितम् । न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततश्च युक्तः शम एव ते मनः ॥ २ ॥ यतो न चान्यः परमात्मसनातनात्सदैव तृप्तोऽहमतो न मेऽर्थिता । सदैव तृप्तश्च न कामये हितं यतस्य चेतः प्रशमाय ते हितम् ॥ ३ ॥ षडूर्मिमालाभ्यतिवृत्त एव यः स एव चात्मा जगतश्च नः श्रुतेः । प्रमाणतश्चापि मया प्रवेद्यते मुधैव तस्माच्च मनस्तवेहितम् ॥ ४ ॥ त्वयि प्रशान्ते नहि चास्ति भेदधीर्यतो जगन्मोहमुपैति मायया । ग्रहो हि मायाप्रभवस्य कारणं ग्रहाद्विमोके नहि साऽस्ति कस्यचित् ॥५॥ न मेऽस्ति मोहस्तव चेष्टितेन हि प्रबुद्धतत्त्वस्त्वसितो ह्यविक्रियः । न पूर्वतत्त्वोत्तरभेदता हि नो वृथैव तस्माच्च मनस्तवेहितम् ॥ ६ ॥ यतश्च नित्योऽहमतो न चान्यथा विकारयोगे हि भवेदनित्यता । सदा प्रभातोऽहमतो हि चाद्वयो विकल्पितं चाप्यसदित्यवस्थितम् ॥ ७ ॥ अभावरूपं त्वमसीह हे मनो निरीक्ष्यमाणे न हि युक्तितोऽस्तिता । सतो ह्यनाशादसतोऽप्यजन्मतो द्वयं च चेतस्तव नास्तितेष्यते ॥ ८ ॥ दृश्यं च द्रष्टं

च तथा च दर्शनं भ्रमस्तु सर्वस्तव कल्पितो हि सः । दृशेश्च भिन्नं न हि दृश्यमीक्ष्यते स्वपन्प्रबोधेन तथा न भिद्यते ॥९॥ विकल्पना वापि तथाद्वया भवेदवस्तुयोगात्तदलातचक्रवत् । न शक्तिभेदोऽस्ति यतो न चात्मनां ततोऽद्वयत्वं श्रुतितोऽवसीयते ॥ १० ॥ मिथश्च भिन्ना यदि ते हि चेतनाः क्षयस्तु तेषां परिमाणयोगतः । ध्रुवो भवेद्भेदवतां हि दृष्टतो जगत्क्षयश्चापि समस्तमोक्षतः ॥ ११ ॥ न मेऽस्ति कश्चिन्न च सोऽस्मि कस्यचिद्यतोऽद्वयोऽहं न हि चास्ति कल्पितम् । अकल्पितश्चास्मि पुरा प्रसिद्धितो विकल्पनाया द्वयमेव कल्पितम् ॥ १२ ॥ विकल्पना चाप्यभवे न विद्यते सदन्यदित्येवमतो न नास्तिता । यतः प्रवृत्ता तव चापि कल्पना पुरा प्रसिद्धेर्न च तद्विकल्पितम् ॥ १३ ॥ असद्द्वयं तेऽपि हि यद्यदीक्ष्यते न दृष्टमित्येव न, चैव नास्तिता । यतः प्रवृत्ता सदसद्विकल्पना विचारवद्वापि, तथाद्वयं च सत् ॥ १४ ॥ सदभ्युपेतं भवतोपकल्पितं विचारहेतोर्यदि तस्य नास्तिता । विचारहानाच्च तथैव संस्थितं न चेत्तदिष्टं नितरां सदिष्यते ॥ १५ ॥ असत्समं चैव सदित्यपीति चेदनर्थवत्त्वान्नरशृङ्गतुल्यतः । अनर्थवत्त्वं त्वसति ह्यकारणं न चैव तस्मान्न विपर्ययेऽन्यथा ॥ १६ ॥ असिद्धतश्चापि विचारकारणाद्द्वयं च तस्मात्प्रसृतिं च मायया । श्रुतेः स्मृतेश्चापि तथा हि युक्तितः प्रसिद्ध्यतीत्थं न तु युज्यतेऽन्यथा ॥ १७ ॥ विकल्पनाचापि विधर्मकं श्रुतेः पुरा प्रसिद्धेश्च विकल्पतोऽद्वयः । न चेति नेतीति यथा विकल्पितं निषिध्यतेऽत्राप्यवरोपसिद्धये ॥ १८ ॥ अकल्पितेऽप्येवमजेऽद्वयेऽक्षरे विकल्पयन्तः सदसच्च जन्मभिः । स्वचित्तमायाप्रभवं च ते भवं,

जरां च मृत्युं च नियान्ति संततम् ॥ १९ ॥ भवाभवत्वं तु न चेदवस्थितिर्न चास्य चान्यस्थितिजन्म नान्यथा । सतो ह्यमत्वादसतश्च सत्वतो न च क्रियाकारकमित्यतोऽप्यजम् ॥ २० ॥ अकुर्वदिष्टं यदि वास्य कारकं न किंचिदन्यन्ननु नास्त्यकारकम् । सतो विशेषादसतश्च सद्युतौ तुलां तयोर्यद्वदनिश्चयान्न हि ॥ २१ ॥ न चेत्स इष्टः सदसद्विपर्ययः कथं भवः स्यात्सदसद्व्यवस्थितौ । विभक्तमेतद्द्वयमप्यवस्थितं न जन्म तस्माच्च मनो हि कस्यचित् ॥ २२ ॥ अथाभ्युपेत्यापि भवं तवेच्छतो ब्रवीमि नार्थस्तव चेष्टितेन मे । न हानवृद्धी न यतः स्वतोऽसतो भवोऽन्यतो वा यदि वास्तिता तयोः ॥ २३ ॥ ध्रुवा ह्यनित्याश्च न चान्ययोगिनो मिथश्च कार्यं न च तेषु युज्यते । अतो न कस्यापि हि किंचिदिष्यते स्वयं च तत्त्वं न निरुक्तिगोचरम् ॥ २४ ॥ समं तु तस्मात्सततं विभातवद्द्वयाद्विमुक्तं सदसद्विकल्पितात् । निरीक्ष्य युक्त्या श्रुतितस्तु बुद्धिमानशेषनिर्वाणमुपैति दीपवत् ॥ २५ ॥ अवेद्यमेकं यदनन्यवेदिनां कुतार्किकाणां च सुवेद्यमन्यथा । निरीक्ष्य चेत्थं त्वगुणग्रहोऽगुणं न याति मोहं ग्रहदोषमुक्तितः ॥ २६ ॥ अतोऽन्यथा न ग्रहनाश इष्यते विमोह्यबुद्धेर्ग्रह एव कारणम् । ग्रहोऽप्यहेतुस्त्वनलस्त्वनिन्धनो यथा प्रशान्तिं परमां तथा व्रजेत् ॥ २७ ॥ विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ॥ तथामृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ॥ २८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यशिष्यस्य श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसाहस्री समाप्ता ॥

तोटकाचार्यविरचितं
श्रुतिसारसमुद्धरणम् ॥ ३४ ॥

ॐ परमात्मने नमः । त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं शक्तेस्तनूजतनयं परमेष्ठिकल्पम् । जीमूतमुक्तविमलाम्बरचारुवर्णं वासिष्ठमुग्रतपसं प्रणतोस्मि नित्यम् ॥ १ ॥ सकलं मनसा क्रियया जनितं समवेक्ष्य विनाशितया तु जगत् । निरविद्यत कश्चिदतो निखिलादविनाशिकृतेन न लभ्यमिति ॥ २ ॥ प्रतिपित्सुरसावविनाशिपदं यतिधर्मरतो यतिमेव गुरुम् । विदितात्मसतत्त्वमुपेत्य कविं प्रणिपत्य निवेदितवान्स्वमतम् ॥ ३ ॥ भगवन्नुदधौ मृतिजन्मजले सुखदुःखझषे पतितं व्यथितम् । कृपया शरणागतमुद्धर मामनुशाध्युपसन्नमनन्यगतिम् ॥ ४ ॥ विनिवर्त्य रतिं विषये विषमां परिमुच्य शरीरनिबद्धमतिम् । परमात्मपदे भव नित्यरतो जहि मोहमयं भ्रममात्ममतेः ॥ ५ ॥ विसृजान्नमयादिषु पञ्चसु तामहमस्मि ममेति मतिं सततम् । दृशिरूपमनन्तमृतं विगुणं हृदयस्थमवेहि सदाहमिति ॥ ६ ॥ जलभेदकृता बहुतेव रवेर्घटिकादिकृता नभसोपि यथा । मतिभेदकृता तु तथा बहुता तव बुद्धिदृशोऽविकृतस्य सदा ॥ ७ ॥ दिनकृत्प्रभया सदृशेन सदा जनचित्तरतं सकलं स्वचिता । विदितं भवताऽविकृतेन सदा यत एवमतोऽसि स एव सदा ॥ ८ ॥ उपरागमपेक्ष्य मतिर्विषयैर्विषयावधृतिं कुरुते तु यतः । तत एव मतेर्विदिता विदिता विषयास्तु ततः परिणामवती ॥ ९ ॥ मतिवृत्तय आत्मचिता विदिताः सततं हि यतोऽविकृतस्तु ततः । यदि चात्मचितिः परिणामवती भवयो विदिता विदिताः स्युरिमाः ॥ १० ॥

चरितं तु धियः सकलं सततं विदितं भवता परिशुद्धचिता । मतिभेदगुणो नहि तेऽस्ति ततो यत एवमतोऽसदृशस्तु धिया ॥ ११ ॥ विदितत्वमविप्रतिपन्नतया मतिषु प्रगतं विषयेषु यथा । यत एवमतः परसंविदिता विदितत्वत एव यथा विषयाः ॥ १२ ॥ परसंविदिताः सततं हि यतो न विदुः स्वममी विषयास्तु ततः । मतयोऽपि तथा परसंविदिता न विदुः स्वममूर्विषयास्तु यथा ॥ १३ ॥ विषयाकृतिसंस्थितिरेकविधा मनसस्तु सदा व्यवहारविधौ । अहमित्यपि तद्विषया त्वऽपरा मतिवृत्तिरवज्वलितात्मचिता ॥ १४ ॥ पुरुषस्य तु धर्मवदुद्भवति स्वरसेन मतेः स्वगुणोपि यतः । अत आत्मगुणं प्रतियन्ति जना मतिवृत्तिमिमामहमित्यबुधाः ॥ १५ ॥ यदि सा न भवेज्जनमोहकरी व्यवहारमिमं न जनोनुभवेत् । विफलश्च तदा विषयानुभवो ज्ञगुणो नहि सेति यदा विदिता ॥ १६ ॥ उपलभ्य घटादिनिभैव भवेन्मनसो यदि संस्थितिरेकविधा । पुरुषस्य चितिश्च न विक्रियते मतिवृत्तिमपेक्ष्य घटादिनिभाम् ॥ १७ ॥ अवगन्त्रवगम्यचिदात्मधियोरहमित्यभिमानविहीनतया । स्थितयोरभिमानपुरःसरकं व्यवहारपथं न जनोऽवतरेत् ॥ १८ ॥ अहमीक्ष इति प्रथमं हि धिया सुविचिन्त्य ततो विषयाभिमुखम् । नयनं प्रहिणोति तथान्यदपि श्रवणादिवियत्प्रमुखस्य गुणे ॥ १९ ॥ अपहाय न कश्चिदहंकरणं व्यवहारमुपैति कदाचिदपि । उपपन्नतरा हि मतेस्तु ततो व्यवहारपथं प्रति कारणता ॥ २० ॥ चितिशक्तिगुणः किमहंकरणं किमु बुद्धिगुणोऽथ भवेदुभयोः । इति चिन्त्यमिदं मनसामलसंरूपपत्तिभिरात्महितं यतिभिः ॥ २१ ॥ उपलभ्यमहंक-

रणं न भवेत्पुरुषस्य गुणो यदि तर्हि भवेत् । गुणिरूपमथावयवं गुणिनो न विहाय गुणः पृथगस्ति यतः ॥ २२ ॥ न गुणो गुणिनि स्थितवान् गुणिना विषयी क्रियते न च तस्य गुणैः । नहि देशकृता नच वस्तुकृता गुणिनोस्ति गुणस्य भिदा तु यतः ॥ २३ ॥ न परस्परमग्निगुणोग्निगतो विषयत्वमुपैति कदाचिदपि । नहि वह्निरपि स्वगुणं स्वगतं विषयीकुरुते स्वगुणेन भुवि ॥ २४ ॥ कणभुग्यमचीक्लृपदात्मगुणं गुणपूगमनित्यमनात्मगुणम् । अनयैव दिशा स निराक्रियतां न हि नित्यमनित्यगुणेन गुणि ॥ २५ ॥ वियतः प्रभवं प्रवदंति यतः श्रुतयो बहुशः खमनित्यमतः । उपमानमनित्यगुणं वियतो न हि नित्यमिहास्ति कणादकृते ॥ २६ ॥ मनसा पुरुषः पुरुषेण मनो नभसा मुसलं मुसलेन नभः । नहि योगवियोगमुपैति कुतोऽवयवित्वनिराकरणादमुतः ॥ २७ ॥ इह रज्जुघटादि हि सावयवं समुपैति युजामितरेतरतः । इति दृष्टमतोन्यददृष्टमपि स्वयमूह्यमिदं न परित्यजता ॥ २८ ॥ न हि सावयवं विगतावयवैर्विगतावयवं च न सावयवैः । उपयाति युजामिति दृष्टमिदं यत एवमतः स्थितमुक्तमदः ॥ २९ ॥ न हि कल्पितभागसमागमनं विगतावयवस्य घटेत कुतः । वितथत्वमतिः सुदृढा तु यतः परिकल्पितवस्तुषु नित्यमतः ॥ ३० ॥ इह वेदशिरस्सु तदर्थविदः प्रवदन्ति समस्तजगत्प्रकृतिम् । परमात्मपदं दृशि मात्रवपुर्ध्रुवमेकमतोन्यदनित्यमिति ॥ ३१ ॥ अत एव न किंचिदुदाहरणं ध्रुवमस्ति परस्य विनाशिगुणम् । यत एवमतः स्थितमुक्तमदो न हि नित्यमनित्यगुणेन गुणि ॥ ३२ ॥ उपलभ्यमहं करणं भवितुं क्षमते दृशिरूपगुणो न यतः । विप-

याकृतिरंजितधीगुणवद्विषयत्वमहं करणस्य ततः ॥ ३३ ॥ विषयप्रकृतिं प्रतिपन्नवर्तीं मतिवृत्तिमहंकरणं च मतेः । उभयं परिपश्यति योऽविकृतः परमात्मसदुक्तिरसौ पुरुषः ॥ ३४ ॥ ननु देहभृदेष कथं भवताऽभिहितः परमात्मसदुक्तिरिति । न विरुद्धमवादिषमेतमहं श्रुतिरप्यमुमर्थमुवाच यतः ॥ ३५ ॥ अमतं न मतेरमतस्तदिदं यदमुत्र तदेव तु कश्चिदिति । श्रुतिषु प्रतिपादितमस्य दृशेः परमात्मपदत्वममूषु भृशम् ॥ ३६ ॥ यदनभ्युदितं वदनेन सदा नयने नच पश्यति यन्न सदा । श्रवणेन च यन्न शृणोति सदा मनसापि च यन्मनुते न सदा ॥ ३७ ॥ वदनं नयनं च तथा श्रवणं मन एव च येन मतं सततम् । अवगच्छ तदेव पदं परमं त्वमिति श्रुतिरीक्षितुरुक्तवती ॥ ३८ ॥ परमात्मपदत्व इयं च मया श्रुतिरल्पकणोक्तिरिहाभिहिता । अणिमादिगुणं सदिति प्रकृतं तदसि त्वमिति श्रुतिरभ्यवदत् ॥ ३९ ॥ नभसोवयवो विकृतिश्च यथा घटिकादि नभो न भवेत्तु तथा । परमात्मन एष न चावयवो विकृतिश्च शरीरभृदित्यमृषा ॥ ४० ॥ करकादिनिमित्तकमेव यथा करकाम्बरनाम भवेद्वियतः । परमात्मदृशोरपि नाम तथा पुरहेतुकमेव तु जीव इति ॥ ४१ ॥ जनितं वियदग्रणि येन जगत्परमात्मसदक्षरनामभृता । प्रविवेश स एव जगत्स्वकृतं रविमिवेह घटं घटसृष्टिमनु ॥ ४२ ॥ उदपद्यत खप्रमुखं हि जगत्परमात्मन इत्यपि याः श्रुतयः । अवधार्यत आभिरभेदमतिः परमात्मसतत्त्वसमर्पणतः ॥ ४३ ॥ यदि सृष्टिविधानपरं वचनं फलशून्यमनर्थकमेव भवेत् । जगदित्थमजायत धातुरिति श्रवणं पुरुषस्य फलाय नहि ॥ ४४ ॥ अनृतत्वमवाप्यसकृद्विकृतेर्नि-

रधारि सदेव तु सत्यमिति। श्रुतिभिर्बहुधैतदतोऽवगतं जगतो नहि जन्मविधेयमिति ॥ ४५ ॥ न च तत्त्वमसीत्यसकृद्वचनं जगतो जनिमात्रविधौ घटते । परमात्मपदानुमतिं तु यदा जनयेत्पुरुषस्य तदा घटते ॥ ४६ ॥ स्थिरजंगमदेहधियां चरितं परिपश्यति योऽविकृतः पुरुषः। परमात्मसदुक्तिरसाविति यत्फणितं तदधिष्ठितमित्थमहम् ॥ ४७ ॥ पृथगेव यदाक्षरतो मतिविघ्नकरोदकवन्न घटाम्बरवत्। निवरोत्स्यति तत्त्वमसीति तदा वचनं कथमेष त इत्यपि च ॥ ४८ ॥ ननु वस्तु सतत्त्वविबोधनकृद्धिनिवर्तयदप्रतिबोधमिदम् । सदुपासनकर्मविधानपरं यत एव मतो न विरोत्स्यति मे ॥ ४९ ॥ मनआदिषु कारणदृष्टिविधिः प्रतिमासु च देवधियां करणम्। स्वमतिमनपोह्य यथा तु तथा त्वमसीह सदात्ममतिर्वचनात् ॥ ५० ॥ अथवा त्वमिति ध्वनिवाच्यमिदं सदसीति वदेद्वचनं गुणतः। विभयं पुरुषं प्रवदन्ति यथा मृगराडयमीश्वरगुप्त इति ॥ ५१ ॥ यदि वा स्तुतये सदसीति वदेन्मघवानसि विष्णुरसीति यथा। त्वमितिश्रुतिवाच्यसतत्त्वकतामथवा सत एव वदेद्वचनम् ॥५२॥ यदि तत्त्वमिति ध्वनिनाभिहितः परमात्मसतत्त्वक एव सदा। किमिति स्वकमेष न रूपमवेत्प्रतिबोध्यत एव यतो वचनैः ॥ ५३ ॥ अतएव हि जीवसदात्मकतां नहि तत्त्वमसीति वदेद्वचनम्। यदपीदृशमन्यदतो वचनं तदपि प्रथयेदनयैव दिशा ॥ ५४ ॥ सदुदाहृतवाक्यविलक्षणता वचनस्य हि तत्त्वमसीति यतः । अतएव न दृष्टिविधानपरं सत एव सदात्मकवागमकम् ॥ ५५ ॥ इति शब्दशिरस्कपदोक्तमतिर्विहिता मनआदिषु तैर्वचनैः। न विधानमिहास्ति तथा वचने सुविलक्ष-

णमेतदतो वचनात् ॥ ५६ ॥ मनसो वियतः सवितृप्रभृतेः प्रवदन्ति यतोऽक्षरदृष्टियुतम् ॥ ५७ ॥ करको न मृदः पृथगस्ति यथा मनआदिसतोस्ति तथा न पृथक् । इति वस्तुसतत्त्वकता तु यदा विधिशब्द इतिश्च तदा तु वृथा ॥ ५८ ॥ मनआदिसमानविभक्तितया विधिशब्दमितिं च विहाय यदि । जनकेन सता सहयोगमियादनृतं तदिति स्फुटमुक्तमभूत् ॥५९॥ ननु जीवसतोरपि तत्त्वमिति स्फुटमेकविभक्त्यभिधानमिदम् । कथमस्य शरीरभृतोऽनृतता न भवेदविभक्तविभक्तियुजः॥६०॥ प्रकृतेरभिधानपदेन यथा विकृतेरभिधानमुपैति युजाम् । अनृतत्वमतिस्तु तदा विकृतौ मृदयं घट इत्यभिधासु यथा ॥ ६१ ॥ विकृतित्वमवादि मनःप्रभृतेर्बहुशः श्रुतिषु प्रकृतेस्तु सतः । अत एव समानविभक्तितया मनआदि सुवेद्यमसत्यमिति ॥ ६२ ॥ जनितत्वमवादि नहि श्रुतिभिर्जनकेन सतास्य शरीरभृतः । मनआदिविकारविलक्षणतां प्रतियन्ति शरीरभृतस्तु ततः ॥ ६३ ॥ यदजीजनदम्बरपूर्वमिदं जगदक्षरमीक्षणविग्रहकम् । प्रविवेश तदेव जगत्सकृतं स च जीवसमाख्य इति श्रुतयः ॥ ६४ ॥ परमात्मविकारविभक्तमतिर्न भवत्यत एव शरीरभृतः । यत एव विकारविभिन्नमतिर्न भवत्यत एव मृषात्वमतिः ॥ ६५ ॥ अविभक्तविभक्त्यभिधानकृता परमात्मपदेन शरीरभृतः । न भवेदिह तत्त्वमसिप्रभृतौ लवणं जलमित्यभिधासु यथा ॥ ६६ ॥ परमात्मविकारनिराकरणं कृतमस्य शरीरभृतस्तु यतः । परमेश्वररूपविलक्षणता न मनागपि देहभृतोस्ति ततः ॥ ६७ ॥ ननु जीवसतोरणुमात्रमपि स्वगतं न विशेषणमस्ति यदा । वद तत्त्वमसीति तदा वचनं किमु वक्ति तथा यत

इत्यपि च ॥ ६८ ॥ स्वगतं यदि भेदकमिष्टमभूदणुमात्रमपीश्वरदेहभृतोः । अपनेतुमशक्यमदोवचनैरमुनास्य पृथक्त्वनिषेधपरैः ॥ ६९ ॥ इह यस्य च यो गुण आत्मगतः स्वत एव न जातु भवेत्परतः । वचनेन न तस्य निराकरणं क्रियते स गुणः सहजस्तु यतः ॥ ७० ॥ वचनं त्ववबोधकमेव यतस्तत एव न वस्तुविपर्ययकृत् । न हि वस्त्वपि शब्दवशात्प्रकृतिं प्रजहात्यनवस्थितिदोषभयात् ॥ ७१ ॥ यत एवमतो विपयस्य गुणं विपयेण सहात्मनि मूढधिया । अधिरोपितमप्स्विव भूमिगुणं प्रतिपेधति तत्त्वमसीति वचः ॥ ७२ ॥ अत एव न दृष्टिविधानपरं गुणवादपरं च न तद्वचनम् । स्तुतिवाद्यपि नैतदुपास्यतया विधिरत्र न देहभृतोस्ति यतः ॥ ७३ ॥ सत एव हि नाम जगत्प्रकृतेरुपधानवशादिह जीव इति । अतएव न जीवसतत्त्वकर्ता प्रकृतस्य सतः प्रतिपादयति ॥ ७४ ॥ यदि जीवसतत्त्वकर्ता गमयेदणिमादिगुणस्य जगत्प्रकृतेः । अणिमादिगुणोक्तिरतोऽस्य मृषा यदि वास्य शरीरभृदात्मकता ॥ ७५ ॥ न च संसृतिहेतुनिराकरणं कृतमस्य शरीरभृतोभिमतम् । परमेश्वरमात्मतया ब्रुवता वचनेन च तत्त्वमसीत्यमुना ॥ ७६ ॥ त्वमसीति पदद्वयमेति युजां तदिति ध्वनिना सह तत्त्वमिति । क्रियया सह नाम पदं समियान्निरपेक्ष्यमुपैत्यनया हि युजाम् ॥ ७७ ॥ न हि नामसहस्रमपि क्रियया रहितं किमपि प्रतिपादयति । प्रतिपादकमेषु लिङ्गादि भवेद्विहितादिमतेर्जनकं हि यतः ॥ ७८ ॥ भगवानपि मध्यममेव यतो विनियच्छति युष्मदि नित्यमतः । प्रथमं त्वमसीति पदे समितश्चरमं त्वसिना समियात्तदिति ॥ ७९ ॥ पुरुषोभिहितस्त्वमसीति यदा कि-

ममानि वदेति तदाभिमुखः । श्रवणाय भवेदणिमादिगुणं सदिति प्रकृतं तदसीति वदेत् ॥ ८० ॥ त्वमिति ध्वनिनाभिहितस्य यतस्तदिति श्रुतिवाच्यसदात्मकताम् । अवदद्वचनं तत एव सतो नहि जीवसतत्त्वकतां वदति ॥ ८१ ॥ विषयाभिमुखानि शरीरभृतः स्वरमेन सदा करणानि यतः । स्वकमेव न रूपमवैति ततः प्रतिबोध्यत एव ततो वचनैः ॥ ८२ ॥ वचनं च परांचि पुरःसरकं बहुवैदिकमत्र तथा स्मरणम् । विषयेषु च नावमिवांभसि यन्मनसेंद्रियरश्मिविनिग्रहवत् ॥ ८३ ॥ इयता हि न देहभृतोस्ति भिदा परमात्मदशोरिति वाच्यमिदम् । स्थितिकाल इहापि च सृष्टिमुखे सदनन्यतया श्रुत एव यतः ॥ ८४ ॥ द्वयमप्यविरोधि शरीरभृतो वचनीयमिदं रघुनंदनवत् । उपदेशमपेक्ष्य सदात्ममतिः परमात्मगतत्त्वकता च सदा ॥ ८५ ॥ सदुपासनमस्य विधेयतया वचनस्य मम प्रतिभाति यतः । अत एव न जीवसदात्मकतां प्रतिबोधयतीत्यवदत्तदसत् ॥ ८६ ॥ सदुपास्य इति श्रुतिरत्र न ते तदसि त्वमिति श्रुतिरेवमियम् । यत एव मतो न विधिस्तिनता सदुपासनकर्मण इत्यमृषा ॥ ८७ ॥ यदि तस्य कृतश्चिदिहानयनं क्रियते तदनर्थकमेव भवेत् । पुरुषेण कृतस्य यतः श्रुतिता न भवेदिति वेदविदां स्मरणम् ॥ ८८ ॥ किमरे पुरुषं प्रतिबोधयितुं स्वकमर्थमशक्तमिदं वचनम् । यदतोन्यत आनयनं क्रियते भवता श्रवणेन विनापि विधेः ॥ ८९ ॥ श्रुतहानिरिहाश्रुतकल्पनमित्यपि श्रुतिनिन्दमयो न भवेत्तु यतः । श्रुतिभक्तिमता श्रुतिवल्कगतं प्रणयमनो न तु बुद्धिवशात् ॥ ९० ॥ पुरुषस्य शरीरगतात्ममतिं भृतिसंसरहेतुमनर्थकरीम् । अपनीय सदात्ममतिं दधती महते पुरुषस्य हिताय

भवेत् ॥ ९१ ॥ विनिवर्त्तत एव शरीरगता विपरीतमतिः पुरुषस्य तदा । वचनेन तु तत्त्वमसीति यदा प्रतिबोध्यत एष त इत्यपि च ॥ ९२ ॥ यदि नापनयेच्छ्रुतिरात्ममतिं पुरुषस्य शरीरगतामनृताम् । तदहंमतिहेतुककर्मगतिं सुखदुःखफलामवशोऽनुभवेत् ॥ ९३ ॥ यदि तत्त्वमसीति वदेद्वचनं सदुपासनकर्म न तत्त्वमिति । पुरुषस्य फलं सदुपासनतो विमृशामि भविष्यति कीदृगिति ॥ ९४ ॥ पुरुषस्य तु मर्त्यगुणस्य भवेत्सदुपासनया न सदात्मकता । न कथंचिदपि प्रजहाति यतः प्रकृतिं सहजामिह कश्चिदपि ॥ ९५ ॥ यदि देहभृदेष सदात्मकतां प्रगमिष्यति वै सदुपासनया । न जहास्यति रूपमसौ हि निजं यत ऐक्यमतिर्न भवत्युभयोः ॥ ९६ ॥ रसविद्धमयः प्रकृतिं सहजां प्रविहाय यथा कनकत्वमियात् । पुरुषोऽपि तथा सदुपासनया प्रतिपत्स्यत एव सदात्मकताम् ॥ ९७ ॥ अयसोऽवयवानभिभूय रसः स्थितवाननलानुगृहीतिमनु । कनकत्वमतिं जनयत्ययसि प्रतिपन्नमयो न तु कांचनताम् ॥ ९८ ॥ उदकावयवानभिभूय पयो रजतावयवांश्च यथा कनकम् । विपरीतमतिं जनयत्युदके रजते च तथायसि हेममतिम् ॥ ९९ ॥ रसवीर्यविपाकविनाशमनु प्रविनश्यति कांचनताप्ययसः । कृतकं हि न नित्यमिति प्रगतं समवेतमवश्यमपैति यतः ॥ १०० ॥ अमृतत्वमसत्पुरुषस्य यदि क्रियते सदुपासनया यजिवत् । यजिकार्यवदन्तवदेव भवेत्कृतकस्य यतो विदितांऽध्रुवता ॥ १ ॥ पुरुषस्य सतश्च विधर्मकयोः सदुपासनया न भवेत्समितिः । यदि संगतिरिष्यत एव तयोरवियुक्ततया न चिरं वसतः ॥२॥ फलमीदृगिदं सदुपासनतः पुरुषस्य भविष्यति नान्यदतः । न

च तन्निरवद्यतयाभिमतं विदुषां बहुदोषसमीक्षणतः ॥ ३ ॥ सदुपासनकर्मविधानपरं न भवेदत एव हि तद्वचनम् । अहमस्मि शरीरमिदं च ममेत्यविवेकमतिं विनिवर्त्तयति ॥ ४ ॥ सकलोपनिषत्सु शरीरभृतः परमात्मपदैकविभक्तितया । उपदेशवचांस्यनयैव दिशा गमयेन्मतिमानभियुक्ततया ॥ ५ ॥ द्रविडोपि च तत्त्वमसीति वचो विनिवर्त्तकमेव निरूपितवान् । शबरेण विवर्द्धितराजशिशोर्निजजन्मविदुक्तिनिदर्शनतः ॥ ६ ॥ यत एवमतः स्वशरीरगतामहमित्यविवेकमतिं सुदृढाम् । प्रविहाय यदक्षरमद्वयकं समवेहि तदक्षरमात्मतया ॥ ७ ॥ न मनो न मतिः करणानि च नो न रजो न तमो न च सत्त्वमपि । न मही न जलं न च वह्निरपि श्वसनो न नभश्च पदं परमम् ॥ ८ ॥ अमनस्कमधीकमनिन्द्रियकं विरजस्कमसत्त्वतमस्कमपि । अमहीजलवह्न्यनिलाम्बरकं परमक्षरमात्मतयाश्रय भोः ॥९॥ करणानि हि यद्विषयाभिमुखं प्रगमय्य मतिर्विषयेषु चरेत् । तदु जागरितं प्रवदन्ति बुधा न तदास्ति ममेत्यवगच्छ दृशेः ॥ १० ॥ करणानि यदोपरतानि तदा विषयानुभवाहितवासनया । विषयेण विना विषयप्रतिमं स्फुरणं स्वपनं प्रवदन्ति बुधाः ॥ ११ ॥ करणस्य धियः स्फुरणेन विना विषयाकृतिकेन तु या स्थितता । प्रवदन्ति सुषुप्तिममुं हि बुधा विनिवृत्ततृषः श्रुतितत्त्वविदः ॥ १२ ॥ इति जागरितं स्वपनं च धियः क्रमतोऽक्रमतश्च सुषुप्तिरपि । न कदाचिदपि त्रयमस्ति ममेत्यवगच्छ सदासि तुरीयमिति ॥ १३ ॥ यदुजागरितप्रभृतित्रितयं परिकल्पितमात्मनि मूढधिया । अभिधानमिदं तदपेक्ष्य भवेत्परमात्मपदस्य तुरीयमिति ॥१४॥ तदसत्यमसत्यगुणश्च ततः

परिनिर्मितवारणचेष्टितवत् ॥ १५ ॥ गगनप्रमुखं पृथिवीचरमं विषयेन्द्रियबुद्धिमनःसहितम् । जनिमज्जगदेतदभूतमिति श्रुतयः प्रवदंत्युपमानशतैः ॥ १६ ॥ कफपित्तसमीरणधातुधृतं कुशरीरमिदं सततं हि यथा । प्रभवप्रभृतिप्रलयान्तमिदं जगदग्निरवीन्दुधृतं हि तथा ॥ १७ ॥ जगतः स्थितिकारणमित्थमिदं प्रथितं रविवह्निशशित्रितयम् । स्मृतिवेदजनेषु भृशं प्रथितं श्रुतिरीरितवत्यनृतं तदिति ॥ १८ ॥ यदु रोहितशुक्लसुकृष्णमिदं ज्वलनादिषु रूपमवैति जनः । तदु तैजसमाप्यमथान्नमिति ब्रुवती त्रयमेव तु सत्यमिति ॥ १९ ॥ रुचकप्रमुखं कनकादिमयं रुचकाद्यभिधाननिमित्तमपि । असदित्यवगम्यत एव यतो व्यभिचारवती रुचकादिमतिः ॥ २० ॥ न कदाचिदपि व्यभिचारवती कनकादिमतिः पुरुषस्य यतः । तत एव हि सत्यतयाभिमतं कनकादिविपर्यय एषु नहि ॥ २१ ॥ रुचकादिसमं ज्वलनादि भवेदनृतत्वगुणे न तु सत्यतया । अरुणप्रमुखं ज्वलनप्रभृति प्रकृतित्रितयं कनकादिसमम् ॥२२॥ अनयोपमयानृततामवदच्छ्रुतिरग्निदिवाकरचन्द्रमसाम् । अमृषात्वमपि श्रुतिरुक्तवती त्रितयस्य तु रक्तपुरस्सरिणः ॥ २३ ॥ अनृतत्वमिदं ज्वलनप्रभृतेर्यदवादि भवेत्तदुदाहरणम् । वितथा विकृतिः सततं सकला न तथा प्रकृतिः श्रुतिनिश्चयतः ॥ २४॥ प्रदिदर्शयिषुर्वसनस्य यथा वितथत्वमपास्यति तन्तुगुणम् । अपकृष्य तु तन्तुसमं त्रितयं ज्वलनप्रमुखस्य तथोक्तवती ॥२५॥ अवनिप्रमुखं वियदंतमिदं विकृतिस्तु परस्य भवत्यपरम् । अनृतं त्वपरं विकृतिस्तु यतोऽवितथं तु परं प्रकृतिस्तु यतः ॥ २६ ॥ अत एतदसेधि सदुक्तिपरं न मृषेति मृषा तु ततोन्यदिति । इति

सिद्धमतो यदवादि मया जनिमज्जगदेतदभूतमिति ॥ २७ ॥ मनसोप्यनृतत्वमसेध्यमुतः प्रतिपादितहेतुत एव भवेत् । चरितं च तदीयमसत्यमतः परिनिर्मितवारणचेष्टितवत् ॥ २८ ॥ ननु नाभ्यवदच्छ्रुतिरुद्भवनं मनसस्तु सतो न च खप्रमुखात् । कथमस्य भवेदनृतत्वगतिर्मनसो भगवन्वद निश्चयतः ॥ २९ ॥ ननु सप्तम आतमन उद्भवनं मनसोभिदधावसुनापि सह । कथमस्य भवेदमृपात्वगतिर्मनसोविकृतित्वगुणस्य वद ॥ ३० ॥ असुना करणैर्गगनप्रमुखैः सह मुण्डक उद्भवनं मनसः । पुरुपात्परमात्मन उक्तमतो वितथं मन इत्यवधारय भोः ॥ ३१ ॥ मनसोन्नमयत्वमवादि यतस्तत एव हि भूतमयत्वगतिः । कुशरीरवदेव ततोपि भृशं वितथं मन इत्यवधारय भोः ॥ ३२ ॥ कुरु पक्षमिमं गगनप्रमुखं जनिमत्सकलं न हि सत्यमिति । प्रथमं चरमं च न चास्ति यतो रुचकादिवदित्युपमां च वद ॥ ३३ ॥ कनके रुचकादि न पूर्वमभूच्चरमं च न विद्यत इत्यनृतम् । अधुनापि तथैव समस्तमिदं जनिमद्वियदादि भवेदनृतत् ॥ ३४ ॥ कनकादिषु यद्युपजातमभूद्रुचकप्रमुखं पृथगेव ततः । अधिकं परिमाणममीषु कुतो न भवेदिति वाच्यमवश्यमिदम् ॥ ३५ ॥ कनकप्रभृतेर्व्यतिरिक्तमतो रुचकादि न विद्यत एव कुतः । पृथगग्रहणात्कनकप्रभृतेरिति कारणमेव सदन्यदसत् ॥ ३६ ॥ ननु नाम पृथग्विकृतेः प्रकृतेरथ रूपमथापि च कार्यमतः । कथमव्यतिरिक्ततयावगमः प्रकृतेर्विकृतेरिति वाच्यमिदम् ॥ ३७ ॥ इह वीरणतन्तुसुवर्णमृदः कटशाटकहार-घटाकृतयः । उपलब्धजनैरुपलब्धमतो न भिदास्ति ततः प्रकृतेर्विकृतेः ॥ ३८ ॥ विकृतिर्यदि नास्ति पृथक्प्रकृतेर्न घटेत

भिदाप्यभिदा प्रकृतेः । इति धीर्विफला तव येन जनैर्विविदे न यनेन मृदाद्यभिदा ॥ ३९ ॥ ननु रूपमथो अपि कार्यमथो अभिधापि नटस्य पृथग्विदिता । न पृथक्त्वमुपैति नटः किमिति प्रतिवाच्यमवश्यमिदं कुशलैः ॥ ४० ॥ असतो न कथंचन जन्म भवेत्तदसत्त्वत एव खपुष्पमिव । न सतोऽस्ति भवः पुरतोपि भवाद्यत आत्मवदेव सदिष्टमिति ॥ ४१ ॥ कपिलासुरिपंचशिखादिमतं परिगृह्य वदेद्यदि कश्चिदिदम् । न कदाचन जन्म वदामि सतः प्रवदामि तु यच्छृणु तत्त्वमपि ॥ ४२ ॥ प्रकृतावविशिष्टतया यदभूदधुना तु तदेव विशेषयुतम् । निरवद्यमिदं प्रतिभाति मम प्रवदात्र विरोधमवैपि यदि ॥ ४३ ॥ सदयुज्यत येन गुणेन पुरा प्रकृतौ स इहास्ति न वेति वद । यदि विद्यत एव पुरा प्रकृतावधुनापि विशेषयुतत्वमसत् ॥४४॥ यदि नास्ति पुरा स गुणः प्रकृतावसदुद्भवनं भवतोभिमतम् । जननेन च सत्त्वमुपात्तवतो जनिमत्त्वत एव विनष्टिरपि ॥४५॥ भवतोभिमतं परिहर्तुमिदं न कथंचन शक्यत इत्यमुतः । कणभक्षमतेन समत्वमिदं भवतोभिमतं शनकैरगमत् ॥ ४६ ॥ असतो भवनं नशनं च सतः कणभोजिमतं विदितं कविभिः । उपपत्तिविरुद्धतया सुभृशं तदभाणि मयापि विरुद्धतया ॥४७॥ प्रतिषिद्धमिदं कणभोजिमतं हरिणापि समस्तगुरोर्गुरुणा । वचनेन तु नासत इत्यमुना ब्रुवता च पृथातनयाय हितम् ॥४८॥ असतश्च सतश्च न जन्म भवेदिति पूर्वमवाद्युपपत्तियुतम् । सदसच्च न जायत एव कुतो न हि वस्तु तथाविधमस्ति यतः ॥ ४९ ॥ सदसत्त्वमतीत्य मनःप्रभृतेर्न कथंचन वृत्तिरिहास्ति यतः । तत एव मनःप्रमुखस्य भवो न भवेदिति सर्वसुवेद्यमिति

॥ ५० ॥ यदि नाम कथंचिदमुष्य मनः सदसत्त्वमपेक्ष्य भविष्यति वः । अमृषात्वममुष्य तथापि न तु श्रुतिरस्य मृषात्वमुवाच यतः ॥ ५१ ॥ मनमोनृततत्त्वमनादि यतस्तत एव हि तस्य मृषा चरितम् । यत एव मृषा मनमश्चरितं तत एव पुरोदितसिद्धिरभूत् ॥ ५२ ॥ यदपेक्ष्य तु नाम भवेत्रितयं परमात्मपदस्य तुरीयमिति । तदसत्यमसत्यगुणस्तु यतः परिनिमितसर्पविसर्पणवत् ॥ ५३ ॥ निखिलस्य मनःप्रमुखस्य यतो वितथत्वमवादि पुरा तु मया । श्रुतियुक्तिबलेन ततोऽद्वयकं परमक्षरमेव सदन्यदसत् ॥ ५४ ॥ यदपूर्वमबाह्यमनन्तरकं न च किंचन तस्य भवत्यपरम् । इति वेदवचोनुशशास यतो वितथं परतोन्यदतः प्रगतम् ॥ ५५ ॥ प्रतिषिध्य यतो बहिरन्तरपि स्वविलक्षणमात्मन उक्तवती । अवबोधघनत्वमतोन्यदसल्लवणैकरसत्वनिदर्शनतः ॥ ५६ ॥ लवणैकरसत्वसमं फणितं स्वविलक्षणवस्तुनिषेधनतः । अवबोधघनं परमात्मपदं त्वमवेहि तदस्मि सदाहमिति ॥ ५७ ॥ अणुनो न च तद्विपरीतगुणो न च ह्रस्वमतो न च दीर्घमपि । प्रतिषिद्धसमस्तविशेषणकं परमक्षरमात्मतयाश्रय भोः ॥ ५८ ॥ असुबुद्धिशरीरगुणान् पडिमानविवेकिजनैर्दृशि धर्मतया । प्रतिपन्नतमान्प्रविहाय शनैर्दृशिमात्रमवेहि सदाहमिति ॥ ५९ ॥ अहिनिर्ल्वयनीमहिरात्मतया जगृहे परिमोक्षणतस्तु पुरा । परिमुच्य तु तामुरगः स्वनिले न पुनः समवेक्षत आत्मतया ॥ ६० ॥ अविवेकत आत्मतया विदित शुशरीरमिदं भवताप्यहिवत् । अहिवत्त्यज देहमिमं त्वमपि प्रतिपद्य चिदात्मकमात्मतया ॥ ६१ ॥ रजनीदिवसौ न रवेर्भवतः प्रभया सततं युत एष यतः । अविवेकविवेकगुणावपि

तौ भवतो न रवेरिव नित्यदृशेः ॥ ६२ ॥ परिशुद्धविबुद्धविमुक्तदृशेरविवेकविवेकविवर्जनतः । मम बन्धविमोक्षगुणौ भवतो न कदाचिदपीत्यवगच्छ भृशम् ॥६३॥ न मम ग्रहणोज्झनमस्ति मया न परेण दृशेरिति निश्चिनु भोः । न हि कस्यचिदात्मनि कर्म भवेन्न च कश्चिदिहास्ति मदन्य इति ॥ ६४ ॥ अहमस्मि चरस्थिरदेहधियां चरितस्य सदेक्षक एक इति । न भवेदत एव मदन्य इति त्वमवेहि सुमेध इदं सुदृढम् ॥ ६५ ॥ गगने विमले जलदादिमले सति वाऽसति वा न भिदास्ति यथा । त्वयि सर्वगते परिशुद्धदृशौ न भिदास्ति तथा द्वयभेदकृता ॥ ६६ ॥ अनृतं द्वयमित्यवदाम पुरा व्यवहारमपेक्ष्य तु गीतमिदम् । अनृतेन न सत्यमुपैति युजां न मरीचिजलेन नदी ह्रदिनी ॥ ६७ ॥ बहुनाभिहितेन किमु क्रियते शृणु संग्रहमत्र वदामि तव । त्वयि जागरितप्रभृतित्रितयं परिकल्पितमित्यसदेव सदा ॥ ६८ ॥ परिकल्पितमित्यसदित्युदितं मन इत्यभिशब्दितमागमतः । उपपत्तिभिरेव च सिद्धमतो भवतोन्यदशेषमभूतमिति ॥ ६९ ॥ यदबाह्यमनन्तरमेकरसं यदकार्यमकारणमद्वयकम् । यदशेषविशेषविहीनतरं दृशिरूपमनन्तमृतं तदसि ॥ ७० ॥ इयदेव मयोपनिपत्सु पदं परमं विदितं न ततोस्त्यधिकम् । इति पिप्पलभक्ष इवाभ्यवदद्दवशिष्टमतिं विनिवारयितुम् ॥७१॥ इतरोपि गुरुं प्रणिपत्य जगौ भगवन्निति तारितवानसि माम् । अवबोधतरेण समुद्रमिमं मृतिजन्मजलं सुखदुःखझषम् ॥७२॥ अधुनास्मि सुनिर्वृत आत्मरतिः कृतकृत्य उपेक्षक एकमनाः । प्रहसन्विषयान्मृगतोयसमान्विचरामि महीं भवता सहितः ॥ ७३ ॥ तव दासमहं भृशमामरणात्प्रतिपद्यशरीरधृतिं भग-

वन् । कर्माणि मया शकनीयमिदं तव कर्तुमतोन्यदशक्यमिति ॥ ७४ ॥ गुरुशिष्यकथाश्रवणेन मया श्रुतिवस्तुतिसारसमुद्धरणम् । कृतमित्थमवैति य एतदसौ न पतत्युदधौ मृतिजन्मजले ॥ ७५ ॥ भगवद्भिरिदं गुरुभक्तियुतैः पठितव्यमपाठ्यमतोन्यजनैः । गुरुभक्तिमतः श्रुति भाति यतो गुरुणोत्तमतोन्यो न भजेन्न पठेत् ॥ ७६ ॥ निगमोपि च यस्य इति प्रभृति गुरुभक्तिमतः कथितं गुरुणा । प्रतिभाति महात्मन इत्यद-त्पठितव्यमतो गुरुभक्तियुतैः ॥ ७७ ॥ येषां धीमूर्यदीप्त्या प्रतिहतमगमत्प्राग्भवान्ततो मे ध्वान्तं स्थानस्य हेतुर्जननमरणसंतानदोलाधिरूढेः । येषां पादौ प्रपन्नाः श्रुतिशमपिनयैर्भूषिताः शिष्यसंघाः सद्यो मुक्ताः स्थितास्तान्यतिवरमतिनान्पावनापुर्नमामि ॥ ७८ ॥ भूः पादौ यस्य खं योऽदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः । अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ ७९ ॥ इति श्रीतोटकाचार्यविरचितं श्रुतिसारसमुद्धरणं समाप्तम् ॥ २४ ॥

योगतारावली ॥ २५ ॥

वन्दे गुरूणां चरणारविन्दे सन्दर्शितस्वात्मसुखावबोधे ।
निःश्रेयसे जाङ्गलिकायमाने संसारहालाहलमोहशान्त्यै ॥ १ ॥
सदाशिवोक्तानि सपादलक्षलयावधानानि वसन्ति लोके ।
नादानुसन्धानसमाधिमेकं मन्यामहे मान्यतमं लयानाम् ॥ २ ॥
सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाडीषु विशोधितासु । अ-

नाहतादम्बुरुहादुदेति स्वात्मावगम्यः स्वयमेव बोधः ॥ ३ ॥
नादानुसन्धान नमोऽस्तु तुभ्यं त्वां मन्महे तत्त्वपदं लयानाम् ।
भवत्प्रसादात् पवनेन साकं विलीयते विष्णुपदे मनो मे ॥४॥
जालन्धरोड्डीयनमूलबन्धान् जल्पन्ति कण्ठोदरपायुमूले । बन्ध-
त्रयेऽस्मिन् परिचीयमाने बन्धः कुतो दारुणकालपाशैः ॥ ५ ॥
उड्याणजालन्धरमूलबन्धैरुन्निद्रितायामुरगाङ्गनायाम् ॥ प्रत्य-
ङ्मुखत्वात् प्रविशन् सुषुम्नां गमागमौ मुञ्चति गन्धवाहः ॥ ६ ॥
उत्थापिताधारहुताशनोल्कैराकुञ्चनैः शश्वदपानवायौ । सम्प्रा-
पिते चन्द्रमसः स्रवन्तीं पीयूषधारां पिबतीह धन्यः ॥ ७ ॥
बन्धत्रयाभ्यासविपाकजातां विवर्जितां रेचकपूरकाभ्याम् ।
विशोधयन्तीं विषयप्रवाहां विद्यां भजे केवलकुम्भरूपाम् ॥८॥
अनाहते चेतसि सावधानैरभ्याससूरैरनुभूयमानाः । संस्तम्भि-
तश्वासमनःप्रचारा सा जृम्भते केवलकुम्भकश्रीः ॥ ९ ॥
सहस्रशः सन्ति हठेषु कुम्भाः सम्भाव्यते केवलकुम्भ एव ।
कुम्भोत्तमे यत्र तु रेचपूरैः प्राणस्य न प्राकृतवैकृताख्यैः ॥१०॥
त्रिकूटनाम्नि तिमिरेऽन्तरे खे स्तम्भिते केवलकुम्भ एव ।
प्राणानिलो भानुशशाङ्कनाड्यौ विहाय सद्यो विलयं प्रयाति
॥ ११ ॥ प्रत्याहृतः केवलकुम्भकेन प्रबुद्धकुण्डल्युपभुक्तशेषः ।
प्राणः प्रतीचीनपथेषु मन्दं विलीयते विष्णुपदे मनो मे
॥ १२ ॥ निरङ्कुशानां श्वसनोद्गमानां निरोधनैः केवलकुम्भ-
काख्यैः । उदेति सर्वेन्द्रियवृत्तिशून्यो मरुल्लयः कोऽपि महाम-
तीनाम् ॥ १३ ॥ न दृष्टिलक्ष्याणि न चित्तबन्धो न देशकालौ
न च वायुरोधः । न धारणाध्यानपरिश्रमो वा समेधमाने
सति राजयोगे ॥ १४ ॥ अशेषदृश्योज्झितदृग्जयानामवस्थि-

तानामिह राजयोगे। न जागरो नास्ति सुषुप्तिभावो न जीवितं नो मरणं न चित्तम् ॥ १५ ॥ अहं ममत्वादि विहाय सर्वं श्रीराजयोगे स्थिरमानसानाम्। न द्रष्टिता नास्ति च दृश्यभावः सा जृम्भते केवलसंविदेव ॥ १६ ॥ नेत्रे यथोन्मेषनिमेषशून्ये वायुर्यथा वर्जितरेचपूरः। मनश्च सङ्कल्पविकल्पशून्यं मनोन्मनी सा मयि सन्निधत्ताम् ॥ १७ ॥ चित्तेन्द्रियाणां चिरनिग्रहेण श्वासप्रवाहे शमिते समस्ते। निवातदीपायितनिश्चलाङ्गी मनोन्मनीपा मयि सन्निधत्ताम् ॥ १८ ॥ उन्मन्यवस्थाधिगमाय विद्वन्नुपायमेकं तव निर्दिशामः। पश्यन्नुदासीनदृशा प्रपञ्चं संकल्पमून्मूलय सावधानः ॥ १९ ॥ प्रसह्य संकल्पपरम्पराणां संछेदने सन्ततसावधानः। आलम्बनादावपचीयमाने शनैः शनैः शान्तिमुपैति चेतः ॥ २० ॥ निश्वासलोपैर्विधृतैः शरीरैर्नेत्राश्चलैर्वद्धनिमीलितैश्च। आविर्भवन्तीह मनस्कमुद्रामालोकयामि मुनिपुङ्गवानाम् ॥ २१ ॥ अमी हि चेन्द्रा सहजा मनस्कादहं ममत्वं शिथिलायमाने। मनोगतिं मारुतवृत्तिशून्यं गच्छन्त्यगम्यां गमनावशेषाम् ॥ २२ ॥ निवर्त्तयन्तीं निभृतेन्द्रियाणां प्रवर्त्तयन्तीं परमात्मयोगम्। सच्चिन्मयीं तां सहजामवस्थां कदा गमिष्यामि गतान्यभागः ॥ २३ ॥ प्रत्यग्विमर्शातिशयेन पुंसां प्राचीनगन्धेषु पलायितेषु। प्रादुर्भवेत् क्वापि न जाड्यनिद्रा प्रपञ्च एको विलयं प्रयाति ॥ २४ ॥ विच्छिन्नसंकल्पविकल्पमूले निःशेषनिर्मूलितकर्मजाले। निरन्तराभ्यासिनि नित्यभद्रे विराजते योगिनि योगनिद्राः ॥ २५ ॥ विश्रान्तिमासाद्य तुरीयतत्त्वे विश्वाद्यवस्थात्रितयं परस्ते। सच्चिन्मयीं कामपि सर्व-

कालं निद्रां भजन्निर्विषनिर्विकल्पाम् ॥ २६ ॥ प्रकाशमाने परमात्मभानौ नश्यत्यविद्यातिमिरे समस्ते । अहो बुधा निर्मलदृष्टयोऽपि किञ्चिन्न पश्यन्ति जगत् समग्रम् ॥ २७ ॥ सिद्धिं तथाविधमनोविलयां समर्थां श्रीशैलशृङ्गकुहरेषु कदोपलभ्ये । गात्रं यथा सरलताः परिवेष्टयन्ति कर्णे यथा विरचयन्ति खगाश्च नीडम् ॥ २८ ॥ ब्रह्मरन्ध्रगते वायौ गिरेः प्रस्रवणं भवेत् । शृणोति श्रवणातीतं नादं मुक्तिर्न संशयः ॥ २९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादपूज्यशिष्यश्रीमच्छङ्कराचार्यविरचिता योगतारावली संपूर्णा ।

सौन्दर्यलहरी ॥ ३६ ॥

ॐ परमात्मने नमः ॥ शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि । अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥१॥ तनीयांसं पांसुं तव चरणपंकेरुहभवं विरिञ्चिः संचिन्वन्विरचयति लोकानविकलम् । वहत्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिम् ॥ २ ॥ अविद्यानामन्तस्तिमिरमिहिरोद्दीपनकरी जडानां चैतन्यस्तबकमकरन्दस्रुतिशिराः । दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति ॥ ३ ॥ त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवरा भीत्यभिनया । भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥ ४ ॥

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं पुरा नारीभूत्वा पुररिपुमपि क्षोभमनयत् । स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ ५ ॥ धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा वसन्तः सामन्तो मलयमरुदायोधनरथः । तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपामपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥ ६ ॥ क्वणत्काञ्चीदामा करिकलभकुम्भस्तनभरा परिक्षीणा मध्ये परिणतशरचन्द्रवदना । धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ॥ ७ ॥ सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे । शिवाकारे मञ्चे परमशिवपर्यङ्कनिलया भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥ ८ ॥ महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितिं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि । मनोपि भ्रूमध्ये सकलमपि जित्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ ९ ॥ सुधाधारासारैश्चरणयुगलान्तर्विगलितैः प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा । अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ १० ॥ चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरधः प्रभिन्नाभिः शम्भोर्नवभिरिति मूलप्रकृतिभिः । त्रयश्चत्वारिंशद्वसुदलकलाश्रित्रिवलयत्रिरेखाभिः सार्धं तव चरणकोणाः परिणताः ॥ ११ ॥ त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः । यदालोक्यौत्सुक्यादमरललना यान्ति मनसा तपोभिर्दुःप्रापामपि गिरिशसायुज्यपदवीम् ॥ १२ ॥ नरं

वर्षीयांसं नयनविरसं नर्मसु जडं तवापाङ्गालोके पतितमनुधावन्ति शतशः। गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचया हटात्त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः ॥ १३ ॥ क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले। दिवि द्वौः षट्त्रिंशन्मनसि च चतुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ १४ ॥ शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां वरत्रासत्राणस्फटिकघुटिकापुस्तककराम्। सकृन्नत्वा न त्वां कथमिव सतां संनिदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥ कवीन्द्राणां चेतःकमलवनबालातपरुचिं भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्। विरिञ्चिप्रेयस्यास्तरलतरशृंगारलहरीगभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी ॥ १६ ॥ तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः। भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः कतिकति न गीर्वाणगणिकाः ॥ १७ ॥ मुखं विन्दुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम्। स सद्यः संक्षोभं नयति वनिता इत्यतिलघुत्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥ १८ ॥ किरन्तामङ्गेभ्यः किरणनिकुरम्बामृतरसं हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः। स सर्पाणां दर्पं शमयति शकुन्ताधिप इव ज्वरप्लुष्टं दृष्ट्या सुखयति सुधासारसितया ॥ १९ ॥ तडिल्लेखा तन्वी तपनशशिवैश्वानरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलाम्। महापद्माटव्यां मृदितमलमायेन मनसा महान्तः पश्यन्तो दधति परमाह्लादलहरीम् ॥ २० ॥ सवित्रीभिर्वाचां

णिशिलाभङ्गरुचिभिर्वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः । स कर्त्ता काव्यानां भवति वचसां भङ्गिसुभगैर्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ २१ ॥ भवानि त्वद्दासे मयि वितर दृष्टिं स करुणामिति स्तोतुं वाञ्छन्कथयति भवानि त्वमिति यः । तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥ २२ ॥ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्धं शंभोरपरमपि शङ्के हृतमभूत् । तथा हि त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमुकुटम् ॥ २३ ॥ जगत्सूते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति । सदा पूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥ २४ ॥ त्रयाणां देवानां त्रिगुणजनितानां तव शिवे भवेत्पूजा पूजा तव चरणयोर्या विरचिता । तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः ॥ २५ ॥ विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनम् । वितन्द्रा माहेन्द्री विततिरपि संमीलति दृशां महासंहारेऽस्मिन्विहरति सति त्वत्पतिरसौ ॥ २६ ॥ जपो जल्पः शिल्पं सकलमपि मुद्राविरचनं गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः । प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥ २७ ॥ ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशीममन्दं सौन्दर्यप्रकरमकरन्दं विकिरति । तवास्मिन्मन्दारस्तबकसुभगे यातु चरणे निमज्जन्मज्जीवः करणचरणैः षट्चरणताम् ॥ २८ ॥ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहः

रर्णीं विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः। करालं यत्क्ष्वेडं कवलितवतः कालकलना न शंभोस्तन्मूलं जननि तव ताटङ्कमहिमा ॥ २९ ॥ किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्। प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं हरस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ ३० ॥ चतुःषष्ट्या तन्त्रैः सकलमभिसंधाय भुवनं स्थितस्तत्तत्सिद्धिप्रसभपरतन्त्रैः पशुपतिः। पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटनात्स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम् ॥ ३१ ॥ शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः। अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ ३२ ॥ स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो निधायैके नित्ये निरवधिमहाभोगरसिकाः। जपन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः ॥ ३३ ॥ शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं तवात्मानं मन्ये भगवति भवात्मानमनघम्। अतः शेषः शेषीत्ययमुभयसाधारणतया स्थितः संबन्धो वां समरसपरानन्दपरयोः ॥ ३४ ॥ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परम्। त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानन्दाकारं हरमहिषिभावेन बिभृषे ॥ ३५ ॥ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वन्दे परिमिलितपार्श्वं परचितम्। यमाराध्यन्भक्त्या रविशशिशुचीनामविषये निरालोके लोको निवसति निजालोकभवने ॥ ३६ ॥ विशुद्धौ ते शुद्धस्फटिकसदृशं व्योम-

जनकं शिवं सेवे देवीमपि शिवसमानव्यसनिनीम् । ययोः कान्त्या यान्त्या शशिकिरणसारूप्यसरणिविधृतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥ ३७ ॥ समुन्मीलत्संवित्कमलमकरन्दैकरसिकं भजे हंसद्वन्द्वं किमपि महतां मानसचराम् । यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ॥ ३८ ॥ तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं तमीडे संवर्तं जननि महतीं तां च समयाम् । यदा लोके लोकान्दहति महति क्रोधकलिले दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति ॥ ३९ ॥ तडित्त्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम् । तव श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनम् ॥ ४० ॥ तवाधारे मूले सह समयया लास्यपरया नवात्मानं मन्ये नवरसमहाताण्डवनटम् । उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम् ॥ ४१ ॥ गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः । स नीडेयच्छायाच्छुरणशबलं चन्द्रशकलं धनुः शौनासीरं किमिदमिति बध्नाति धिषणाम् ॥ ४२ ॥ धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं घनस्निग्धं श्लक्ष्णं चिकुरनिकुरम्बं तव शिवे । यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो वसन्त्यस्मिन्मन्ये बलमथनवाटीविटपिनाम् ॥ ४३ ॥ वहन्ती सिन्दूरं प्रबलकबरीभारतिमिरद्विषां वृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम् । तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी परीवाहस्रोतःसरणिरिव सीमन्तसरणिः ॥ ४४ ॥ अरालैः स्वाभाव्यादलिकुलसच्छ्रीभिरलकैः परीतं ते वक्त्रं परि-

हसति पङ्केरुहरुचिम् । दरस्मेरे यस्मिन्दशनरुचिकिञ्जल्करुचिरे सुगन्धौ माद्यन्ति स्मरमथनचक्षुर्मधुलिहः ॥ ४५ ॥ ललाटं लावण्यद्युतिविमलमाभाति तव यत्तृतीयं तन्मन्ये मुकुटशशिखण्डस्य शकलम् । विपर्यासन्यासादुभयकृतसंधानमथितः सुधालेपस्फूर्तिः परिणमति राकाहिमकरः ॥ ४६ ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभङ्गव्यसनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे । धनुर्मध्ये सव्येतरकरगृहीतं रतिपतिः प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे ॥ ४७ ॥ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रियामां वामं ते सृजति रजनीनायकमयम् । तृतीया दृष्टिस्ते दरदलितहेमाम्बुजरुचिः समाधत्ते संध्यां दिवसनिशयोरन्तरचरीम् ॥ ४८ ॥ विशाला कल्याणी स्फुटरुचिरयोध्याकुवलयैः कृपाधारापारा किमपि मधुराभोगवतिका । अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ॥ ४९ ॥ कवीनां संदर्भस्तवकमकरन्दैकभरितं कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम् । अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरलावसूयासंसर्गादलिकनयनं किंचिदरुणं ॥ ५० ॥ शिवे शृङ्गाराद्रे तदितरजने कुत्सनपरा सरोषा गङ्गायां गिरिशचरिते विस्मयवती । हराहिभ्यो भीता सरसिरुहसौभाग्यजननी सखीषु स्मेरा ते मयि जयति दृष्टिः सकरुणा ॥ ५१ ॥ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तुश्चित्ते प्रशमरसविद्रावणफले । इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्मरशरविलासं कलयतः ॥ ५२ ॥ विभक्तत्रैवर्ण्यं व्यतिकरणनीलाम्बुजतया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते । पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरता-

त्रजः सत्त्वं विभ्रत्तम इति गुणानां त्रयमिव ॥ ५३ ॥ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः । नदः शोणो गङ्गा तपनतनयेति ध्रुवमिमं त्रयाणां तीर्थानामुपनयसि संभेदमनघे ॥ ५४ ॥ तवापर्णे कर्णेजपनयनपैशून्यचकिता निलीयन्ते तोये नियतमनिमेषाः शफरिकाः । इयं च श्रीर्बद्धच्छदपुटकपाटं कुवलयं जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥ निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः सन्तो धरणिधरराजन्यतनये । तदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ॥ ५६ ॥ दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे । अनेनायं धन्यो भवति न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ ५७ ॥ अरालं ते पालीयुगलमगराजन्यतनये न केषामाधत्ते कुसुमशरकोदण्डकुतुकम् । तिरश्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ॥ ५८ ॥ स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगलं चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम् । यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं महावीरो मारः प्रमथपतये सज्जितवते ॥ ५९ ॥ सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः पिबन्त्याः शर्वाणि श्रवणचुलुकाभ्यामविरतम् । चमत्कारश्लाघाचलितशिरसः कुण्डलगणो झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ॥ ६० ॥ असौ नासावंशस्तुहिनगिरिवंशध्वजपटस्त्वदीयो नेदीयः फलतु फलमस्माकमुचितम् । वहन्नन्तर्मुक्ताः शिशिरकरनिश्वासगलिताः समृद्ध्या यस्तासां बहिरपि च मुक्तामणिधरः ॥ ६१ ॥ प्रकृत्या

रक्तायास्तव सुदति दन्तच्छदरुचेः प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता । क्व बिम्बं त्वद्बिम्बप्रतिफलनलाभादरुणितं तुलामध्यारोढुं कथमिव न लज्जेत कलया ॥ ६२ ॥ स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां चकोराणामासीदतिरसतया चारुजडिमा । अतस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबन्ति स्वच्छन्दं निशिनिशि भृशं काञ्जिकधिया ॥ ६३ ॥ अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजडा जपापुष्पच्छाया तव जननि जिह्वा जयति सा । यदग्रासीनायाः स्फटिकदृषदच्छच्छविरुचिः सरस्वत्या मूर्त्तिः परिणमति माणिक्यवपुषा ॥६४॥ रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः । विशाखेन्द्रोपेन्द्रैः शशिशिशिरकर्पूरधवला विलिप्यन्ते मातस्तव वदनताम्बूलशकलाः ॥ ६५ ॥ विपञ्च्या गायन्ती विविधमवदातं पशुपतेस्त्वयारब्धं वक्तुं स्खलितवचसा साधुवचने । त्वदीयैर्माधुर्यैरपलपिततन्त्रीकलरवा निजां वीणां वाणी निचुलयति चोलेन निभृतम् ॥ ६६ ॥ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया गिरीशेनोदस्तं मुहुरधरपानाकुलतया । करग्राह्यं शंभोर्मुखमुकुरवृन्तं गिरिसुते कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितम् ॥ ६७ ॥ भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती तव ग्रीवा धत्ते मुखकमलनालश्रियमियम् । स्वतः-श्वेता कालागरुबहलजम्बालमलिना मृणालीलालित्यं वहति यदधो हारलतिका ॥ ६८ ॥ गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाहव्यानद्धत्रिगुणगुणसंख्याप्रतिभुवः । विराजन्ते नानाविधमधुररागाकरभुवां त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ॥६९॥ मृणालीमृद्वीनां तव भुजलतानां चतसृणां

चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः । नखेभ्यः संत्रस्यन्प्रथमदमनादन्धकरिपोश्चतुर्णां वक्त्राणां सममभयदानार्पणधिया ॥ ७० ॥ नखानामुद्योतैर्नवनलिनरागं विहसतां कराणां ते कान्तिं कथय कथयामः कथमुमे । कदाचिद्वा साम्यं भजतु विधया हन्त कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलम् ॥ ७१ ॥ समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम् । यदालोक्याशङ्काकुलितहृदयो हासजनकः स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झटिति ॥७२॥ अमू ते वक्षोजावमृतरसमाणिक्यकलशौ न सन्देहस्पन्दो नगपतिपताकौ मनसि नः । पिबन्तौ तौ यस्मादविदितवधूसंगमरसौ कुमारावद्यापि द्विरदवदनक्रौञ्चदमनौ ॥ ७३ ॥ वहत्यम्ब स्तम्बेरमदनुजकुम्भप्रकृतिभिः समारब्धां मुक्तामणिभिरमलां हारलतिकाम् । कुचाभोगो बिम्बाधररुचिभिरन्तःशबलितां प्रतापव्यामिश्रां पुरविजयिनः कीर्तिमिव ते ॥ ७४ ॥ तव स्तन्यं मन्ये तुहिनगिरिकन्ये हृदयतः पयःपारावारः परिवहति सारस्वत इति । दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता ॥ ७५ ॥ हरक्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः । समुत्तस्थौ तस्मादचलतनये धूमलतिका जनस्तां जानीते तव जननि रोमावलिरिति ॥ ७६ ॥ यदेतत्कालिन्दीतनुतरतरङ्गाकृतिशिवे कृशे मध्ये किंचिज्जननि तव तद्भाति सुधियाम् । विमर्दादन्योन्यं कुचकलशयोरन्तरगतं तनूभूतं व्योम प्रविशदिव नाभीकुहरिणीम् ॥ ७७ ॥ स्थिरो गङ्गावर्त्तः स्तनमुकुलरोमावलिलताकुलावालं कुण्डं कुसुमशरतेजोहुतभुजः ।

रतेर्लीलागारं किमपि तव नाभीति गिरिजे बिलद्वारं सिद्धे-र्गिरिशनयनानां विजयते ॥ ७८ ॥ निसर्गक्षीणस्य स्तनतटभ-रेण क्लमजुषो नमन्मूर्तेर्नाभौ वलिषु शनकैरुद्यत इव । चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा समावस्थस्थेम्नो भवतु कुशलं शैलतनये ॥ ७९ ॥ कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ कषन्तौ दोर्मूले कनककलशाभौ कलयता । तव त्रातुं भङ्गादु-दरमवलग्नं तनुभुवा त्रिधानद्धं देवि त्रिवलिलवलीवल्लिभिरिव ॥ ८० ॥ गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजान्नित-म्बादाच्छिद्य त्वयि हरणरूपेण विदधे । अतस्ते विस्तीर्णो गुरु-रयमशेषां वसुमतीं नितम्बप्राग्भारः स्थगयति लघुत्वं नयति च ॥ ८१ ॥ करीन्द्राणां शुण्डाकनककदलीकाण्डपटलीमुभा-भ्यामूरुभ्यामुभयमपि निर्जित्य भवती । सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विजिग्ये जानुभ्यां विबुधकरिकु-म्भद्वयमपि ॥ ८२ ॥ पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत । यदग्रे लक्ष्यं ते दशशरफलाः पादयुगलीनखाग्रच्छद्मानः सुरमुकुटशाणैकनि-शिताः ॥ ८३ ॥ श्रुतीनां मूर्धानो दधति तव यौ शेखरतया ममाप्येतौ मातः शिरसि दयया धेहि चरणौ । ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षालक्ष्मीररुणहरिचूडा-मणिरुचिः ॥ ८४ ॥ नमोवाकं ब्रूमो नयनरमणीयाय पदयो-स्तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकरुचे । असूयत्यत्यन्तं यद-भिहननाय स्पृहयते पशूनामीशानः प्रमदवनकङ्केलितरवे ॥८५॥ मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं ललाटे भर्तारं चर-णयुगले ताडयति ते । चिरादन्तःशल्यं दहनकृतमुन्मीलित-

चता तुलाकोटिकाणैः किलिकिलितमीशानरिपुणा ॥ ८६ ॥ हिमानीहन्तव्यं हिमगिरितटाक्रान्तिचतुरौ निशायां निद्राणं निशि च परभागे च विशदौ । परं लक्ष्मीपात्रं श्रियमपि सृजन्तौ समयिनां सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम् ॥ ८७ ॥ पदं ते कान्तीनां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठीखर्परतुलम् । कथं वा हस्ताभ्यामुपयमनकाले पुरमिदा तदादाय न्यस्तं दृपदि दयमानेन मनसा ॥ ८८ ॥ नखैर्नाकस्त्रीणां करकमलसंकोचशशिभिस्तरूणां दिव्यानां हसत इव ते चण्डि चरणौ । फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ॥ ८९ ॥ कदा काले मातः कथय कलितालक्तकरसं पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम् । प्रकृत्या मूकानामपि च कविताकारणतया यदा धत्ते वाणी मुखकमलताम्बूलरसताम् ॥ ९० ॥ पदन्यासक्रीडापरिचयमिवारब्धुमनसश्चरन्तस्ते खेलं भवनकलहंसा न जहति । स्वविक्षेपे शिक्षां सुभगमणिमञ्जीररणितच्छलादाचक्षाणं चरणकमलं चारुचरिते ॥ ९१ ॥ गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः । त्वदीयानां भासां प्रतिफलनलाक्षारुणतया शरीरी शृङ्गारो रस इव दृशां दोग्धि कुतुकम् ॥ ९२ ॥ अराला केशेषु प्रकृतिसरला मन्दहसिते शिरीषाभा गात्रे दृषदिव कठोरा कुचतटे । भृशं तन्वी मध्ये पृथुरपि वरारोहविषये जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा ॥ ९३ ॥ समानीतः पद्भ्यां मणिमुकुरतामम्बरमणिर्भया दास्यस्यान्तस्तिमितकिरणश्रेणिमसृणः । दधाति त्वद्वक्त्रप्रतिफलनमश्रान्तविकचं निरातङ्कश्चन्द्रो

निजहृदयपङ्केरुहमिव ॥ ९४ ॥ कलङ्कः कस्तूरीरजनिकरबिम्बं जलमयं कलाभिः कर्पूरैर्मरकतकरण्डं निबिडितम् । अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयोभूयो निबिडयति नूनं तव कृते ॥ ९५ ॥ पुरारातेरन्तःपुरमसि ततस्त्वच्चरणयोः सपर्यामर्यादा तरलकरणानामसुलभा । तथाप्येते नीताः शतमखमुखा सिद्धिमतुलां तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ॥ ९६ ॥ कलत्रं वैधात्रं कतिकति भजन्ते न कवयः श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः । महादेवं हित्वा तव सति सतीनामचरमे कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ॥ ९७ ॥ स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो निषेव्यां नित्ये त्वामहमिति सदा भावयति यः । किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्ताग्निर्विरचयति नीराजनविधिम् ॥ ९८ ॥ गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमादितनयाम् । तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाये विश्वं भ्रमयसि परब्रह्ममहिषि ॥ ९९ ॥ समुद्भूतस्थूलस्तनभरमुरश्चारु हसितं कटाक्षे कन्दर्पः कतिचन कदम्बद्युतिवपुः ॥ हरस्य त्वद्भ्रान्तिं मनसि जनयन्ति स्म विमला भवत्या ये भक्ताः परिणतिरमीषामियमुमे ॥ १०० ॥ सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विजयते रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा । चिरंजीवन्नेव क्षपितपशुपाशव्यतिकरः परब्रह्माभिख्यं रसयति रसं त्वद्भजनवान् ॥ १०१ ॥ निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे निराघाटज्ञाने नियमपरचित्तैकनिलये । नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे निरातङ्के नित्ये निगमय ममापि स्तुतिमिमाम्

॥ १०२ ॥ प्रदीपज्वालाभिर्दिनमकरनीराजनविधिः सुधासूते चन्द्रोपलजललवैरर्घ्यरचना । स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं स्वकीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ॥ १०३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमच्छंकराचार्यविरचितं सौन्दर्यलहरीस्तोत्रं संपूर्णम् ॥ ॥

आनंदलहरी ॥ ३७ ॥

ॐ परमात्मने नमः ॥ भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामीशानस्त्रिपुरमथनः पंचभिरपि । न षड्भिः सेनानी दशशतमुखैरप्यहिपतिस्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥ १ ॥ घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैर्विशिष्यानाख्येयो भवति रसनामात्रविषयः । तथा ते सौंदर्यं परमशिवदृङ्मात्रविषयः कथंकारं ब्रूमः सकलनिगमागोचरगुणे ॥ २ ॥ मुखे ते तांबूलं नयनयुगले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता । स्फुरत्कांचीशाटीपृथुकटितटे हाटकमयी भजामस्त्वां गौरी नगपतिकिशोरीमविरतम् ॥ ३ ॥ विराजन्मन्दारद्रुमकुसुमहारस्तनतटीनदद्वीणानादः प्रमदविचलत्कुंडलगणः । नतांगी मातंगी रुचिरगतिभंगी भगवती सती शंभोरंभोरुहचटुलचक्षुर्विजयते ॥ ४ ॥ नवीनार्कभ्राजन्मणिकनकभूषापरिकरैर्वृतांगी सारंगी रुचिरनयनांगीकृतशिवा । तडित्पीता पीतांबरललितमंजीरसुभगा ममापर्णापर्णा निरवधिसुखेरस्तु सुमुखी ॥ ५ ॥ हिमाद्रौ संभूता सु-

ललितकरैः पल्लवयुता सपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः । कृतस्थाणुस्थाना मुकुलितलता सूक्तिसरसा रुजां हंत्री गंत्री विलसति चिदानंदलतिका ॥ ६ ॥ सपर्णामाकीर्णां कतिपयगुणैः सादरमिह श्रयंत्यन्ये वल्लिं मम तु मतिरेवं विलसति । अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः पुराणोपि स्थाणुः फलति किल कैवल्यपदवीम् ॥ ७ ॥ विधात्री धर्माणां त्वमसि सकलोन्माथजननी त्वमर्थानां मूलं धनदमविनिंद्यांघ्रिकमलम् । त्वदादिः कामानां जननि कृतकंदर्पविजये सतां मुक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥ ८ ॥ प्रभूता भक्तिस्ते यदपि न ममालोलमनसस्त्वया तु श्रीमत्या सदयमवलोक्योहमधुना । पयोदः पानीयं दिशति मधुरं चातकमुखे भृशं शंके कैर्वा विधिभिरनुनीता मम मतिः ॥ ९ ॥ कृपापांगालोकं वितर तरसा साधुचरिते न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते । न चेदिष्टं दद्यादुपपदमहो कल्पलतिकाविशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥ १० ॥ महांतं विश्वासं तव चरणपंकेरुहयुगे निधायान्यन्नैवाश्रितमिह मया दैवतमुमे । तथापि त्वच्चेतो यदि मयि न जायेत सदयं निरालंबो लंबोदरजननि कं यामि शरणं ॥ ११ ॥ अयःस्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः शुचि भवति गंगौघमिलितम् । तथा तत्तत्पापैरतिमलिनमंतर्मम यदि त्वयि प्रेम्णा सक्तं कथमिव न जायेत विमलम् ॥१२॥ त्वदन्यस्मादिच्छाविषयफललाभेन नियमस्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे । इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं नक्तं दिवमुचितमी-- कुरु तत् ॥ १३ ॥ स्फुरन्नानारत्नस्फटिकमया

दाकारं चंचच्छशधरशिलासौधशिखरम् । मुकुंदब्रह्मेंद्रप्रभृतिपरिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥१४॥ निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुंबं त्रैलोक्यं कृतकरपुटः सिंहनिकरः । महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५ ॥ वृषो वृद्धो यानं विषमशनमाशानिवसनं सशानं क्रीडाभूर्भुजगनिवहो भूषणविधिः । समग्रा सामग्री जगति विदितैव स्मररिपोर्यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥ १६ ॥ अशेषब्रह्मांडप्रलयविधिनैसर्गिकमतिः सशानेष्वासीनः कृतभसितलेपः पशुपतिः । दधौ कंठे हालाहलमखिलभूगोलकृपया भवत्याः संगत्या फलितमिति कल्याणि कलये ॥ १७ ॥ त्वदीयं सौंदर्यं निरतिशयमालोक्य परया भियैवासीद्गंगाजलमयतनुः शैलतनये । नदी तस्यास्ताम्यद्वदनकमलं वीक्ष्य कृपया प्रतिष्ठामातेने निजशिरसि वासेन गिरिशः ॥ १८ ॥ विशालश्रीखंडद्रवमृगमदाकीर्णघुसृणप्रसूनव्यामिश्रं भगवति तवाभ्यंगसलिलम् । समादाय स्रष्टा चलितपदपांसून्निजकरैः समाधत्ते सृष्टिं विबुधपुरपंकेरुहदृशाम् ॥१९॥ वसंते सानंदं कुसुमितलताभिः परिवृते स्फुरन्नानाग्रे वै सरसि कलहंसालिसुभगे । सखीभिः खेलंती मलयपवनांदोलितजले स्मरेद्यस्त्वां तस्य ज्वरजनितपीडापसरति ॥ २० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भगवच्छंकराचार्यविरचितानंदलहरी संपूर्णा ॥ ३७ ॥

श्रीमद्भगवद्गीता ॥ ३८ ॥

॥ गीतामाहात्म्यम् ॥

ॐ परमात्मने नमः ॥ ॥ श्रीराधारमणाय नमः। धरोवाच । भगवन्परमेशान भक्तिरव्यभिचारिणी । प्रारब्धं भुज्यमानस्य कथं भवति हे प्रभो ॥ १ ॥ विष्णुरुवाच । प्रारब्धं भुज्यमानो हि गीताभ्यासरतः सदा । स मुक्तः स सुखी लोके कर्मणा नोपलिप्यते ॥२॥ महापापादिपापानि गीताध्यानं करोति चेत् क्वचित्स्पर्शं न कुर्वंति नलिनीदलमंबुवत् ॥ ३ ॥ गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते । तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै ॥ ४ ॥ सर्वे देवाश्च ऋषयो योगिनः पन्नगाश्च ये । गोपाला गोपिका वापि नारदोद्धवपार्षदैः ॥ ५ ॥ सहायो जायते शीघ्रं यत्र गीता प्रवर्तते । यत्र गीताविचारश्च पठनं पाठनं श्रुतम् । तत्राहं निश्चितं पृथ्वि निवसामि सदैव हि ॥ ६ ॥ गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम् । गीताज्ञानमुपाश्रित्य त्रींल्लोकान्पालयाम्यहम् ॥ ७ ॥ गीता मे परमा विद्या ब्रह्मरूपा न संशयः । अर्धमात्राक्षरा नित्या स्वानिर्वाच्यपदात्मिका ॥ ८ ॥ चिदानंदेन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम् । वेदत्रयी परानंदा तत्त्वार्थज्ञानसंयुता ॥९॥ योऽष्टादशजपो नित्यं नरो निश्चलमानसः । ज्ञानसिद्धिं स लभते ततो याति परं पदम् ॥ १० ॥ पाठेऽसमर्थः संपूर्णे ततोऽर्धं पाठमाचरेत् । तदा गोदानजं पुण्यं लभते नात्र संशयः ॥ ११ ॥ त्रिभागं पठमानस्तु गंगास्नानफलं लभेत् । षडंशं जपमानस्तु सोमयागफलं लभेत् ॥ १२ ॥ एकाध्यायं

तु यो नित्यं पठते भक्तिसंयुतः । रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम् ॥ १३ ॥ अध्यायं श्लोकपादं वा नित्यं यः पठते नरः । स याति नरतां यावन्मन्वंतरं वसुंधरे ॥ १४ ॥ गीतायाः श्लोकदशकं सप्त पंच चतुष्टयम् । द्वौ त्रीनेकं तदर्धं वा श्लोकानां यः पठेन्नरः ॥ १५ ॥ चंद्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम् । गीतापाठसमायुक्तो मृतो मानुषतां व्रजेत् ॥ १६ ॥ गीताभ्यासं पुनः कृत्वा लभते मुक्तिमुत्तमाम् । गीतेत्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत् ॥ १७ ॥ गीतार्थश्रवणासक्तो महापापयुतोऽपि वा । वैकुंठं समवाप्नोति विष्णुना सह मोदते ॥ १८ ॥ गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः । जीवन्मुक्तः स विज्ञेयो देहांते परमं पदम् ॥ १९ ॥ गीतामाश्रित्य बहवो भूभुजो जनकादयः । निर्धूतकल्मषा लोके गीता याताः परं पदम् ॥ २० ॥ गीतायाः पठनं कृत्वा माहात्म्यं नैव यः पठेत् । वृथा पाठो भवेत्तस्य श्रम एव ह्युदाहृतः ॥ २१ ॥ एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः । स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात् ॥ २२ ॥ सूत उवाच । माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम् । गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत् ॥ २३ ॥ इति श्रीवाराहपुराणे श्रीगीतामाहात्म्यं संपूर्णम् ॥

॥ श्रीमद्भगवद्गीता ॥

ॐ परमात्मने नमः ॥ श्रीगोपालकृष्णाय नमः ॥ ॐ अस्य श्रीभगवद्गीतामालामंत्रस्य भगवान्वेदव्यास ऋषिः । अनुष्टुप् छंदः । श्रीकृष्णः परमात्मा देवता । अशोच्यानन्वशोचस्त्वं

प्रज्ञावादांश्च भाषस इति बीजम् । सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति शक्तिः । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति कीलकम् । नैनं छिंदंति शस्त्राणि नैनं दहति पावक इत्यंगुष्ठाभ्यां नमः । न चैनं क्लेदयंत्यापो न शोषयति मारुत इति तर्जनीभ्यां नमः । अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति मध्यमाभ्यां नमः । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इत्यनामिकाभ्यां नमः । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति कनिष्ठिकाभ्यां नमः । नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति करतलकरपृष्ठाभ्यां नमः । इति करन्यासः । अथ हृदयादिन्यासः । नैनं छिंदंति शस्त्राणि नैनं दहति पावक इति हृदयाय नमः । न चैनं क्लेदयंत्यापो न शोषयति मारुत इति शिरसे स्वाहा । अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति शिखायै वषट् । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति कवचाय हुम् । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति नेत्रत्रयाय वौषट् । नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति अस्त्राय फट् ॥ श्रीकृष्णप्रीत्यर्थे पाठे विनियोगः ॥ ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् । अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीमंब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥ १ ॥ नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविंदायतपत्रनेत्र । येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ २ ॥ प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये । ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ ३ ॥ सर्वोपनिषदो गावो दोग्धा

गोपालनंदनः । पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूरमर्दनम् । देवकीपरमानंदं कृष्णं वंदे जगद्गुरुम् ॥ ५ ॥ भीष्मद्रोणतटा जयद्रथजला गांधारनीलोत्पला शल्यग्राहवती कृपेण वहनी कर्णेन चेलाकुला । अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु पांडवै रणनदी कैवर्तकः केशवः ॥ ६ ॥ पाराशर्यवचःसरोजममलं गीतार्थगंधोत्कटं नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् । लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥७॥ मूकं करोति वाचालं पंगुं लंघयते गिरिम् । यत्कृपा तमहं वंदे परमानंदमाधवम् ॥ ८ ॥ यं ब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः । ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ९ ॥ इति ध्यानम् ॥

धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पांडवाश्चैव किमकुर्वत संजय ॥१॥ संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् । पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च

सर्व एव महारथाः ॥ ६ ॥ अस्माकं तु विशिष्टा ये तान्निबोध
द्विजोत्तम। नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते॥ ७॥
भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः। अश्वत्थामा विक-
र्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥ अन्ये च बहवः शूरा मदर्थे
त्यक्तजीविताः। नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥ ९॥
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्। पर्याप्तं त्विदमे
तेषां बलं भीमाभिरक्षितम् ॥ १० ॥ अयनेषु च सर्वेषु
यथाभागमवस्थिताः। भीष्ममेवाभिरक्षंतु भवंतः सर्व एव
हि ॥ ११ ॥ तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्॥ १२॥ ततः
शंखाश्च भेर्यश्च पणवानकगोमुखाः। सहसैवाभ्यहन्यंत स
शब्दस्तुमुलोऽभवत्॥ १३॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने
स्थितौ। माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४॥
पांचजन्यं हृषीकेशो देवदत्तं धनंजयः। पौंड्रं दध्मौ महाशंखं
भीमकर्मा वृकोदरः॥ १५॥ अनंतविजयं राजा कुंतीपुत्रो
युधिष्ठिरः। नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥ १६॥
काश्यश्च परमेष्वासः शिखंडी च महारथः। धृष्टद्युम्नो विरा-
टश्च सात्यकिश्चापराजितः॥ १७॥ द्रुपदो द्रौपदेयाश्च सर्वशः
पृथिवीपते। सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक्॥१८॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्। नभश्च पृथिवीं
चैव तुमुलो व्यनुनादयन् ॥ १९॥ अथ व्यवस्थितान्दृष्ट्वा
धार्तराष्ट्रान्कपिध्वजः। प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः
॥ २०॥ हृषीकेशं तदा वाक्यमिदमाह महीपते। अर्जुन
उवाच॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥ २१॥

यावदेतान्निरीक्ष्येऽहं योद्धुकामानवस्थितान् । कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥ धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत । सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् । उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् । आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि । तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥ २७ ॥ कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥ सीदंति मम गात्राणि मुखं च परिशुष्यति । वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥ गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते । न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥ निमित्तानि च पश्यामि विपरीतानि केशव । न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च । किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च । त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः । मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा ॥ ३४ ॥ एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन । अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥ निहत्य धार्तराष्ट्रान्नः का

प्रीतिः स्याज्जनार्दन । पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः
॥ ३६ ॥ तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान्स्वबांधवान् । स्वजनं
हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥ यद्यप्येते न
पश्यंति लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च
पातकम् ॥ ३८ ॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षये प्रण-
श्यन्ति कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभि-
भवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥ संकरो
नरकायैव कुलघ्नानां कुलस्य च । पतंति पितरो ह्येषां लुप्तपिं-
डोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्न-
कुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवती-
त्यनुशुश्रुम ॥ ४४ ॥ अहो बत महत्पापं कर्तुं व्यवसिता
वयम् । यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥ ४५ ॥ यदि
मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे
क्षेमतरं भवेत् ॥ ४६ ॥ संजय उवाच ॥ एवमुक्त्वार्जुनः
संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंवि-
ग्नमानसः ॥ ४७ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मवि-
द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम
प्रथमोध्यायः ॥ १ ॥

॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्ष-
णम् । विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ श्रीभ-
गवानुवाच ॥ कुतस्त्वा कश्मलमिदं विषमे समुप- ९

अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ क्लैब्यं मा स्म गमः
पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप
॥ ३ ॥ अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये द्रोणं च
मधुसूदन । इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥
गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ॥५॥
न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः
॥ ६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचे-
ताः । यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां
त्वां प्रपन्नम् ॥ ७ ॥ न हि प्रपश्यामि ममापनुद्याद् यच्छोक-
मुच्छोषणमिन्द्रियाणाम् । अवाप्य भूमावसपत्नमृद्धं राज्यं सुरा-
णामपि चाधिपत्यम् ॥ ८ ॥ संजय उवाच ॥ एवमुक्त्वा
हृषीकेशं गुडाकेशः परंतप । न योत्स्य इति गोविन्दमुक्त्वा
तूष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥ श्रीभगवा-
नुवाच ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गता-
सूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥ न त्वेवाहं जातु
नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे
वयमतः परम् ॥ १२ ॥ देहिनोऽस्मिन्यथा देहे कौमारं यौवनं
जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥ मात्रा-
स्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनि-
त्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥ यं हि न व्यथयन्त्येते पुरुषं
पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥ अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ॥ विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥ य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हंति न हन्यते ॥ १९ ॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः । अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥ वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हंति कम् ॥ २१ ॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥ अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते । तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ॥ तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते॥३१॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥ ३२ ॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥३३॥ अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययाम् । संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः । येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥ अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः । निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् । तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ ३७ ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥ एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो

भवार्जुन । निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥४५॥
यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्म-
णस्य विजानतः ॥ ४६ ॥ कर्मण्येवाधिकारस्ते मा फलेषु कदा-
चन । मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥ ४७ ॥
योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः
समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥ दूरेण ह्यवरं कर्म
बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः
॥ ४९ ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय
युज्यस्व योगः कर्मसु कौशलम् ॥५०॥ कर्मजं बुद्धियुक्ता हि फलं
त्यक्त्वा मनीषिणः । जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयम्
॥५१॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि
निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥ श्रुतिविप्रतिपन्ना ते यदा
स्थास्यति निश्चला । समाधावचला बुद्धिस्तदा योगमवाप्स्यसि
॥५३॥ अर्जुन उवाच ॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य
केशव । स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥
श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनो-
गतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः
स्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य
शुभाशुभम् । नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥
यदा संहरते चायं कूर्मोऽगानीव सर्वशः । इंद्रियाणींद्रियार्थे-
भ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥ विषया विनिवर्तंते निरा-
हारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इंद्रियाणि प्रमाथीनि

हरंति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि संयम्य युक्त
आसीत मत्परः । वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता
॥ ६१ ॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते । संगात्सं-
जायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥ क्रोधाद्भवति
संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो
बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥ रागद्वेषवियुक्तैस्तु विषयानिं-
द्रियैश्चरन् । आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु
बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य
भावना । न चाभावयतः शांतिरशांतस्य कुतः सुखम् ॥ ६६ ॥
इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां
वायुर्नावमिवांभसि ॥ ६७ ॥ तस्माद्यस्य महाबाहो निगृहीतानि
सर्वशः । इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥
या निशा सर्वभूतनां तस्यां जागर्ति संयमी । यस्यां जाग्रति
भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥ आपूर्यमाणमचल-
प्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् । तद्वत्कामा यं प्रविशंति
सर्वे स शांतिमाप्नोति न कामकामी ॥ ७० ॥ विहाय कामान्यः
सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहंकारः स शांतिम-
धिगच्छति ॥ ७१ ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य
विमुह्यति । स्थित्वास्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥
इति श्रीभ० सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

अर्जुन उवाच ॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्ज-
नार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य

येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥ श्रीभगवानुवाच ॥ लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ । ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते । न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् । इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः । शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः । तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥ ९ ॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥ देवान्भावयतानेन ते देवा भावयंतु वः । परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥ ११ ॥ इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥ १२ ॥ यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः । भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥ १३ ॥ अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः । अघायुरिंद्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥१७॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥ तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥ यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः । मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ २३ ॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत । कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥२७॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥ २८ ॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु । तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥ ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः । श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥ ३१ ॥ ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यांति भूतानि निग्रहः किं

करिष्यति ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥ ३४ ॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥ **अर्जुन उवाच** । अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥ **श्रीभगवानुवाच** ॥ काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥ धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥ ३९ ॥ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥ इति श्रीमद्भगवद्गीतासूप० कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

श्रीभगवानुवाच ॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥ **अर्जुन उवाच** । अपरं भवतो जन्म परं जन्म विवस्वतः । कथमेत-

द्विजानीयां समादौ प्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच । बहूनि मे व्यतीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७ ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् । मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ ११ ॥ कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥ न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा । इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः । कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः । तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥ यस्य सर्वे समारंभाः कामसंकल्पव-

जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तो-
ऽपि नैव किंचित्करोति सः ॥ २० ॥ निराशीर्यतचित्तात्मा
त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्
॥ २१ ॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः । समः
सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥ गतसंगस्य
मुक्तस्य ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रवि-
लीयते ॥ २३ ॥ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥ दैवमेवापरे
यज्ञं योगिनः पर्युपासते । ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति
॥ २५ ॥ श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दा-
दीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥ २६ ॥ सर्वाणींद्रियक-
र्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदी-
पिते ॥ २७ ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्या-
यज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥ अपाने जुह्वति
प्राणं प्राणेऽपानं तथापरे । प्राणापानगती रुद्ध्वा प्राणायामप-
रायणाः ॥ २९ ॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥ यज्ञशिष्टामृ-
तभुजो यांति ब्रह्म सनातनम् । नायं लोकोऽस्त्ययज्ञस्य कुतो-
ऽन्यः कुरुसत्तम ॥ ३१ ॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो
मुखे । कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप । सर्वं कर्माखिलं पार्थ
ज्ञाने परिसमाप्यते ॥ ३३ ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन
सेवया । उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥ श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः। ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥ अज्ञश्चाश्रद्धानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्। आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥ इति श्रीमद्भग० ज्ञानविज्ञानयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अर्जुन उवाच ॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि। यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥ श्रीभगवानुवाच ॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति। निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः। एकमप्यास्थितः सम्यगुभयोर्विंदते फलम् ॥ ४ ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते। एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः। योगयुक्तो मुनिर्ब्रह्म न चिरे-

णाधिगच्छति ॥ ६ ॥ योगयुक्तो विशुद्धात्मा विजितात्मा
जितेंद्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्व-
न्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ८ ॥ प्रलपन्विसृजन्गृह्ण-
न्नुन्मिषन्निमिषन्नपि । इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन्
॥ ९ ॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥ कायेन मनसा
बुद्ध्या केवलैरिंद्रियैरपि । योगिनः कर्म कुर्वंति संगं त्यक्त्वाऽऽ-
त्मशुद्धये ॥ ११ ॥ युक्तः कर्मफलं त्यक्त्वा शांतिमा-
प्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते
॥ १२ ॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे
पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥ न कर्तृत्वं न कर्माणि
लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते
॥ १४ ॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञाने-
नावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५ ॥ ज्ञानेन तु तदज्ञानं
येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्प-
रम् ॥ १६ ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छं-
त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥ विद्याविनयसंपन्ने
ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पंडिताः समद-
र्शिनः ॥ १८ ॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥ न प्रहृ-
ष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसंमूढो
ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥ बाह्यस्पर्शेष्वसक्तात्मा विंदत्या-
त्मनि यत्सुखम् । स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥ २२ ॥ शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥ योऽन्तःसुखोऽन्तरारामस्तथांतर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥ लभंते ब्रह्मनिर्वाण-मृषयः क्षीणकल्मषाः । छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥ कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः । प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥ इति श्रीमद्भग० संन्यासयोगो नाम पंचमोऽध्यायः ॥ ५ ॥

श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स संन्यासी च योगी च न निरग्निर्नचाक्रियः ॥ १ ॥ यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव । न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥ यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥ बंधुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तु शत्रुत्वे वर्ततात्मैव शत्रुवत् ॥ ६ ॥ जितात्मनः प्रशांतस्य पर-

मात्मा समाहितः । शीतोष्णसुखदुःखेषु तथा मानापमानयोः
॥ ७ ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः । युक्त इत्यु-
च्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥ सुहृन्मित्रार्युदासी-
नमध्यस्थद्वेष्यबंधुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते
॥ ९ ॥ योगी युंजीत सततमात्मानं रहसि स्थितः । एकाकी
यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥ शुचौ देशे प्रतिष्ठाप्य
स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशो-
त्तरम् ॥ ११ ॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ।
उपविश्यासने युंज्याद्योगमात्मविशुद्धये ॥ १२ ॥ समं काय-
शिरोग्रीवं धारयन्नचलं स्थिरः । संप्रेक्ष्य नासिकाग्रं स्वं दिश-
श्चानवलोकयन् ॥ १३ ॥ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते
स्थितः । मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥
युंजन्नेवं सदाऽऽत्मानं योगी नियतमानसः । शांतिं निर्वाणप-
रमां मत्संस्थामधिगच्छति ॥ १५ ॥ नात्यश्नतस्तु योगोऽस्ति
न चैकांतमनश्नतः । न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन
॥ १६ ॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नाव-
बोधस्य योगो भवति दुःखहा ॥ १७ ॥ यदा विनियतं चित्त-
मात्मन्येवावतिष्ठते । निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते
तदा ॥ १८ ॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ १९ ॥ यत्रोपरमते
चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि
तुष्यति ॥ २० ॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥ यं लब्ध्वा
चापरं लाभं मन्यते नाधिकं ततः । यस्मिन्स्थितो न

दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥ तं विद्याद्दुःखसंयोग-
वियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यो योगो निर्विण्ण-
चेतसा ॥ २३ ॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥ शनैःशनैरुपर-
मेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किंचिदपि
चिंतयेत् ॥ २५ ॥ यतो यतो निश्चरति मनश्चंचलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥ प्रशांतमनसं
ह्येनं योगिनं सुखमुत्तमम् । उपैति शांतरजसं ब्रह्मभूतमकल्मषम्
॥ २७ ॥ युंजन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः । सुखेन
ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥ २८ ॥ सर्वभूतस्थमात्मानं
सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः
॥ २९ ॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं
न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥ सर्वभूतस्थितं
यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी
मयि वर्तते ॥ ३१ ॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥
अर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन
मधुसूदन । एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिराम्
॥ ३३ ॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं
निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवा-
च ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु
कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो
दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमु-
पायतः ॥ ३६ ॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो

दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥ तं विद्याद्दुःखसंयोग-
वियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यो योगो निर्विण्ण-
चेतसा ॥ २३ ॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥ शनैःशनैरुपर-
मेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किंचिदपि
चिंतयेत् ॥ २५ ॥ यतो यतो निश्चरति मनश्चंचलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥ प्रशांतमनसं
ह्येनं योगिनं सुखमुत्तमम् । उपैति शांतरजसं ब्रह्मभूतमकल्मषम्
॥ २७ ॥ युंजन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः । सुखेन
ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥ २८ ॥ सर्वभूतस्थमात्मानं
सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः
॥ २९ ॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं
न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥ सर्वभूतस्थितं
यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी
मयि वर्तते ॥ ३१ ॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥
अर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन
मधुसूदन । एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिराम्
॥ ३३ ॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं
निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवा-
च ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु
कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो
दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमु-
पायतः ॥ ३६ ॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो

॥ ३ ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार
इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यां
प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते
जगत् ॥ ५ ॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं
कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥ मत्तः परतरं नान्य-
त्किंचिदस्ति धनंजय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव
॥ ७ ॥ रसोऽहमप्सु कौंतेय प्रभाऽस्मि शशिसूर्ययोः । प्रणवः
सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो गंधः पृथिव्यां
च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु
॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बु-
द्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥ बलं बलवतामस्मि
कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ
॥ ११ ॥ ये चैव सात्विका भावा राजसास्तामसाश्च ये । मत्त
एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ त्रिभिर्गुणमयै-
र्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः
परमव्ययम् ॥ १३ ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥१४॥ न मां दुष्कृतिनो
मूढाः प्रपद्यंते नराधमाः । माययापहृतज्ञाना आसुरं भावमा-
श्रिताः ॥१५॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन । आर्तो
जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥ तेषां ज्ञानी नित्ययुक्त
एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम
प्रियः ॥ १७ ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥ बहूनां
जन्मनामंते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा

सुदुर्लभः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥ यो यो
यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां
श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥ स तया श्रद्धया युक्तस्त-
स्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हि तान्
॥ २२ ॥ अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् । देवान्देव-
यजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥ अव्यक्तं व्यक्ति-
मापन्नं मन्यंते मामबुद्धयः । परं भावमजानंतो ममाव्ययमनु-
त्तमम् ॥ २४ ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥ वेदाहं
समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां
तु वेद न कश्चन ॥ २६ ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥ येषां त्वंतगतं
पापं जनानां पुण्यकर्मणाम् । ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढ-
व्रताः ॥ २८ ॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये । ते
ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥ साधि-
भूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां
ते विदुर्युक्तचेतसः ॥ ३० ॥ इति श्रीमद्भगवद्गीतायां ज्ञानयोगो
नाम सप्तमोऽध्यायः ॥ ७ ॥

अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषो-
त्तम । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥ अधि-
यज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन । प्रयाणकाले च कथं
ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥ श्रीभगवानुवाच ॥ अक्षरं
ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्ग

॥ ३ ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥ रसोऽहमप्सु कौंतेय प्रभाऽस्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥ बलं बलवतामस्मि कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥ ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥१४॥ न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा

सुदुर्लभः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥ अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्। देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥ अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः। परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥ वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत। सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम्। ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः। प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥ इति श्रीमद्भगवद्गीतायां ज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम। अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन। प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥ श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः

कर्मसंज्ञितः ॥ ३ ॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् । अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥ अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥ यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम् । तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च । मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥ ७ ॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना । परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥ प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव । भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥ यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः । यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥ १६ ॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥ १७ ॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ।

रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥ परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥ २१ ॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६ ॥ नैते सृती पार्थ जानन् योगी मुह्यति कश्चन । तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् । अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥ इति श्रीमद्भगवद्गीता० योगशास्त्रेऽक्षरब्रह्मयोगो नामाष्टमोऽध्यायः ॥ ८ ॥

श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् । प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप । अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥ मया

ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥ यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥ सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न च मां तानि कर्माणि निबध्नंति धनंजय । उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥ मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनाऽनेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानंतो मम भूतमहेश्वरम् ॥ ११ ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥ सततं कीर्तयंतो मां यतंतश्च दृढव्रताः । नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥ ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते । एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मंत्रोहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥ पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोंकार ऋक् साम यजुरेव च ॥ १७ ॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते । ते
पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान्॥२०॥
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते ॥ २१ ॥
अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते । तेषां नित्याभियु-
क्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥ येऽप्यन्यदेवताभक्ता
यजंते श्रद्धयान्विताः । तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम्
॥ २३ ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु
मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥ यांति देवव्रता
देवान् पितॄन्यांति पितृव्रताः । भूतानि यांति भूतेज्या यांति
मद्याजिनोऽपि माम् ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो मे
भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः
॥ २६ ॥ यत्करोपि यदश्नासि यज्जुहोषि ददासि यत् । यत्त-
पस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥ शुभाशुभफलैरेवं
मोक्ष्यसे कर्मबंधनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुप-
ष्यसि ॥ २८ ॥ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥ अ
चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः
म्यग्व्यवसितो हि सः ॥ ३० ॥ क्षिप्रं भवति धर्मात्मा श
च्छांतिं निगच्छति । कौंतेय प्रतिजानीहि न मे भक्तः प्र
श्यति ॥ ३१ ॥ मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पाप
नयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गति
॥ ३२ ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । अनि
त्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥ मन्मना भ

मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥ इति श्रीमद्भगवद्गीता० राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

श्रीभगवानुवाच ॥ भूय एव महाबाहो शृणु मे परमं वचः । यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः । अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् । असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च ॥४॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा । मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः । सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥७॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् । कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥ तेषामेवानुकंपार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥ **अर्जुन उवाच** ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।

नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥ स्वयमे-
वात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम । भूतभावन भूतेश देवदेव
जगत्पते ॥ १५ ॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥ कथं
विद्यामहं योगिंस्त्वां सदा परिचिंतयन् । केषु केषु च भावेषु
चिंत्योऽसि भगवन्मया ॥ १७ ॥ विस्तरेणात्मनो योगं विभूतिं
च जनार्दन । भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्
॥ १८ ॥ **श्रीभगवानुवाच** ॥ हंत ते कथयिष्यामि दिव्या
ह्यात्मविभूतयः । प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे
॥ १९ ॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमा-
दिश्च मध्यं च भूतानामंत एव च ॥ २० ॥ आदित्यानामहं
विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं
शशी ॥ २१ ॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ रुद्राणां
शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् । वसूनां पावकश्चास्मि मेरुः
शिखरिणामहम् ॥ २३ ॥ पुरोधसां च मुख्यं मां विद्धि पार्थ
बृहस्पतिम् । सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥२४॥
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि
स्थावराणां हिमालयः ॥ २५ ॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां
च नारदः । गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥२६॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेंद्राणां
नराणां च नराधिपम् ॥ २७ ॥ आयुधानामहं वज्रं धेनूनाम-
स्मि कामधुक् । प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुः
अनंतश्चास्मि नागानां वरुणो यादसामहम् । पि

चास्मि यमः संयमतामहम् ॥ २९ ॥ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् । मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥ पवनः पवतामस्मि रामः शस्त्रभृतामहम् । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥ सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन । अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥ अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च । अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः ॥ ३३ ॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् । कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम तथा साम्नां गायत्री छन्दसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥ वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः । मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥ दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥ नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप । एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥ ४१ ॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥ इति श्रीमद्भगवद्गीता० विभूतियोगो नाम दशमोऽध्यायः ॥ १० ॥

अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् । यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया । त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥ श्रीभगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥ पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा । बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् । मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥ संजय उवाच ॥ एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् । सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखम् ॥ ११ ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा । अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः । प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥ १४ ॥ अर्जुन उवाच ॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वा-

नुरगांश्च दिव्यान् ॥ १५ ॥ अनेकबाहूदरवक्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपम् । नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् ॥ १६ ॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतम् । पश्यामि त्वां दुर्निरीक्ष्यं समंताद् दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् । त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रम् । पश्यामि त्वां दीप्तहुताशवक्रं स्वतेजसा विश्वमिदं तपंतम् ॥ १९ ॥ द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः । दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥ अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति । स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च । गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुवक्रनेत्रं महाबाहो बहुबाहूरुपादम् । बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ २३ ॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् । दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥२४॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि । दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः । भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥ वक्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि ।

केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः
॥ २७ ॥ यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा
द्रवंति । तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्व-
लंति ॥ २८ ॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय
समृद्धवेगाः । तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि
समृद्धवेगाः ॥ २९ ॥ लेलिह्यसे ग्रसमानः समंताल्लोकान्सम-
ग्रान्वदनैर्ज्वलद्भिः । तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः
प्रतपंति विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमो-
ऽस्तु ते देववर प्रसीद । विज्ञातुमिच्छामि भवंतमाद्यं न हि
प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥ श्रीभगवानुवाच ॥
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः
॥ ३२ ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं
समृद्धम् । मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसा-
चिन् ॥ ३३ ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्या-
नपि योधवीरान् । मया हतांस्त्वं जहि मा व्यथिष्ठा युद्ध्यस्व
जेताऽसि रणे सपत्नान् ॥ ३४ ॥ संजय उवाच ॥ एत-
च्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी । नमस्कृत्वा
भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥
अर्जुन उवाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्य-
नुरज्यते च । रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च
सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न नमेरन्महात्मन् गरीयसे
ब्रह्मणोऽप्यादिकर्त्रे । अनंत देवेश जगन्निवास त्वमक्षरं सदस-
त्तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य

परं निधानम् । वेत्ताऽसि वेद्यं च परं च धाम त्वया ततं विश्व-
मनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं
प्रपितामहश्च । नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि
नमो नमस्ते ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते
सर्वत एव सर्व । अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि
ततोऽसि सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण
हे यादव हे सखेति । अजानता महिमानं तवेदं मया प्रमादा-
त्प्रणयेन वापि ॥ ४१ ॥ यच्चावहासार्थमसत्कृतोऽसि विहार-
शय्यासनभोजनेषु । एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये
त्वामहमप्रमेयम् ॥ ४२ ॥ पितासि लोकस्य चराचरस्य त्वमस्य
पूज्यश्च गुरुर्गरीयान् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥ तस्मात्प्रणम्य प्रणिधाय
कायं प्रसादये त्वामहमीशमीड्यम् । पितेव पुत्रस्य सखेव
सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥ अदृष्टपूर्वं
हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे । तदेव मे
दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥
किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव । तेनैव
रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥
श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शि-
तमात्मयोगात् । तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न
दृष्टपूर्वम् ॥ ४७ ॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न
तपोभिरुग्रैः । एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरु-
प्रवीर ॥ ४८ ॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं
घोरमीदृङ्ममेदम् । व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूप-

मिदं प्रपश्य ॥ ४९ ॥ संजय उवाच ॥ इत्यर्जुनं वासुदेव-
स्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः । आश्वासयामास च
भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥ अर्जुन
उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन । इदानीमस्मि
संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥ श्रीभगवानुवाच ॥
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं
दर्शनकांक्षिणः ॥ ५२ ॥ नाहं वेदैर्न तपसा न दानेन न
चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च
तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥ मत्कर्मकृन्मत्परमो मद्भक्तः
संगवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥
इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म० विश्वरूपदर्शनं नामै-
कादशोऽध्यायः ॥ ११ ॥

अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपा-
सते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥
श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपा-
सते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥ ये त्वक्षरम-
निर्देश्यमव्यक्तं पर्युपासते ॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं
ध्रुवम् ॥ ३ ॥ संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते
प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥ क्लेशोऽधिकतरस्ते-
षामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहव-
द्भिरवाप्यते ॥ ५ ॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य
मत्पराः । अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात्पार्थ

मय्यावेशितचेतसाम् ॥ ७॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८॥ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १०॥ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११॥ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते। ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम् ॥ १२॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति। शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७॥ समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥ इति श्रीमद्भ० भक्तियोगोनाम द्वादशोऽध्यायः ॥१२॥

अर्जुन उवाच ॥ प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च । एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ (अथ प्रक्षिप्त) **श्रीभगवानुवाच** ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥ तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥ ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ ५ ॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः । एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥ इन्द्रियार्थेषु वैराग्यमनहंकार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥ बहिरंतश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ १५॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् । भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥ १७ ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् । कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह । सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना । अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते । तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२६॥ समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् । विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥ २७ ॥ समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् । न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम् ॥२८॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोऽपि कौंतेय न

करोति न लिप्यते ॥ ३१ ॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा । भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥ ३४ ॥

इति श्रीमद्भ० क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् । यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायंते प्रलये न व्यथंति च ॥ २ ॥ मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् । संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥ सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥ तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् । तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७ ॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ सत्वं सुखे संजयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥ रजस्तमश्चाभिभूय सत्वं भवति भारत । रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥ १० ॥ सर्वद्वारेषु

देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ॥ ११ ॥ लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा । रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च । तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥ १३ ॥ यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥ रजसि प्रलयं गत्वा कर्मसंगिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम् । रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥ सत्वात्संजायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥ ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥ १८ ॥ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् । जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुन उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ श्रीभगवानुवाच ॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव । न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते । गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २४ ॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समती-
त्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥ ब्रह्मणो हि प्रतिष्ठाहम-
मृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य
च ॥ २७ ॥ इति श्रीमद्भगवद्गी० गुणत्रयविभागयोगो नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्य-
यम् । छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥
अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ॥ २ ॥
न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥
निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ॥ ५ ॥
न तद्भासयते सूर्यो न शशांको न पावकः । यद्गत्वा न निव-
र्तंते तद्धाम परमं मम ॥ ६ ॥ ममैवांशो जीवलोके जीवभूतः
सनातनः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति
वायुर्गंधानिवाशयात् ॥ ८ ॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं
घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥ उत्क्रा-
मंतं स्थितं वापि भुंजानं वा गुणान्वितम् । विमूढा नानुपश्यंति
पश्यंति ज्ञानचक्षुषः ॥ १० ॥ यतंतो योगिनश्चैनं पश्यंत्यात्म-

न्यवस्थितम् । यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥ गामाविश्य च भूतानि धारयाम्यहमोजसा । पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥ २० ॥ इति श्रीमद्भगवद्गीतासू० पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः ॥ १५ ॥

श्रीभगवानुवाच ॥ अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवंति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥ दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥ दैवी संपद्विमोक्षाय निबंधाया-

सुरी मता । माशुचः संपदं दैवीमभिजातोऽसि पांडव ॥५॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥८॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥ काममाश्रित्य दुष्पूरं दंभमानमदान्विताः । मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्ततेऽशुचिव्रताः ॥१०॥ चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः । कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहंते कामभोगार्थमन्यायेनार्थसंचयान् ॥१२॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥ अनेकचित्तविभ्रांता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः । यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् ॥ १७ ॥ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥ २० ॥ त्रिविधं नरकस्येदं

द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४ ॥ इति श्रीमद्भगवद्गीतासू० दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः ॥ १६ ॥

अर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः ॥ तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥ १ ॥ **श्रीभगवानुवाच** ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥ यजंते सात्विका देवान्यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः । दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥ कर्षयंतः शरीरस्थं भूतग्राममचेतसः । मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥ आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥ ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥ यातयामं गतरसं पूति पर्युषितं च यत् । उच्छिष्टमपि

चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् । इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥ सत्कारमानपूजार्थं तपो दंभेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः । दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥ २५ ॥ सद्भावे साधुभावे च सदि-

हिंमात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु । प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ॥ ३० ॥ यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्मं धर्ममिति या मन्यते तमसा वृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ॥ ३३ ॥ यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन । प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥३६॥ यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥ यदग्रे चानुबंधे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमो दमस्तपः शौचं शांतिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म

स्वभावजम् ॥४२॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४३॥ कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥ श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥ सहजं कर्म कौंतेय सदोषमपि न त्यजेत् । सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥४९॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ ५५ ॥ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादा-

त्तरिष्यसि । अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा । कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥६०॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥ तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ॥६२॥ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥ इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥ श्रद्धावाननसूयश्च शृणुयादपि यो नरः । सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥ अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसंदेहः करिष्ये वचनं

तव ॥ ७३ ॥ संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः । संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् । केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः । विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥ इति श्रीभगवद्गीतासमाप्ता ॥ ३८ ॥

उत्तरगीता ॥ ३९ ॥

ॐ परमात्मने नमः ॥ अर्जुन उवाच ॥ यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनम् । अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥ १ ॥ कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् । हृदयाम्बुजमध्यस्थं ज्ञानज्ञेयस्वरूपकम् । तत्क्षणादेव मुच्येत यज्ज्ञानाद्ब्रूहि केशव ॥ २ ॥ श्रीभगवानुवाच ॥ साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव । यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहम् ॥ ३ ॥ आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात् । योगेन गतकामानां भावना ब्रह्म चक्षते ॥ ४ ॥ शरीरिणामजस्यान्तं हंसत्वं पारदर्शनम् । हंसो हंसाक्षरं चैव कूटस्थं यत्तदक्षरम् ॥ ५ ॥ तद्विद्वानक्षरं प्राप्य जह्यान्मरणजन्मनी ॥ ६ ॥ काकीमुखककारान्त उकारश्चेतनाकृतिः । मकारस्य च

लुप्तस्य कोऽर्थः संप्रतिपद्यते ॥ ७ ॥ गच्छँस्तिष्ठन् सदाकालं वायुस्वीकरणं परम् । सर्वकालप्रयोगेण सहस्रायुर्भवेन्नरः ॥ ८ ॥ यावत्पश्येत् खगाकारं तदाकारं विचिन्तयेत् । खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ॥ ९ ॥ आत्मानं खमयं कृत्वा न किंचिदपि चिन्तयेत् ॥ १० ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः । बहिर्व्योम स्थितं नित्यं नासाग्रे च व्यवस्थितम् । निष्कलं तं विजानीयाच्छ्वासो यत्र लयं गतः ॥ ११ ॥ पुटद्वयविनिर्मुक्तो वायुर्यत्र विलीयते । तत्र संस्थं मनः कृत्वा तं ध्यायेत्पार्थ ईश्वरम् ॥ १२ ॥ निष्कलं तं विजानीयात्पङ्र्मिरहितं शिवम् ॥ १३ ॥ प्रभाशून्यं मनःशून्यं बुद्धिशून्यं निरामयम् । सर्वशून्यं निराभासं समाधिस्थस्य लक्षणम् । त्रिशून्यं यो विजानीयात्स तु मुच्येत बन्धनात् ॥ १४ ॥ स्वयमुच्चलिते देहे देही न्यस्तसमाधिना । निश्चलं तं विजानीयात्समाधिस्थस्य लक्षणम् ॥ १५ ॥ अमात्रं शब्दरहितं स्वरव्यञ्जनवर्जितम् । बिन्दुनादकलातीतं यस्तं वेद स वेदवित् ॥ १६ ॥ प्राप्ते ज्ञानेन विज्ञाने ज्ञेये च हृदि संस्थिते । लब्धशान्तिपदे देहे न योगो नैव धारणा ॥ १७ ॥ यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ १८ ॥ नावार्थी तु भवेत्तावद्यावत्पारं न गच्छति । उत्तीर्णे तु सरित्पारे नावया किं प्रयोजनम् ॥ १९ ॥ ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः । पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥ २० ॥ उल्काहस्तो यथाकालं द्रव्यमालोक्य तां त्यजेत् । ज्ञानेन ज्ञेयमालोक्य ज्ञानं पश्चात्परित्यजेत् ॥ २१ ॥ यथाऽमृतेन तृप्तस्य पयसा किं प्रयोजनम् । एवं तं

परमं ज्ञात्वा वेदैर्नास्ति प्रयोजनम् ॥ २२ ॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । न चास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥ २३ ॥ तैलधारमिवाच्छिन्नं दीर्घघण्टानिनादवत् । अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ २४ ॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ २५ ॥ तादृशं परमं रूपं स्मरेत्पार्थ ह्यनन्यधीः । विधूमाग्निनिभं देवं पश्येदत्यन्तनिर्मलम् ॥ २६ ॥ दूरस्थोऽपि न दूरस्थः पिण्डस्थः पिण्डवर्जितः । विमलः सर्वदा देही सर्वव्यापी निरञ्जनः ॥ २७ ॥ कायस्थोऽपि न कायस्थः कायस्थोऽपि न जायते । कायस्थोऽपि न भुञ्जानः कायस्थोऽपि न बध्यते । कायस्थोऽपि न लिप्तः स्यात् कायस्थोऽपि न बाध्यते ॥२८॥ तिलमध्ये यथा तैलं क्षीरमध्ये यथा घृतम् । पुष्पमध्ये यथा गन्धः फलमध्ये यथा रसः ॥ २९ ॥ काष्ठाग्निवत्प्रकाशेत आकाशे वायुवच्चरेत् ॥ ३० ॥ तथा सर्वगतो देही देहमध्ये व्यवस्थितः॥३१॥ मनःस्थो देहिनां देवो मनोमध्ये व्यवस्थितः। मनःस्थं मनमध्यस्थं मध्यस्थं मनवर्जितम्। मनसा मन आलोक्य स्वयं सिध्यन्ति योगिनः ॥ ३२ ॥ आकाशं मानसं कृत्वा मनः कृत्वा निरास्पदम् । निश्चलत्वं विजानीयात्समाधिस्थस्य लक्षणम् ॥ ३३ ॥ योगामृतरसं पीत्वा वायुभक्षः सदा सुखी । यममभ्यसते नित्यं समाधिर्मृत्युनाशकः ॥ ३४ ॥ ऊर्ध्वशून्यमधःशून्यं मध्यशून्यं यदात्मकम् । सर्वशून्यं स आत्मेति समाधिस्थस्य लक्षणम् ॥ ३५ ॥ शून्यभावितभावात्मा पुण्यपापैः प्रमुच्यते ॥ ३६ ॥ अर्जुन उवाच ॥ अदृश्ये भावना नास्ति दृश्यमेतद्विनश्यति । अवर्णमस्वरं ब्रह्म कथं ध्यायन्ति योगिनः

॥ ३७ ॥ **श्रीभगवानुवाच** ॥ ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं यदात्मकम् । सर्वपूर्णं स आत्मेति समाधिस्थस्य लक्षणम् ॥ ३८ ॥ **अर्जुन उवाच** ॥ सालम्बस्याप्यनित्यत्वं निरालम्बस्य शून्यता । उभयोरपि दोषत्वात्कथं ध्यायन्ति योगिनः ॥ ३९ ॥ **श्रीभगवानुवाच** ॥ हृदयं निर्मलं कृत्वा चिन्तयित्वाप्यनामयम् । अहमेव इदं सर्वमिति पश्येत्परं सुखी ॥४०॥ **अर्जुन उवाच** ॥ अक्षराणि समात्राणि सर्वे बिन्दुसमाश्रिताः । बिन्दुर्भिद्यति नादेन स नादः केन भिद्यते ॥ ४१ ॥ **श्रीभगवानुवाच** ॥ अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः । ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ॥ ४२ ॥ तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ ओङ्कारध्वनिनादेन वायोः संहरणान्तिकम् । निरालम्बं समुद्दिश्य यत्र नादो लयं गतः ॥ ४३ ॥ **अर्जुन उवाच** ॥ भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा । प्राणैर्विमुक्ते देहे तु धर्माधर्मौ क्व गच्छतः ॥ ४४ ॥ **श्रीभगवानुवाच** ॥ धर्माधर्मौ मनश्चैव पञ्चभूतानि यानि च । इन्द्रियाणि च पञ्चैव याश्चान्याः पञ्चदेवताः ॥ ४५ ॥ ताश्चैव मनसा सर्वे नित्यमेवाभिमानतः । जीवेन सह गच्छन्ति यावत्तत्त्वं न विन्दति ॥ ४६ ॥ **अर्जुन उवाच** ॥ स्थावरं जङ्गमं चैव यत्किंचित्सचराचरम् । जीवा जीवेन सिध्यन्ति स जीवः केन सिध्यति ॥ ४७ ॥ **श्रीभगवानुवाच** ॥ मुखनासिकयोर्मध्ये प्राणः संचरते सदा । आकाशः पिबते प्राणं स जीवः केन जीवति ॥ ४८ ॥ **अर्जुन उवाच** ॥ ब्रह्माण्डव्यापितं व्योम व्योम्ना चावेष्टितं जगत् । अन्तर्बहिश्च तद्व्योम कथं देवो निरञ्जनः ॥ ४९ ॥ **श्रीभ-**

गवानुवाच ॥ आकाशो ह्यवकाशश्च आकाशं व्यापितं च यत्। आकाशस्य गुणः शब्दो निःशब्दं ब्रह्म चोच्यते ॥५०॥ अर्जुन उवाच ॥ दन्तोष्ठताल्लुजिह्वानामास्पदं यत्र दृश्यते। अक्षरत्वं कुतस्तेषां क्षरत्वं वर्तते सदा ॥ ५१ ॥ श्रीभगवानुवाच ॥ अघोषमव्यञ्जनमस्वरं चाप्यतालुकण्ठोष्ठमनासिकं च। अरेखजातं परमूष्मवर्जितं तदक्षरं न क्षरते कथंचित् ॥ ५२ ॥ अर्जुन उवाच ॥ ज्ञात्वा सर्वगतं ब्रह्म सर्वभूताधिवासितम्। इन्द्रियाणां निरोधेन कथं सिध्यन्ति योगिनः ॥ ५३ ॥ श्रीभगवानुवाच ॥ इन्द्रियाणां निरोधेन देहे पश्यन्ति मानवाः। देहे नष्टे कुतो बुद्धिर्बुद्धिनाशे कुतो ज्ञता ॥ ५४ ॥ तावदेव निरोधः स्याद्यावत्तत्त्वं न विन्दति। विदिते तु परे तत्त्वे एकमेवानुपश्यति ॥ ५५ ॥ नवच्छिद्रकृता देहाः स्रवन्ति गलिका इव। नैवं ब्रह्म न शुद्धं स्यात्पुमान् ब्रह्म न विन्दति ॥ ५६ ॥ अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः। उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते ॥ ५७ ॥ इत्युत्तरगीतायां प्रथमोऽध्यायः ॥ १ ॥

अर्जुन उवाच ॥ ज्ञात्वा सर्वगतं ब्रह्म सर्वज्ञं परमेश्वरम्। अहंब्रह्मेति निर्देष्टुं प्रमाणं तत्र किं भवेत् ॥ १ ॥ श्रीभगवानुवाच ॥ यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम्। अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः ॥२॥ जीवे परेण तादात्म्यं सर्वगं ज्योतिरीश्वरम्। प्रमाणलक्षणैर्ज्ञेयं स्वयमेकाग्रवेदिना ॥३॥ अर्जुन उवाच ॥ ज्ञानेनैव भवेज्ज्ञेयं विदित्वा तत्क्षणेन तु। ज्ञानमात्रेण मुच्येत किं पुनर्योगधारणा ॥ ४ ॥ श्रीभगवानुवाच ॥ ज्ञानेन दीपिते देहे बुद्धिर्ब्रह्मसमन्विता। ब्रह्म-

ज्ञानाग्निना विद्वान्निर्दहेत्कर्मबन्धनम् ॥ ५ ॥ ततः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलाम्बराभम् । यथोदके तोयमनुप्रविष्टं तथात्मरूपो निरुपाधिसंस्थितः ॥ ६ ॥ आकाशवत्सूक्ष्मशरीर आत्मा न दृश्यते वायुवदन्तरात्मा । स बाह्यमभ्यन्तरनिश्चलात्मा ज्ञानोल्कया पश्यति चान्तरात्मा ॥ ७ ॥ यत्र यत्र मृतो ज्ञानी येन वा केन मृत्युना । यथा सर्वगतं व्योम तत्र तत्र लयं गतम् ॥ ८ ॥ शरीरव्यापितं व्योम भुवनानि चतुर्दश । निश्चलो निर्मलो देही सर्वव्यापी निरञ्जनः ॥ ९ ॥ मुहूर्तमपि योगश्चेन्नासाग्रे मनसा सह । सर्वं तरति पाप्मानं तस्य जन्मशतार्जितम् ॥ १० ॥ दक्षिणे पिङ्गला नाडी वह्निमण्डलगोचरा । देवयानमिति ज्ञेया पुण्यकर्मानुसारिणी ॥११॥ इडा च वामनिःश्वाससोममण्डलगोचरा । पितृयानमिति ज्ञेया वाममाश्रित्य तिष्ठति ॥ १२ ॥ गुदस्य पृष्ठभागेऽस्मिन् वीणादण्डस्य देहभृत् । दीर्घास्थि मूर्ध्निपर्यन्तं ब्रह्मदण्डीति कथ्यते ॥ १३ ॥ तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाडीति सूरिभिः ॥१४॥ इडापिङ्गलयोर्मध्ये सुषुम्णा सूक्ष्मरूपिणी । तस्याग्रे सर्वगं सर्वं यस्मिन् सर्वं प्रतिष्ठितम् ॥ १५ ॥ तस्या मध्यगताः सूर्यसोमाग्निपरमेश्वराः । भूतलोका दिशः क्षेत्रं समुद्राः पर्वताः शिलाः ॥ १६ ॥ द्वीपाश्च निम्नगा वेदाः शास्त्रविद्याकलाक्षराः । स्वरमन्त्रपुराणानि गुणाश्चैते च सर्वशः ॥ १७ ॥ बीजं बीजात्मकास्तेषां क्षेत्रज्ञाः प्राणवायवः । सुषुम्णान्तर्गतं विश्वं तस्मिन् सर्वं प्रतिष्ठितम् ॥ १८ ॥ नानानाडीप्रसवगं सर्वभूतान्तरात्मनि । ऊर्ध्वमूलमधःशाखं वायुमार्गेण सर्वगम् ॥ १९ ॥ द्विसप्ततिसहस्राणि नाड्यः स्युर्वायुगोचराः । कर्ममार्गेण सुषि-

रास्तिर्यञ्चः सुषिरात्मकाः ॥ २० ॥ अधश्चोर्ध्वगतास्तासु नव-
द्वाराणि रोधयन्। वायुना सह जीवोर्ध्वं ज्ञानी मोक्षमवाप्नु-
यात् ॥ २१ ॥ अमरावतीन्द्रलोकेऽस्मिन्नासाग्रे पूर्वतो दिशि।
अग्निलोको ह्यथ ज्ञेयश्चक्षुस्तेजोवती पुरी ॥ २२ ॥ याम्या संय-
मनी श्रोत्रे यमलोकः प्रतिष्ठितः। नैर्ऋतो ह्यथ तत्पार्श्वे नैर्ऋतो
लोक आश्रितः ॥ २३ ॥ विभावरी प्रतीच्यां तत्पृष्ठे वारुणिका
पुरी। वायोर्गन्धवती कर्णपार्श्वे लोकः प्रतिष्ठितः ॥ २४ ॥
सौम्या पुष्पवती सौम्ये सोमलोकस्तु कण्ठतः। वामकर्णे तु
विज्ञेयो देहमाश्रित्य तिष्ठति ॥ २५ ॥ वामे चक्षुषि चैशानी
शिवलोको मनोन्मनी। मूर्ध्नि ब्रह्मपुरी ज्ञेया ब्रह्माण्डं देहमा-
श्रितम् ॥ २६ ॥ पादादधः शिवोऽनन्तः कालाग्निप्रलया-
त्मकः। अनामयमधश्चोर्ध्वं मध्यमं तु बहिः शिवम् ॥ २७ ॥
अधःपदोऽतलं विद्यात्पादं च वितलं विदुः। नितलं पादसंधिं
च सुतलं जङ्घमुच्यते ॥ २८ ॥ महातलं च जानु स्यादूरुदेशे
रसातलम्। कटिस्तलातलं प्रोक्तं सप्तपातालसंज्ञया ॥ २९ ॥
कालाग्निनरकं घोरं महापातालसंज्ञया। पातालं नाभ्यधोभागः
भोगीन्द्रफणिमण्डलम्। वेष्टितः सर्वतोऽनन्तः स बिभ्रज्जीव-
संज्ञकः ॥ ३० ॥ भूलोकं नाभिदेशं तु भुवर्लोकं तु कुक्षितः।
हृदयं स्वर्गलोकं तु सूर्यादिग्रहतारकाः ॥ ३१ ॥ सूर्यसोमसुन-
क्षत्रं बुधशुक्रकुजाङ्गिराः। मन्दश्च सप्तमो ज्ञेयो ध्रुवोऽन्तः स्वर्ग-
लोकतः ॥ ३२ ॥ हृदये कल्पयन्योगी तस्मिन्सर्वसुखं भवेत्
॥ ३३ ॥ हृदयस्थमहर्लोकं जनोलोकं तु कण्ठतः। तपोलोकं
भ्रुवोर्मध्ये मूर्ध्नि सत्यं प्रतिष्ठितम् ॥ ३४ ॥ ब्रह्माण्डरूपिणी
पृथ्वी तोयमध्ये विलीयते। अग्निना पच्यते तोयं वायुना

